DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj)

Students can retain library books only for two weeks at the most

BORROWER S No	DUE DTATE	SIGNATURE

The Forbes Gujarati Sabhā Series No 14

PRABANDHCHINTĀMANI

BY

Shri MERUTUNGACHARYA

EDITED BY

DURGĀSHANKER KEVALRAM SHASTRI

BOMBAY

V S 1988 A D 1932

Price Rs 2-8-0 [Copies 500

To be had from
Messrs N M Tripathi & Co
Booksellers and Publishers Princess St, Bombay 2



Printed by Natverlal Itcharam Desai B A
at The "Gujarati" Printing Press,
Sassoon Buildings, Elphinstone Circle, Fort, Bombay No



Published by Harsiddhbhai Vajubhai Divatia
M A LL B Advocate Bombay High Court
The Hon. Secretary, The Forbes Gujarati Sabha
Maharaj Mansions, Sandhurst Road, Bombay No 4



(All Rights reserved by The Forbes Gujarati Sabha Bombay)



श्री फार्बस गुजरातीसभा ग्रन्थावलिः अंक १४

श्रीमेरुतुङ्गाचार्यकृतः

प्रबन्धचिन्तामणिः ।



शास्त्रि-केवलरामात्मजेन दुर्गाशंकरशास्त्रिणा संशोधितः



नवीनं संस्करणम्



प्रतय' ५००

सवदब्दा' १९८८]　　　　[शकाब्दाः १८५४

मौल्यम् रू. १॥

प्रापणस्थानम्:—
मेसर्स एन. एम. त्रिपाठी एन्ड कंपनी
बुकसेलर्स एन्ड पब्लीशर्स
प्रिन्सेस स्ट्रीट. मुंबई नं. २.

प्रस्तावना.

श्रीप्रबंधचिन्तामणिनाम्नो ग्रन्थस्यास्य जैनधार्मिकदृष्ट्या यद्विषयप्रयोजनादि तत्प्रथमसंपादकेन स्वकृतप्रस्तावनायां विस्तरतो वर्णितम्। ततः कियानंशोऽत्र उद्ध्रियते। तत्रोक्तप्रकारेण सत्यपि ग्रन्थस्यास्य परमपुरुषार्थसाधकत्वे ग्रन्थकर्त्रा स्वयमेवोक्तं बुधलोकचित्तरंजनमपि वर्तत एव प्रयोजनान्तरं, परंत्वाधुनिकानां मनसि ग्रन्थोऽयं गूर्जरदेशस्य मध्यकालीनेतिहासस्य साधनभूतत्वेनैव महत्त्वमादधाति।

ग्रन्थस्यास्यैतिहासिकमूल्यं सविस्तरं निरूपयितुं गूर्जरानुवादस्योपोद्घाते प्रयत्नः कृतः, परमनेतावदत्रवश्य कथ्यते यदद्यावध्युपलब्धेतिहासिकसाधनरूपेषु प्रबन्धेष्वयं प्रबन्धचिन्तामणिः सर्वतोऽधिकविश्वसनीयः। ग्रन्थेऽस्मिन्दृग्गोचरीभूतो मूलराजादिनृपतीनां राज्यकालनिर्देशः प्रायः पुरातत्त्वविद्भिर्विश्वासार्हो गण्यते। तत्तन्नृपैराचरितयुद्धादिकार्यवृत्तान्तोऽपीतिहासस्य नातिदूरे वर्तते। तथापि नायमितिहासः किन्तु प्रबन्ध एव। ग्रन्थकर्त्रा "संप्रदायप्राप्तं" श्रुतमेवात्र संकलितम्। विविधाः प्रबन्धा लोककथारूपाः। लोककथारूपादंशादैतिहासिकोंऽशो विविच्य गूर्जरानुवादस्य टिप्पणीषु परिशिष्टेषु च प्रदर्शितः। ऐतिहासिकतत्त्वस्येयत्ता च तत्रैवोपोद्घाते वर्णिता।

ऐतिहासिकान्वेषणकार्ये उपयुक्ततामुद्दिश्य समानार्थानां प्रबन्धानां तथा च सुभाषितविषये मूलग्रन्थानामथवा सुभाषितावल्यादिसुभाषितसंग्रहानामुल्लेखाष्टिप्पणीषु प्रदत्ताः।

ऐतिहासिकटिप्पण्यस्तु गूर्जरानुवादे द्रष्टव्याः।

ग्रन्थोऽयं वि. स. १३६१ वर्षे वर्धमानपुरे समाप्तिं गमित इति ग्रन्थसमाप्तौ ग्रन्थकर्त्रा स्वयमेवोक्तम्।

शुद्धिपत्रकस्यावश्यकतानिराकरणाय यथाशक्ति कृतेऽपि यत्ने न तत्र सफलताऽभूदिति शुद्धिपत्रकं प्रदत्तं तथापीन्द्रियदौर्बल्याद् भ्रमप्रमादादिवशाद्वाऽवशिष्टं स्खलितं यद्भवेत्तत्सुधीभिः संशोधनीयमिति प्रार्थयते—

झंडुफार्मसी भवानी
रोड, मुम्बई.
वि. सं. १९८८
अक्षय तृतीया.

शास्त्री केवलरामसूनुः दुर्गाशंकरशर्मा

॥ प्रथमसंस्कर्तुः प्रस्तावना ॥

एषोऽञ्जलिः सममसज्जनसज्जनौ तौ वन्दे नितान्तकुटिलप्रगुणस्वभावौ ।
एकं भिया निरभिसंधितवैरिभूतं प्रीत्या परं परमनिर्वृतिपात्रभूतम् ॥ १ ॥

भक्त्याख्यदशमेनाढ्या रसा नव निरूपिताः ।
अद्भुतोऽङ्गी तदङ्गानि यथास्थानं विभाव्यताम् ॥ २ ॥

ग्रन्थादौ प्रेक्षावतां प्रवृत्त्यर्थं मङ्गलविषयप्रयोजनसंबन्धाधिकारिणस्तथोपोद्घातप्रसङ्गावसराभिधानास्तिस्रः संगतीरपि सप्तभिः पद्यैः प्रबन्धकाराः प्रकटयामासुः । यथा—

ओंदितीर्थकर्तुर्भगवतश्चतुस्त्रिंशदतिशयानपि चतुर्भिर्मूलातिशयैर्ज्ञापयन्तस्तेन वक्ष्यमाणाः प्रततप्रबन्धा अपि संक्षिप्य वक्ष्याम इति ध्वनयन्तः स्वस्य च तपोगच्छेतरत्वद्योतकं स्वेष्टदेवगुरुनमस्कारात्मकं मङ्गलमादिमध्यावसानेष्वत्र सनितमिति सूचयन्त आद्यपद्यमाहुः ।

अथोपलतुल्यकलावच्चन्द्रप्रभशब्दैः पामरविषयिमुमुक्षूणामभव्यवर्जितानां तत्तद्योग्याधिकारप्रबन्धोद्घाटनापदेशोपदेशेन हेयोपादेयतां प्रबोधयन्तो द्वितीयं पद्यं पेठुः । ततोऽनानेकप्रबन्धसिन्धून्मथनोत्पन्नपीयूषपरिवेषणदेशीयसुखावबोधप्रयोजनसंयोजनमपि जनयामासुः । तथा परंपराप्राप्तगुरुसंप्रदायादीयमानविवक्षितवस्तुविषयविषयीकृतग्रन्थनामनिवेदनमप्यन्वर्थं समर्थयामासुः । तथैव सहायकधर्मदेवगुणचन्द्रनामग्रहणेन च प्राचीनमहापुरुषचरित्रश्रवणानन्तरासन्नसच्चरितशुश्रूषणाग्रहग्रथितोपायोपेयभावसंबन्धबन्धुरं प्रबन्धचिन्तामणिसंचयं चिक्युः ।

तत्र तावत्सर्वेषु सच्छास्त्रेषु साक्षात्परंपरया वा परमपुरुषार्थसाधनस्य साचीयस्त्वेन निर्देशनं निर्विवादं विश्वेषां विदुषां वचनेषु वर्वर्ति । अत्रभवन्तो भगवन्तः शिष्यशेमुषीनिसर्गसर्गनमेरवोऽपि मेरुतुङ्गाः भस्मीकृतभस्मग्रहणशक्ति सकलजैनीयशास्त्रसिद्धान्तोपनिषद्भूतं प्रबन्धचिन्तामणिनामानं ग्रन्थं जग्रन्थुः ।

तत्र तावदुक्तव्रतेष्वप्यहिंसाव्रतस्यादित्वात्तस्यापि दयामूलत्वाद्दयापि प्राज्यपरदुःखदलनेन दृश्यमानेति निदर्शयन्तः परदुःखभञ्जनबिरुदधारिणः श्रीविक्रमार्कस्य प्रबन्धं प्रथमं बबन्धुः । ततो विशिष्टशिष्टसृष्टिश्रेष्ठत्रिषष्टिशलाकापुरुषान्तिमाश्रमनि-

षण्णतीर्थतीर्थंकरत्वनिदानमुन्यन्नदानजन्यपूर्वपुण्यप्राग्भारप्रकटितैश्वर्यश्रीमच्छालिवा- हनप्रबन्धसंबन्धं विततनिपयस्तद्राग्भवीयक्रान्ततान्तवृत्तान्तकथनगर्भान्तिमातिथिसं- भागव्रतांशप्रभावं प्रकटयन्तस्ततोनुसदशुद्धितीय महाप्रबन्धम्। इत्थमाद्यन्तव्रताशलू- चितोचितद्वादशव्रताना सेतरकष्टानुष्ठानानामपि शीलव्रते सत्येव साफल्य प्रफुल्लयन्तः श्रीमहाकालमहादेवदत्तमालवदेशकन्यकुब्जेश्वररक्षितचरितकथनपूर्वकमृणालवतीमा- यामोहितमुञ्जमहाराजचरितमुदाहरणीभूतमुपन्यस्यन्तो गूर्जरेश्वराग्रगण्यागण्यपुण्यभाजा वनराजादीना चत्रचौर्यचटुलचित्तोर्जिताजितकुल्कलङ्ककलितचरितोच्चारणेन चाद- त्तादानब्रह्मचर्योद्भूताद्भुतप्रभाव प्रकाशयाचक्रुः। ससर्प च समाप्ति प्रथमसर्गोऽप्यत्र॥

ततश्च प्राप्तपुरुपुरंदरसंपदोऽपि पृथ्वीपतयो मृषावादेन नितरा पराभूतिपद प्रयान्तीति प्रतिपादयन्तः काशीशकर्णराजभोजराजभीमाना महादानिना चरित्रेषु " पराभवे प्रतिज्ञाता प्रणतिमकुर्वतो मालवेशस्य " मालवोऽपि स्थितेरपत्तदिति परिहाररूपामसत्यस्य परा कोटिमुद्दीक्षयन्तोऽणूनामनणूना व्रताना च कर्तव्यता कीर्तयन्तोऽत्र द्वितीयसर्गोन्नं वेनुः ॥

तदनु तेषामपि (व्रतानामपि) निश्चलनियतनीतिनियन्त्रणामन्त्रणत्वात्तद्- द्विदक्षिषष्णवविराजगुणविराजमानसिद्धराजप्रबन्धं चित्रचरित्र सूत्रयामासुः, सर्गं स्तृतीयोऽप्यतीतोऽत्र ॥

तदनु नीतिरपि परसत्तानिरपेक्षस्वाशयशौर्यशालिनामेव शीलतीति शीलशौर्य शालिशीघ्रसमप्रसादृसद्मितशतशक्तिसक्तवाक्शक्तिव्यक्तीकृतस्वकृतमुद्दतकृत्सितकुस्य- कुमारपालमहीपालप्रबन्धं चियाग्यक्षधृतमध्यगासिद्रुः, तत्र चतु सर्गेषु सत्स्वपि समाप्त- श्चतुर्थः सर्गः ॥

तदपि (शौर्यमपि) स्वस्वेष्टदेवतादृढपर्युपासनमेवेत्युच्चानुक्तकमनीयप्रश- स्तनीयपरमार्हताईणीयनरचरित्रप्रचितप्रकीर्णकप्रबन्धान्द्रव्यभावभेदभिन्नात्मपरमात्म- पूजाप्रभावाविर्भावान्तास्तदुपष्टम्भकावान्तरप्रबन्धसहितानपुनरागमनाय पञ्चत्व प्राप्तानिव पञ्चमसर्गान्तप्राहुरिति विस्तरभयात्संक्षिप्ततरापि प्रस्तावना प्राज्ञैः प्रज्ञया प्रकर्षपदवीं दवीयसीमपि प्रापणीयेति प्रार्थना ॥

मुम्बापुरीयसर्वविद्योत्तेजकाल्ये (यूनिवर्सिटी) १४-१०-१८८८ ख्रिष्ट. संवत् १९४४ निजादशम्याम्	शास्त्री रामचन्द्र दीनानाथ.

प्रथमसंस्कर्तुः पुस्तकाप्तिप्रज्ञप्तिपूर्वकस्वकल्पितसंकेतस्वरूपनिरूपणम्



सन्ने १८८५–८६ वर्षे डा पी पीटर्सनसाहेबसगृहीत न० ६१७ मुद्रणेच्छाजनकमदृष्टपूर्वं प्राचीनमकृततृतीयलक्षण प्रबन्धचिन्तामणिपुस्तकं A स्थाने स्थापितम् ॥ १ ॥

तस्यैव द्वितीयावतारमिव प० रत्नविजयगणिपुस्तकं B स्थाने बोध्यम् ॥२॥ तस्यैव नवीनमपि शतधाछिन्न C स्थाने निवेशितम् ॥ ३ ॥

आनन्दसुरगच्छाधिराजश्रीपूज्यगुणरत्नसूरिप्रीतिप्रेषितमव्यवस्थितस्वादकल्प्यमपि D स्थाने कल्पितम् ॥ ४ ॥

एवमसमग्रसामग्र्यामपि श्राद्धश्रद्धया प्रवर्तित मुद्रणकार्ये कालातिक्रमे प्रयासशतैः सक्रान्त विमलोपाश्रयस्थाद्विमलमपि मलधारिणोऽपूर्णं पुस्तकं पुनरपि प्रान्त पाठान्तरषु A स्थाने निसृष्टम् । तादृग्विधमपि केवलभगवदिच्छयात मुम्बापुरीय सुसाइटीस्थ कृपालयकारवसाहेबसगृहीत तन्मित्रमिव तत्रैव B स्थाने नियमितम् ॥

यत्र न कोपि सङ्केतस्तत्र स्वकृतमेवावगन्तव्यं टिप्पणम्.

वर्तमानसंस्करणविषयेऽऽदर्शादिनिरूपणम्

१ प्रथम सपादकेन A सज्ञया सूचितं पीटर्सनसाहेबसगृहीत न. ६१७ सन १८८४–८६ पुस्तक भाण्डारकर इन्स्टीट्युटत. समानीय मया पुनरप्यव लोकित a सज्ञया च निर्दिष्टम् । पाठान्तराणि च मूलपुस्तकादुद्धृतानि ।

२ प्रथमसपादकेन B स्थाने स्थापित न मया दृष्टं b संज्ञया बहुधा क्वचिच प्रमादवशात् B संज्ञयापि निर्दिष्टम् ।

३–४ प्रथमसंपादकेन C, D (अथवा d) संज्ञाभ्यामुद्धृतानि पाठान्तराणि मयापि तथैव स्थापितानि पुस्तके च न दृष्टे ।

५ प्रान्ते A सज्ञया यस्य पाठान्तराणि निर्दिष्टानि तद् विमलोपाश्रयस्थमपि पुस्तकं न मयाऽवलोकित तस्य पाठान्तराणि च मुद्रितपुस्तकमनु A संज्ञया प्रदत्तानि ।

६ फारबससाहेबसगृहीत तृतीयप्रकाशपर्यन्त तदानीं मुम्बापुरीय रो ए. सोसाइटीस्थमिदानीं च श्रीफार्बसगुजरातीसभाया: सग्रहालयस्थ प्रथमसपादकेन B सज्ञया निर्दिष्ट मयापि तथैव सज्ञयोल्लिखितमवलोकितमपि ।

७ मुम्बापुरीय रो. ए. सोसाइटीस्थ डा भाउदाजी सग्रहस्थमर्वाचीनमपिशुद्ध सपूर्ण च डा. भाउदाजी शर्मभिः स्वयं सशोधित वि स. १९१५ वर्षे प्राचीन पुस्तकादवतारित १२४ पृष्ठात्मक (प्रत्येकपृष्ठ $11\frac{1}{2} \times 6$ inches) पाठान्तराण्यतः H सज्ञयोद्धृतानि ।

८ पुण्यपत्तनस्थभाडारकर इन्स्टीट्यूटाप्रातमेक न २४९।१८७३–७४ वर्षीयफुल्रकेपपत्रस्थमाधुनिक स १९३० वर्षे लिखित २४० पृष्ठात्मक नाति शुद्ध L सज्ञया स्थापितम् ।

९ पुनश्च प्रबन्धचिन्तामणिग्रन्थस्याङ्ग्लभाषानुवादकर्त्रा टोनीमहाशयेन इन्डीआआफीसपुस्तकालयस्थबुल्हरहस्तप्रत २९६ सज्ञकादुद्धृतानि a सज्ञया च सूचितानि पाठान्तराणि मया तस्मादेवानुवादात् K सज्ञया संगृहीतानि ।

१० सद्भवेन फार्बससाहेबेन प्र. चिं ग्रन्थस्याङ्ग्लानुवाद १८४९ वर्षे स्वस्यैव हस्ताक्षरैर्लिखितस्तृतीयप्रकाशमारभ्य समाप्तिपर्यन्त श्रीफा

सभासंग्रहालये वर्तते । अस्य मूलपुस्तकमपि संपूर्णं प्रायः शुद्धं पीटर्सन भाउदाजी (a H) पुस्तकयोः समकक्षीयं भवेदिति भाति । एतस्माच्च M संज्ञया पाठान्तराणि क्वचित्संगृहीतानि ।

११ पुरातत्त्वविदा श्रीजिनविजयजीमुनिना संपादयितुमारब्धे प्रबन्धचिन्तामणि-ग्रन्थे F सज्ञकादादर्शादवतारितानि पाठान्तराणि दृष्ट्वा ततोऽप्यावश्यकः संग्रहः F संज्ञयैव कृतः ।

श्रीरामचंद्रदीनानाथशास्त्रिणा परेण यत्नेन संपादित इ. स. १८८८ वर्षे मुद्रितं पुस्तकं P संज्ञया निर्दिष्टम् । मुख्याधारस्थाने च स्थापितम् ।

पूर्वोक्तानामादर्शाना परस्परं तुल्नं कृत्वा तत्तदादर्शस्थ पाठाना न्यूनाधिक्यं च दृष्ट्वा यदि विविच्यते तदा ग्रन्थस्यास्योपलभ्यमानादर्शाना संप्रदायद्वैविध्यं दृश्यते । एकः सम्प्रदायः a संज्ञिते पीटर्सनसंगृहीते न. ६१७ पुस्तके (कदाचित् B संज्ञितेऽपि) समुपलभ्यते । द्वितीयश्च तदितरेषु सर्वेषु । उपलभ्यमानेषु सर्वपुस्तकेषु पश्चात्प्रक्षिप्तोंऽशो वर्तत एव किन्तु a, A, B, C, D F आदर्शेषु प्रक्षिप्तांशस्य बाहुल्य वर्तते (दृश्यता पृ. ९, १३, १४, १९, ४४, ४६, ४८, ५०, इत्यादि ।)

ग्रन्थस्यास्य सपादनकार्ये मेरुतुङ्गेन कथितप्रथमादर्शमुपलब्धादर्श-संशोधनद्वारा प्राप्तुं कृतेऽपि प्रयत्नेऽयं ग्रन्थः प्रथमादर्शप्रतिबिम्ब इति वक्तुं न शक्यते । तस्य निकटवर्त्येवश्यं भवेत् । परीक्षकास्तत्र प्रमाणम् ।

अथ विषयसूची

इति विषयसूची ।



शुद्धिपत्रकम्

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२८	९	तिघट्ठ	निघट्ठ
२९	३	स्नाता	स्नाताः
३२	७	परितुष्टो	परितुष्ट.
३४टि.	६	इत्ता	दत्ता
३९	७	वत्तीसडी हियांह	वत्तीस डीहियांह
३६	१७	पिकि	पिल्खि
४६टि.	९	प्रसादे	प्रासादे
,, टि.	१०	भीष्म	ग्रीष्म
९०	९	नग्गहं	नग्गुहं
६३टि.	३	१४९९	१८९९
८१	२	(७०)	(६८)
८४	२	जनान्	जवाद्
८८	१८	दवतायतन	देवतायतनं
९९	१३	'धूर्त्तेण	धूर्त्तेण
१०३	७	लिङ्गानुशासनसिद्धं	लिङ्गानुशासनासिद्धं
१०९	१५	कीर्तन	कीर्तनं
१०७	१३	त्व	त्व
११३,११६,११८, ११९,१२१,१८२, १८३,१८४,१८६, १८७,१८८,१९४, १९६,१९८,१९९, पृष्ठेषु टिप्पणीषु		भाउदाजीना स्थाने	भाउदाजिशर्मभि., इति वाच्यम्

शुद्धिपत्रकम्

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१२०	१	परिहइरन	परिहरन्
१३१	७	लीलयव	लीलयैव
१५१	८	रिद्दि	रिद्धि
१६६	२	शालभञ्मिका	शालभञ्जिका
१६९	१६	पूण	पूर्ण
१७३	१२	प्रपच्छ	पप्रछ
१९३	२	निबघ्य	निबध्य

શ્રી ફાર્બસ ગુજરાતી સભા—મુંબઈ

શાળા-પાઠશાળાઓને ઈનામ માટે તેમ પુસ્તકાલયોના સંગ્રહ માટે

અરધી કિમ્મતની ગોઠવણ

સાહિત્યપ્રચારને ઉત્તેજનની યોજના

શ્રી ફાર્બસ ગુજરાતી સભાએ, મુંબાઇ ઇલાકાનાં સરકારી, દેશી રાજ્યોનાં તેમ જ મ્યુનીસીપાલીટીઓ અને લોકલ બોર્ડોના કેળવણી ખાતાંઓમાં અભ્યાસ તથા વાંચનપ્રસાર દ્વારા તથા વિદ્યાર્થીઓને આપાતાં ઇનામો દ્વારા, તેમ જ તેમના હસ્તકની નિશાળોની તથા સાર્વજનિક લાઇબ્રેરીઓ અને પુસ્તકાલયોમાં ગુજરાતી સાહિત્યનો પ્રસાર બહોળા પ્રમાણમાં સહેલાઇથી, ઓછા ખર્ચે થઈ શકે તે માટે પોતાની માલિકીના પુસ્તકો (રાસમાળા ભાગ ૧—૨ સિવાય) અર્ધી કિમ્મતે, ઉપરી સંસ્થાઓને વેચાતાં લેઈ શકવાની અનુકૂલતા કરી આપવાની યોજના કરી છે.

રાસમાળા ભાગ ૧—૨ આ સંસ્થાઓને ૧૨ા ટકાના કમીશનથી વેચાતી મળશે.

આ યોજનાનો લાભ લેવા તે તે કેળવણી ખાતાં અને સંસ્થાએ પ્રેરાય તે માટે પોતાની માલિકીનાં પુસ્તકોનો પરિચય તૈયાર કરી પ્રકટ કરેલો છે.

ઉપર જણાવેલી સંસ્થાઓના હસ્તકની શાળા, પાઠશાળાઓમાં ઇનામો આપવા માટે તેમ જ તેમનાં પુસ્તકાલયોમાં તથા અન્ય સાર્વજનિક પુસ્તકાલયોમાં સંગ્રહવા માટે, જેમને આ પુસ્તકો અર્ધી કિમ્મતે વેચાતાં લેવાં હોય, તેમણે નીચેને શરનામે પત્રવ્યવહાર કરવો.

રા. રા. હરસિદ્ધભાઈ વજુભાઈ દિવેટિયા,

એમ, એ, એલએલ બી, એડવોકેટ, હાઇકોર્ટ, મુંબઈ.

માનાર્થ મંત્રી, શ્રી ફાર્બસ ગુજરાતી સભા,

મહારાજ, મેન્શન્સ, સેન્ડહર્સ્ટ રોડ, મુંબઈ નં. ૪

श्रीः

प्रबन्धचिन्तामणिः

॥ ॐ नमः श्रियै ॥ *श्रीस्वामिने नमः ॥
श्रीनाभिभूर्जिनः पातु परमेष्ठी भवान्तकृत् ।
श्रीभारत्योश्चतुर्द्वारमुचितं यच्चतुर्मुखी ॥ १ ॥
नृणामुपलतुल्यानां यस्य द्रावकरः करः ।
ध्यायामि तं कलावन्तं गुरुं चन्द्रप्रभं प्रभुम् ॥ २ ॥
गुम्फाँन्विधूय विविधान्सुखबोधाय धीमताम् ।
श्रीमेरुतुङ्गस्तद्ग्रथ्यबन्धाद्ग्रन्थं तनोत्यमुम् ॥ ३ ॥
रत्नाकरात्सद्गुरुसंप्रदायात्प्रबन्धचिन्तामणिमुद्दिधीर्षोः ।
श्रीधर्मदेवः शतधादितेतिवृत्तैश्च साहाय्यमिह व्यधत्त ॥ ४ ॥
श्रीगुणचन्द्रगणेश. प्रबन्धचिन्तामणिं नवं ग्रन्थम् ।
भारतमिवाभिरामं प्रथमादर्शे प्रदर्शितवान् ॥ ५ ॥
भृशं श्रुतत्वान्न कथाः पुराणाः प्रीणन्ति चेतांसि तथा बुधानाम् ।
वृत्तैस्तदासन्नसतां प्रबन्धचिन्तामणिग्रन्थमहं तनोमि ॥ ६ ॥
बुधैः प्रबन्धाः सुधियोच्यमाना भवन्त्यवश्यं यदि भिन्नभावाः ।
ग्रन्थे तथाप्यत्र सुसंप्रदायादृब्धे न चर्चा चतुरैर्विधेया ॥ ७ ॥

---

* श्रीसर्वज्ञाय नमः B. १ श्रीऋषभदेवः २ श्रीभारत्योरिति मुद्रितपुस्तके व्याख्या च टिप्पण्याम् ॥ " मणिरत्नमयसुवर्णमयरौप्यमयदुर्गत्रये समवसरणे चतुर्दिक्षु द्वारस्य विद्यमानत्वाच्छ्रियश्चतुर्द्वारमुचितं चतुस्त्रिंशदतिशयप्रभावात्सर्वाभिमुख्यत्वेनदेशनां ददानस्य तीर्थंकरस्य भारत्याश्चतुर्द्वारमुचितं यत्सम्बन्धिनी श्रीभारती च चतुर्मुखी जैनशास्त्रे प्रसिद्धा " ३ ग्रन्थान् A B ४ सद्गुरु B ५ प्रथमोपरोधवृत्तैश्च P श्रीधर्मदेवैः शतधोदितेतिवृत्तैश्च A ६ ऽप्रदर्शितवान् A विनिर्मितवान् B ऽत्रनिर्मितवान् L ७ स्वधियो B ८ सुसंप्रदायारब्धे A सुसंप्रदायदृष्टे B

१ ॥ अथ विक्रमार्कप्रबन्धः ॥

१ अन्त्यो[1]ऽप्याद्यः समजनि गुणैरेक एवावनीश
शौर्यौदार्यप्रभृतिभिरिहोर्वीतले विक्रमार्कः ।
श्रोतु श्रोत्रामृतसवनवत्तस्य राज्ञः प्रबन्धं
संक्षिप्योच्चैर्विपुलमपि तं वच्मि किञ्चित्तदादौ ॥
तथाहि—

अवन्तिदेशे[2] सुप्रतिष्ठाननामनि नगरेऽसमसाहसैकनिधिर्दिव्यलक्षणलक्षितो[3] विक्रमादिगुणै संपूर्णो[4] विक्रमनामा राजपुत्र आसीत् । स पुनराजन्मदारिद्योपद्रुतो[5]ऽप्यतिनीतिपरः सन्परःशतैरप्युपायैरर्थाननुपलभमान[6] कदाचिद्भट्टमात्रमित्र[7]सहायो रोहणाचलं प्रति प्रतस्थे । तत्र तदासन्ने प्रवरनर्मनि[8] नगरे कुलालस्यालये विश्रम्य प्रभातसमये स भट्टमात्रेण खनित्रं याचितः प्राह । अत्र खनीमध्यमध्यास्य प्रातः पुण्यश्रवणपूर्वं[9] ललाटं करतलेन संस्पृश्य हा दैवमित्युदीरयन्घाते पातिते सति दुर्गतो यथाप्राप्त्या रत्नानि लभते । स वृत्तान्तममुं तस्मात्सम्यगवगम्य विक्रमेण तद्दैन्यं कारयितुमक्षमस्तान्युपकरणानि संहादाय[10] रत्नखननार्थं खनीमध्ये प्रहारोद्यतं विक्रममभिदधे । यत्कश्चिद[11]वन्त्याः समागतो वैदेशिकः स्वगृहे कुशलोदन्तं पृष्टो भवन्मातुः पञ्चत्वमाचख्यौ । तत्तप्तवज्रसूचीनिभ वचो निशम्य ललाटं करतलेनाहत्य हा दैवमित्युच्चरन् खनित्रं करतलाच्चिक्षेप । तेन खनित्राग्रेण विदारितायां भुवि देदीप्यमानं सपादलक्षमूल्यं रत्नं प्रादुरासीत्[12] । भट्टमात्रस्तदादाय विक्रमेण सह

१ अन्तो B २ अवन्तिदेशे उज्जयिनीपूर्यां B ३ कमविक्रमादिगुणैः D. क्रमविक्रमादि B पराक्रमविक्रमादि गुणै H ४ र्णो भर्तृहरिबन्धु C ५ द्रुतः परशतै B H ६ र्थानलभमान B ७ भट्टमात्रसहायो A B H ८ प्रवरनाम्नि प्रवरनगरे A B L ९ खनीमध्य.प्राप्त. पुण्यश्रवणात्पूर्वं H पुण्यश्रवणात्पूर्वं A पुण्यश्रवणापूर्वं B १० समादाय A H आदाय B ११ तात कश्चिन् A H देव कश्चित B. १२ प्रादुरासीत् । भाग्येन किं न घटते यत

यद्यपि कृतसुकृतशत प्रयाति गिरिकन्दरान्तरेषु नरः ।
करकलितदीपकलिका तथापि लक्ष्मीस्तमनुसरति ॥ १ ॥ भट B

प्रत्यावृत्त[१] । तच्छोकशङ्कुशङ्कापनोदाय खनीवृत्तान्तज्ञापनपूर्वं तत्कालमेव मातुः कुशलमुक्तवान् । विक्रमः सहजां[२] लोलुभतां भट्टमात्रस्य विमृश्य क्रुधा तत्कराद्रत्नमाच्छिद्य पुनः खनीकण्ठे प्राप्त ।

२　धिग् रोहणं गिरिं दीनदारिद्र्यव्रणरोहणम्[३] ।
　　दत्ते हा दैवमित्युक्ते रत्नान्यर्थिजनाय यः ॥

इत्युदीर्य सकललोकप्रत्यक्षं तत्रैव तद्रत्नमुत्सृज्य पुनर्देशान्तरं परिभ्राम्यन्[४]नवन्तिपरिसरं[५] प्राप्तः । पटुपटहध्वनिमाकर्ण्य तं वृत्तान्तमवबुध्य च तं छुप्तवान्[६] । तेन समं स राजमन्दिरे समायातः । तस्मिन्नेवाष्टौ मुहूर्ते अहोरात्रप्रमिते राज्ये[७] सचिवैरभिषिक्तो दीर्घदर्शितयेति दध्यौ । यदस्य राज्यस्थं प्रबलः कोऽप्यसुरः सुरो वा क्रुद्धः सन्प्रतिदिनमेकैकं नृपं संहरति नृपाभावे देशविनाशं करोति । अतो भक्त्या वा शक्त्या[८] तदनुनयः समुचित इति नानाविधानि भक्ष्यभोज्यानि[९] निर्माप्य प्रदोषसमये चन्द्रशालायां सर्वमपि सज्जीकृत्य निशारात्रिकावसरानन्तरमङ्गरक्षैर्वृतस्तत्र भारशृङ्खलायां निहितपल्यङ्के निजपट्टदुकूलाच्छादितमुच्छीर्षकं नियोज्य स्वयं प्रदीपच्छायामाश्रित्य[१०] कृपाणपाणिर्धैर्यनिर्जितजगत्त्रयो दिगवलोकनपरो यावदास्ते तावन्महानिशीथसमये वातायनद्वारेण प्रथमं धूमं ततो ज्वाला ततः साक्षात्प्रेतपतिरूपमिव[११] करालं वेतालमालोकितवान् । स च बुभुक्षाक्षामकुक्षिस्तानि भोज्यानि यदृच्छयोपभुज्य गन्धद्रव्यैश्च स्वशरीरं विलिप्य ताम्बूलास्वादनेन परितुष्टस्तत्र पल्यङ्के समुपविश्य श्रीविक्रमं प्राह । रे मनुज अहमग्निवेतालनामा देवराजप्रतीहारतया प्रतीत प्रतिदिनमेकैकं नृपं निहन्मि । किं तु

---

१ शोकापनोदाय A B　२ किन्नमस्तदानीं सहजां A　३ व्रणरोपणम् A　४ परिभ्रमन् A B H　५ अवन्तिपरिसरे B D अवन्तिदेशपरिसरे A L　६ छुप्तवान् B　७ राज्ये B　८ यथाशक्त्या भक्त्या वा A B　९ खाद्यानि निर्माय C　१० माश्रित L　११ प्रेतप्रतिरूपमिव B

तवानया भक्त्या[1] प्रीणितेन मयाऽभयदानपूर्वं तव राज्यं प्रदत्तं परमेताव-[2]द्भक्ष्यभोज्यानि मम सदैवोपढौकनीयानि । इत्थमुभाभ्यामपि प्रतिपन्ने कियत्यपि गते काले श्रीविक्रमेण राज्ञा निजमायुः पृष्टः । नाहं वेद्मि किं तु स्वामिनं विज्ञाप्य[3] भवन्तं ज्ञापयिष्यामीत्युक्त्वा गतः । पुनरन्यस्यां निशि समेतो महेन्द्रेण संपूर्णशतायुरादिष्ट इति तं जगौ । स राज्ञा मित्रधर्ममधिकमधिरोप्येत्युपरुद्धो[4] यन्महेन्द्रपार्श्वादेकेन हायनेन हीन-[5]मधिकं वा वर्षशतं कारयेति । स तदङ्गीकृत्य भूयोऽभ्युपेतः सन्नित्युवाच । महेन्द्रेणापि न नवनवतिर्नैकोत्तरं वर्षशतं भवतीति[6] निर्णये ज्ञाते यावत्परस्मिन्दिने तद्योग्यं भक्ष्यभोज्यादिकं[7] निषिध्य नृपः संग्रामसज्जो भूत्वा निशि तस्थौ । तावत्तत्रैव पूर्वरीत्या समुपागतः[8] स तद्भोज्यादि-कमवीक्ष्य राजानमधिचिक्षेप । तयोश्चिरं द्वन्द्वयुद्धे जायमाने सुकृतसहायेन राज्ञा तं पृथ्वीतले पातयित्वा हृदि चरणमारोप्येष्टं दैवतं स्मरेत्यादिष्टः[9] स नृपं जगौ । अमुनाद्भुतसाहसेन[10] परितुष्टोऽस्मि यत्कृत्यादेशकारी अग्निवेतालनामाहं तव सिद्धः । एवं निष्कण्टकं तस्य राज्यमजनि । इत्थं तेन राज्ञा पराक्रमाक्रान्तदिग्वलयेन[11] षण्णवतिप्रतिनृपतिमण्डलानि स्वभोगमानिन्ये ।

३ *वन्यो हस्ती स्फटिकघटिते भित्तिभागे स्वबिम्बं

१ अत्यन्तभक्त्या A B H २ मेतद्भक्ष्य A B ३ विज्ञप्य भवन्त विज्ञपयिष्यामि A विज्ञापयिष्यामि P ४ अधिरोप्याप्रहान्महेन्द्र a अधि॰रोप्येत्युपरुध्य P A B ५ हीनं वर्षशतं A P ६ भवतीति कथितमिति निर्णये b H ७ भोजनादिकं A B भोज्यादिपाकं P ८ समुपागत. स नृपं जगौ P समुपागतः तद्भोज्यादि A B ९ आदिष्ट सन् अहो अस्य करिघटाविघट्टनैकपञ्चाननस्य मद्दत्साहसं यत्सत्त्वेन किं न ज्ञायते यतः—

सत्त्वैकतानवृत्तीना प्रतिज्ञातार्थकारिणा ।
प्रभविष्णुर्न देवोपि कि पुन प्राकृतो जन. ॥
एवं विमृश्य नृपं इत्यधिक पाठ A आदर्शे

१० तवाद्भुत A B ११ आक्रान्तमण्डलेन C * शार्ङ्गधरपद्धत्या (१२५०) कस्यापीति प्रदत्तोयं श्लोकः

दृष्ट्वा दूरात्प्रतिगज इति त्वद्द्विषां मन्दिरेषु ।
हत्वा कोपाद्गलितरदनस्तं पुनर्वीक्षमाणो
मन्दं मन्दं स्पृशति करिणीशङ्कया साहसाङ्कं[1] ॥

२ अवन्त्यां[2] पुरि श्रीविक्रमादित्यराज्ञः सुता प्रियङ्गुमञ्जरी । साध्ययनाय वररुचिनाम्ने[3] पण्डितस्य समर्पिता[4] सा प्राज्ञतया सर्वाणि शास्त्राणि तत्पार्श्वे कियद्भिर्वासरैरधीत्य यौवनभरे वर्तमाना जनकं नित्यमाराधयन्ती कदाचिद्वसन्तसमये प्रवर्त्तमाने गवाक्षे सुखासनासीना मध्यन्दिनप्रस्तावे ललाटन्तपे तपने पथि संचरन्तमुपाध्यायमालोक्य वातायनच्छायासु विश्रान्तं तमुवाच । परिपाकपेशलानि सहकारफलानि दर्शयन्ती तं तल्लोलुभमवबुध्यामूनि फलानि शीतलान्युष्णानि वा तुभ्यं रोचन्त इति तद्वचनचातुरीतत्त्वमनवबुध्य तान्युष्णान्येवाभिलषामीति तेनोक्ते तदुपढौकितवस्त्राञ्चले तिर्यग् तानि मुमोच । भूतलपाताद्रजोवगुण्ठितानि करतलाभ्यामादाय स्वमुखमारुतेन तद्रजोऽपनयन् राजकन्यया सोपहासमभिदधे । किमस्युष्णान्यमूनि वदनवातेन शिशिरीकुरुषे इति तस्याः सोपहासववसा सामर्ष. स द्विज. प्राह । रे विदग्धमानिनि गुरुवितर्कपराया भवत्याः पशुपाल एव पतिरस्तु । इति तच्छापं श्रुत्वा तयोक्तं यस्तव त्रैविद्यस्याप्यधिको विद्यया[5] परमगुरुस्तमेव विवाहयिष्यामीति सा प्रतिज्ञातवती । अथ श्रीविक्रमे तदुचितप्रवरवरचिन्तासमुद्रमग्ने स पण्डितः कदाचिदभिलषितवरनिवेदनोत्सुकीकृतराजशासनादरण्यानीमवगाहमानोऽतितृष्णातरलितं[6] सर्वतः सर्वतोमुखाभावात्[7]पशुपालमे-

१ साहसाङ्कः A D २ कालिदासाद्यैर्महाकविभिरित्थं संस्तूयमानश्चिरं प्राज्यं राज्य बुभुजे। साम्प्रतमवसरायाता श्रीकालिदासमहाकवेरुत्पत्तिं संक्षेपतो ब्रूम ॥ अवन्त्या A B ३ वेदगर्भनाम्न A B H ४ प्रदत्ता B ५ अधिको विद्यतया P अधिकविद्यया a मधिकविद्यतया A B H ६ अतितपातरलितः B ७ सर्वतो मुखाभावात P

कमालोक्य जलं याचितवान् । तेनापि जलाभावाद्दुग्धं पिबेत्युक्त्वा करवडीं[1] विधेहीत्यभिहिते सर्वेष्वभिधानेष्वभिधानमिदमश्रुतमाकर्ण्य चिन्ताचान्तस्वान्तः स्वहस्तं तन्मस्तके दत्त्वा महिष्यास्तले निवेश्य करवडीसञ्ज्ञां करतलयुगलयोजनां कारयित्वाकण्ठं पयः पायितः । स तं मस्तके हस्तदानात्करवडीविशेषशब्दज्ञापनाच्च गुरुप्रायं मन्यमानस्तस्याः समुचितपतिमवगम्य महिषीपरिहारार्थं निजं सौधमानीय षण्मासीं यावद्वपु पॅरिकर्मपूर्वं ॐ नमः शिवायेत्याशीर्वादाध्यापनं कारित. । षड्भिर्मासैस्तस्य तान्यक्षराणि कण्ठपीठस्थितान्यवगम्य शुभे मुहूर्ते कृतशृङ्गारः स. पण्डितेन नृपसभां नीतो नृपं प्रति सदभ्यस्तमाशीर्वादं सभाक्षोभवशादुशरटेत्यक्षरैर्जगौ । विसंस्थूलवचसा विस्मितस्य नृपतेरसतीं[5] तच्चातुरीमारोपयितुकामः पण्डितः प्राह ॥

४ उमया सहितो रुद्र शंकरः शूलपाणिभृत् ।
रक्षतु त्वां महीपाल टंकारबलगर्वितः[6] ॥

इति विदितेनै श्लोकेन तत्पाण्डित्यगम्भीरतां वचनविस्तरेण व्याख्यातवान् । तत्प्रत्ययप्रीतेन नृपतिना हि महिषीपालः स्वां पुत्रीं परिणायितः । पण्डितोपदिष्टं सर्वथा मौनमेवालम्ब्यमानो राजकन्यकया तद्वैदग्ध्यजिज्ञासया नवलिखितपुस्तकस्य शोधनायोपरुद्धः । करतले पुस्तकं विन्यस्य तदक्षराणि विन्दुमात्राररहितानि नखच्छेदिन्या[9] केवलान्येव कुर्वन् राजपुत्र्या मूर्खोयमिति निर्णीतः । ततः प्रभृति जामातृशुद्धिरिति सर्वतः प्रसिद्धिरभूत् । कदाचिच्चित्रभित्तौ महिषीनिवहे दर्शिते सति प्रमोदात्स्वप्रतिष्ठां विस्मृत्य तदाह्वानोचितानि विकृतिवचनान्युच्चरन्महि-

१ करचण्डीं A B २ अभिधानेष्विदं a ३ अश्रुतचर A अश्रुतपूर्वं B ४ वपु परिकर्मणासहपूर्वं A वपु परिकर्मणापूर्वं स्वस्तीत्याशीर्वादाध्यापनं B परिकर्मणापूर्वं a D ५ नृपतेर्मनसि तच्चातुरीं B ६ रक्षतात्त्व राजेन्द्र टणत्कारकरयशः A B L ७ निवेदितेन L ८ मेवावलम्ब्यमानो B ९ रहितानि केवलानि b मक्षरच्छेदिन्या a लेखिन्या D १० महिषीपाल एव L P

पीपाल इति तया निश्चिक्ये । स ता तदवज्ञामाकलय्य कालिका देवीं विद्वत्ताकृते आरराधं । पुत्रीवैधव्यभीतेन राज्ञा निशि च्छद्मना दासीं प्रहित्य तवाह तुष्टास्मीत्यभिधाय यावत्स उत्थाप्यते तावद्विल्लवभीता कालिकैव देवी प्रत्यक्षीभूय तमनुजग्राह । तद्वृत्तान्तावबोधात्प्रमुदितया राजकन्ययर तत्रागत्यास्ति कश्चिद्वाग्विशेष इत्यभिहिते स तदेव कालिदासनाम्ना प्रसिद्ध कुमारसभवप्रभृतिमहाकाव्यत्रय पट्प्रबन्धान् रचयामास । इति कालिदासोत्पत्तिप्रबन्ध ॥

३ अन्यदा तन्नगरवास्तव्यो दान्ताभिधानश्रेष्ठी सभासस्थित विक्रमार्कमुपायनपाणिरुपागत्य प्रणामपूर्वक विज्ञपयामास । स्वामिन्मया शुभे मुहूर्ते प्रधानवर्द्धकिभिर्धवलगृह कारित तत्र महतोत्सवेन प्रवेश कृत । यावदह तत्र निशीथे पल्यङ्कस्थित सुप्तजाग्रदवस्थया तिष्ठामि तावत्पतामीत्याकस्मिकीं गिर निशम्य भयभ्रान्तो मा पतेत्युदीरयस्तदैव पलायनमकार्ष । तस्य धवलगृहस्य सम्बन्धे नैमित्तिकै स्थपतिभिश्च यथावसरमहादानादिभि ॰ सत्कारैवृथादण्डित इत्यर्थे देव प्रमाण । तमुदन्त सम्यगवधार्य तदुक्त तद्धवलगृहमूल्य लक्षत्रय तस्मै प्रदाय सर्व्यासर्वावसरानन्तर तस्मिन्नात्मीयीकृते सौधे श्रीविक्रम सुख प्रसुप्त । तावेव पतामीति गिरमाकर्ण्यासमसाहसिकतया सत्वर पतेत्युदीरयन्समीपे पतित सुवर्णपुरुष प्राप । इत्थ सुवर्णपुरुषसिद्धि * ॥

---

१ आराधयितुमुपविष्ट न भुक्त दिनाष्टक जात पुत्री B २ कालिकानाम्नीं दासीं A B ३ महाकाव्यप्रभृतीन्पद्यबन्धान् H महाकाव्यप्रबन्धान् C कुमारसभवमेघदूतरघुप्रभृतीन् पट् प्रबन्धान् B ४ रचयामास ॥ इति कालिदास-प्रबन्ध ॥ A B इतिकालिदासोत्पत्तिप्रबन्ध इति वाक्य मुद्रिते नास्ति ५ अथान्यदा C अन्यदा तन्नगरवास्तव्यो दान्ताभिध H ६ स्थित पुरुषमेकमवलोक्य B ७ यथावसर महादानादिभि सत्कारैश्च वृथाह दण्डित ७ यथावसरमहीनादिभि P महेणादिभि A B ८ सन्ध्याया सर्वावसरानन्तर A B P * इय कथा सिंहासनद्वात्रिंशिकायामपि वर्तते

४ अथान्यस्मिन्नवसरे कश्चिद्विदेशपुरुषः करकृतलोहमयकूरातरदारिद्र्यपुत्रको द्वा:स्थनिवेदितो नृपं प्राह। स्वामिन्भवता नाथेन प्रथितायामवन्त्यां सर्वाण्यपि वस्तूनि सत्वरमत्र विक्रयं यान्ति लभ्यन्ते चेति प्रसिद्धिं बुद्ध्वा चतुरशीतिसंख्येषु चतु:पथेष्वहोरात्रं विक्रयाय दारिद्र्यपुत्रको भ्रामितोऽपि केनापि न गृहीतः। प्रत्युताह निर्भर्त्सित इति नगर्या यथावस्थितं कलङ्कं महाराज्ञे विज्ञप्य यथागतं व्रजामीत्यापृच्छन्नस्मि। तदैव तं महान्तं कलङ्कपङ्कं पुर्याः पर्यालोच्य दीनारलक्षं तस्मै प्रदाय नृपस्तं लोहपुत्रकं कोशे निवेशयामास। तस्यामेव निशि प्रथमयामे सुखसुप्तस्य राज्ञः समीपे गजाधिष्ठातृदैवतं द्वितीययामे हयाधिष्ठातृदैवतं तृतीययामे लक्ष्मीश्चाविर्भूय महाराज्ञा दारिद्र्यपुत्रके क्रीते नास्माकमिहावस्थातुमुचितमित्यापृच्छ्य राज्ञः साहसमङ्गो माभूदित्यनुज्ञातानि तानि जग्मुः। चतुर्थयामे तु कश्चिदुदारपुरुषो दिव्यतेजोमयमूर्तिः प्रादुर्भूयाहं सत्त्वनामा भवन्तमाभवं श्रितो गन्तुमापृच्छे इत्युदिते करतलेन नृपः कृपाणिकामादाय यावदात्मघाताय व्यवस्यति तावत्तेनैव करे गृहीत्वा तुष्टोऽस्मीत्यभिधाय स्खलितः। गजाद्यधिष्ठातृणि त्रीणि दैवतानि प्रत्यावृत्य नृपं प्रोचुः। गमनसंकेतव्याघातिना सत्त्वेन विप्रलब्धानां नृपं विहाय नास्माकं गमनमुचितमिति तान्यप्ययत्नं तस्थुः॥ इति विक्रमादित्यसत्त्वप्रबन्धः* ॥

५ अथान्यस्मिन्नवसरे सभास्थितं श्रीविक्रमं सामुद्रिकशास्त्रवेदी कश्चिद्वैदेशिको द्वा:स्थनिवेदितः प्रविश्य नृपलक्षणानि निरीक्षमाणः शिरोधूननपरो नृपेण स विषादकारणं पृष्ट ऊचे। यत्त्वां सर्वापलक्षणनिधिमपि षण्णवतिदेशसाम्राज्यलक्ष्मीं भुञ्जानमवेक्ष्य सामुद्रिकशास्त्रे निर्वेदपरोऽभवं। तत्किमपि कर्बुरान्त्रे न पश्यामि यत्प्रभावेण त्वमपि राज्यं करोषीति तद्वाक्यानन्तरं कृपाणिकामाकृष्य यावदुदरे निधत्ते तावत्तेन किमेतदिति पृष्ट-

१ दरिद्रपुत्रको P २ दरिद्रलोहपुत्रक H ३ राज्याधिष्ठातृ P ४ तान्य प्रयत्न तस्थु। * प्रबन्धोऽयं सिं द्वा. यामपि वर्तते ५ मादाय P

श्रीविक्रमः प्राह । उदरं विदार्य तव तद्विधमन्त्वं दर्शयिष्यामीति वदन्द्वात्रिंशतोऽधिकमिदं सत्वलक्षणं तव नावगतमिति पारितोषिकदानपूर्वकं नृपस्तं विससर्ज ॥ इति सत्त्वपरीक्षाप्रबन्धः ॥

६ अथ कस्मिंश्चिदवसरे परपुरप्रवेशविद्यया निराकृताः सर्वा अपि विफलाः कला इति निशम्य तदधिगमाय श्रीपर्वते भैरवानन्दयोगिन समीपे श्रीविक्रमस्तं चिरमाराध । तत्पूर्वसेवकेन केनापि द्विजातिना राज्ञोऽग्रे इति कथितं । यत्त्वया मां विहाय परपुरप्रवेशविद्या गुरोर्नादेया । इत्युपरुद्धो नृपो विद्यादानोद्यतं गुरुं विज्ञपयामास । यत्प्रथममस्मै द्विजाय विद्यां देहि पश्चान्मह्यं । हे राजन्नयं विद्यायाः सर्वथाऽनर्ह इति गुरुणोदिते भूयोभूयस्तव पश्चात्तापो भविष्यतीत्युपदिश्य नृपोपरोधाद्वेन विप्राय विद्या प्रदत्ता । ततः प्रत्यावृत्तौ द्वावप्युज्जयिनीं प्राप्य पट्टहस्तिविपत्तिविषण्णं राजलोकमालोक्य परपुरप्रवेशविद्यानुभवनिमित्तं च राजा निजगजशरीरे आत्मानं न्यवेशयत् । तद्यथा—

> ५ भूपः प्राहरिके द्विजे निजगजस्याङ्गेऽविशद्विद्यया
> विप्रो भूपवपुर्विवेश नृपतिः क्रीडाशुकोऽभूत्तत ।
> पल्लीगोत्रनिवेशितात्मनि नृपे व्यामृश्य देव्या मृतिं
> विप्रः कीरमजीवयन्निजतनुं श्रीविक्रमो लब्धवान् ॥
> इत्थं विक्रमार्कस्य परपुरप्रवेशविद्या सिद्धा ॥

७ अथान्यस्मिन्नवसरे श्रीविक्रमो राजपाटिकाया व्रजस्तन्नगरनिवा-

---

१ समाप्तिसूचकमिदं वाक्यं मु. पुस्तके नास्ति २ पुरप्रवेशविधया a b ३ विनाकृता a b ४ माराध्य C E ५ द्विजन्मनि A ६ पल्लीभृगनिवेशित B ७ अत्र निम्नावतारितः प्रबन्धोऽधिको दृश्यते B आदर्शे प्रथमावृत्तिपरिशिष्टे ३२८ पृष्ठे च ततोऽत्रोद्धृत । एकदा नृपो गुरुवन्दनाय गत. तत्र वृद्ध कमपि तपस्विन पठन्तं वन्दयामास तेन नाशीर्निगदिता पठनव्यग्रेण । राज्ञोक्त वृद्ध पठन् मुशलं पुष्पयिष्यसि । तदवगम्य तेन पठित्वा सूरिपदे प्राप्ते तस्यैव राज्ञः सदसि गत्वा मुशलमानाय्यालवालं विधाय श्रीऋषभदेवस्तवेन मुशल पुष्पयित्वा गत । तावता सिद्धसेनेनापि तदवगत्य वादाय पृष्ठे गतम् । परेण केतलारमग्राम व्रजन् वृद्धवादी दृष्टः वादं विधेहि । तेनोक्तं । पुरे गम्यते तत्र—

सिना श्रीसङ्घेनानुगम्यमान बन्दिवृन्दे श्रीसर्वज्ञपुत्र इति स्तूयमान श्रीसिद्धसेनाचार्यमागच्छन्तमवलोक्य सर्वज्ञपुत्र इति वचसा कुपित । तत्सर्वज्ञतापरीक्षार्थं तस्मै मानस नमस्कारमकरोत् ।

६ आसे दर्शनमागते दशशती सभापिते चायुत
यद्वाचा च हसेऽह्नमाशु भवता लक्षोऽस्य विश्राण्यताम् ।

–सभ्या भवन्ति । पुन प्रतिवादिनोचे । अत्रैव वाद । अमी गोपा सभ्या । तेन्याकारिता । प्रथम सिद्धसेनेनोपन्यासो विहितो गीर्वाणवाण्या । तदनु वृद्धवादिना गण्ठीयक बध्वा गोपकुण्डक विधाय प्रोचे ॥ नवि मारीयए नवि चोरीयए परदारागमण निवारीयए । थोवावि हु थोव दईयए इम सगि टगमगु जाईयए ॥ (पद्य मिदं प्रभावकचरिते (पृ १०२) श्रीवृद्धवादिप्रबन्ध श्लो १६१.) एव पठति गोपा नृत्यन्ति । तैरुक्तमनेन जित त्व किमपि न वेत्सि । ततो वृद्धवादिना पुरे गत्वा वादं विधाय जित शिष्यो बभूव । तत सिद्धसेनदिवाकरेण गुरुचरणसवाहना विधाय मानेन गुरव उक्ता । यदि यूयमादेश ददत तदाहमागम सस्कृतेन करोमि, गुरुभिरुक्त । त्व महत्पापमजनि त्व गुणगच्छयोग्यो न गच्छे । तेनोक्त, प्रायश्चित्त ददत । गुरुभिरुक्त । यत्र जिनधर्मो न तत्र जिनप्रभावना विधाय पुन समागन्तव्य मित्यवधूतवेषेण चलित । द्वादशवर्षाणि यावदन्यत्र परिभ्रम्य तदनन्तर मालवके गूढमहाकालप्रासादे शिवाभिमुख चरणौ कृत्वा चरणत्राणौ द्वारकाष्ठे नियोज्य सुप्त । तत्र वारितोपि तथैव । अत्रान्तरे राज्ञा रक्षिकपुरुषान् प्रेषयित्वोपद्रुत । तावतान्त पुरे रवप्रदीपन लब्ध, राज्ञा समागत्य पृष्ट । कथ शिवस्य न नमस्कार विदधासि । तेनोक्त मम नमोऽसौ न सहते । विधेहि । तेन सकललोकसमक्षम्—

प्रशान्त दर्शन यस्य सर्वभूताभयप्रदम् ।
माङ्गल्य च प्रशस्त च शिवस्तेन विभाव्यते ॥ १ ॥

इति द्वात्रिंशद्द्वात्रिंशतिका कृता, तदा लिङ्गमध्यादवन्तिसुकुमालद्वात्रिंशत्पत्नीकारितप्रासादे श्रीपार्श्वनाथबिम्ब प्रकटीभूत नमस्कृत च । असौ सहते नमस्कार तदाप्रभृति गूढमहाकालोऽजनि । राजा विक्रमार्क परमजैनोऽभूत् । सिद्धसेनोऽपि स्वगुरुपार्श्वे समेत्य सूरिमन्त्र प्राप्यैकदोज्जयिन्यामेव चातुर्मासक स्थित ॥

१ वन्दिपुत्रे A P २ आन्ते दर्शनमिति पद्य A B L H पुस्तकेषु नास्ति किन्तु जैनसिंहासनद्वात्रिंशिकायामुपलभ्यते

निष्काणां परितोषके मम सदा कोटीर्मदाज्ञा परा
कोशाधीश सदेति विक्रमनृपश्चक्रे वदान्यस्थितिम् ॥

सिद्धसेनोऽपि पूर्वगतश्रुतबलेन नृपभावमवगम्य दक्षिणपाणिमुदस्य धर्मलाभाशिषं ददौ। नृपतिनाशीर्वादहेतुं पृष्टः सन्महर्षिस्तव मानसनमस्कारस्याशीर्वादः प्रदीयमानोऽस्तीत्यभिहिते तज्ज्ञानचमत्कृतेन राज्ञा तत्पारितोषिके सुवर्णकोटिर्व्यतीर्यत ॥

८ अथान्यस्मिन्नवसरे राज्ञा कोशाध्यक्षस्तस्मै दापितसुवर्णवृत्तान्तं पृष्टः प्राह । यद्धर्मवहिकायां श्लोकबन्धेन मया सुवर्णदानं निहितम् । तथाहि—

७ धर्मलाभ इति प्रोक्ते दूरादुच्छ्रितपाणये ।
सूरये सिद्धसेनाय ददौ कोटिं नराधिपः ॥

ततः श्रीसिद्धसेनसूरीन्समायामाकार्य तत्सुवर्णं गृह्यतामिति प्रोक्ते वृथा तृप्तस्य भोजनमित्युच्चारपुरःसरमनेन सुवर्णेन ऋणग्रस्तामवनीमनृणीं कुरु इत्युपदिष्टे तत्सन्तोषपरितुष्टेन राज्ञा तदङ्गीकृतम् ।

८ दिदृक्षुर्भिक्षुरायातस्तिष्ठति द्वारि वारितः ।
हस्तन्यस्तचतुःश्लोको यद्वागच्छतु गच्छतु ॥ १ ॥

९ दीयन्तां दशलक्षाणि शासनानि चतुर्दश ।
हस्तन्यस्तचतुःश्लोको यद्वागच्छतु गच्छतु ॥ २ ॥

१० सर्वदा सर्वदोऽसीति मिथ्या संस्तूयसे बुधैः ।
नारयो लेभिरे पृष्ठिं न वक्षः परयोषितः ॥ ३ ॥

---

१ पूर्वगतबलेन P २ पद्यमिदं जैनसिंहासनद्वात्रिंशिकायां प्रभावकचरिते श्रीवृद्धवादिप्रबन्धे (श्लो ६४) च वर्तते. कथावल्यां च पद्यस्यास्य प्राकृतरूपं दृश्यते (अपभ्रंशकाव्यत्रयी पृ.७४ टि. १) ३ धराधिपः B H ४ वृथा भुक्तस्य A B ५ पद्यानि इत आरभ्य 'अष्टौ' पर्यन्तानि न सन्ति A B H पुस्तकेषु

८,१०,१२, पद्यानि प्रभावकचरिते श्रीवृद्धवादिप्रबन्धे वर्तन्ते। तान्येव १४ च भोजप्रबन्धेऽपि । १०,११,१२,१३,१४, पद्यानि सुभाषितावल्यां (२४५२,

११ सरस्वती स्थिता वक्त्रे लक्ष्मी करसरोरुहे ।
कीर्ति किं कुपिता राजन् येन देशान्तरं गता ॥ ४ ॥

१२ अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुत ।
मार्गणौघ समभ्येति गुणो याति दिगन्तरम् ॥ ५ ॥

१३ आहते तव नि स्वाने स्फुटितं रिपुहृद्घटै. ।
गलिते तत्प्रियानेत्रे राजश्चित्रमिदं महत् ॥ ६ ॥

१४ वक्त्राम्भोजे सरस्वत्यधिवसति सदा शोण एवाधरस्ते
बाहु काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्र ।
वाहिन्य पार्श्वमेता क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्ण
स्वच्छेऽन्तर्मानसेऽस्मिन्कथमवनिपते तेऽम्बुपानाभिलाष ॥ ७ ॥

१५ अट्ठो॰ ॥ ८ ॥

९ तस्यामेव निशि नृपो वीरचर्यायां पुरि भ्रमन् भूयो भूयस्तैलिक-मुखेन पठ्यमानमिदमश्रौषीत् ।

१६ अम्मीणओ सन्देसडओ तारय कन्ह कहिज्ज ।

प्रभातशेषा रजनीमिवधीकृत्य तदुत्तरार्द्धमशृण्वन्निर्विण्णो नृप साध प्राप्य निद्रामकरोत् । प्रत्यूषकालेऽवसरकृत्यानन्तरं नृपेण तत्राहूतस्तैलिकस्तदुत्तरार्द्धं पृष्ट ।

जग दालिद्दिहि डुब्बिउ बलिबन्धण ह मुइज्ज ॥

२४८३, २४५५, २४५४,२५९२, एवक्रमत) प्रदत्तानि । ८,९,१०,११,१२,१३, जैनसिंहासनद्वात्रिंशिकायामपि । १०,११ शार्ङ्गधरपद्धत्यामपि १४ बाणस्यैवमु ल्लिख्य सुभाषितावल्या हरिश्चन्द्रस्येति च सदुक्तिकर्णामृते । एतत्पद्य हेमचन्द्ररचिते काव्यानुशासनेऽपि वर्तते

१ अयमत्र सपूर्णोऽस्ति अत्र मु पुस्तके प्राकृतगाथाधिक्येका वर्तते परं त्व- सबद्धत्वादश्लीलत्वाच्च त्यक्ता २ दालिद्दिहि दुत्थियउ a G दालिद्दिहि दुच्छिउं D

श्रीसिद्धसेनोपदेशं पुनरुक्तं निर्णीय पृथिवीमनृणां कर्तुमारेभे[1] ॥

१० अथ मत्सदृशः कोपि जैनो नृपतिर्भावीति पृष्टे श्रीसिद्धसेनसूरिभिरभिदधे—

१७ पुन्ने[2] वाससहस्से सयम्मि वरिसाण नवनवइ अहिए ।
होही कुमरनरिन्दो तुह विक्कमराय सारित्थो ॥

११ अथान्यस्मिन्नवसरे जगत्यनृणीक्रियमाणे निजौदार्यगुणे नाहंकृतिं दधान प्रातः कीर्तिस्तम्भं कारयिष्यामीति चिन्तयंस्तस्मिन्नेव निशीथे वीरचर्यया चतुष्पथान्त परिभ्रमन् युद्ध्यमानवृषभभ्रंशत्रासित कस्यापि दारिद्र्योपद्रुतद्विजन्मनो जीर्णवृषभकुटीस्तम्भमध्यारुढो यावत्तिष्ठति ताव-

---

१ अत्र नृपतिमनोनुसारी पृथ्वीरसप्रबन्धोधिको दृश्यते B आदर्शे मुद्रितपुस्तके ३२० पृष्टे च ततश्चोद्धृतः—उज्जयिन्या राजा विक्रमादित्यो भट्टमात्रेण समं महाकाले नाटकालोकनार्थं गुप्तवेषो गतः। कालान्तरितेन नागरिकसुतेन कार्यमाणे नाटके सूत्रधारमुखात्तद्वर्णनं श्रुत्वा राजापि नागरिकद्रव्यग्रहणाय मनसि लोभं कृतवान्। पश्चात्कियत्कालमतिक्रम्य तृषितो मुख्यवेश्यागृहे भट्टमात्रपार्श्वात्पानीयं याचितवान्। तत्र वृद्धवेश्या प्रधानान् पुरुषान् भणित्वा तन्निमित्तमिक्षुरसमादातुमुपवने गता। शूलकैरिक्षुदण्डान् भित्त्वा तयार्धघटेऽप्यसंभृते दुर्मनस्का करकं भृत्वा वेल्यविलम्बेनागता राज्ञा इक्षुरसे पीते भट्टमात्रेण वेलाविलम्बदौर्मनस्यकारणं पृष्टा जगाद। अन्यदिने एकेन निर्भिन्नेक्षुदण्डेन सकरको घटो भ्रियते। अद्य घटोपि न सपूरितः। तत्कारणं न ज्ञायते। भट्टमात्रेण (पुनः) पृष्ट यूयमेव परिणतमतयस्तत्तत्कारणं जानीत ततो विचार्य निवेदयन्तु। वेश्यापि वदति। पृथ्वीपतेर्मन प्रजासु विरुद्धं जात तत पृथ्वीरसोऽपि क्षीणो जात। इति कारण निवेदितवती। राजापि तद्बुद्धिकौशलाच्चमत्कृत। स्वभुवनशयनीये सुप्त इति चिन्तितवान्। अकृतेऽपि प्रजापीडने विरुद्धचिन्तामात्रेणापि पृथ्वीरसहानिर्जाता अत प्रजा न पीडयिष्यामीति कृतनिश्चयो नृप इति परीक्षणार्थं द्वितीयाया निशाया तृपामिषात्तद्गृहे गत्वा शीघ्रमेव सर्पया तयानीतमिक्षुरसं पीत्वा शयनीये सुप्तवान्। वेश्यापि भट्टमात्रपृष्टा राज्ञ प्रजासु हृष्ट मनो निवेदितवती। राज्ञापि आत्मनिशावृत्तान्त निवेद्य पुनरपि तस्यै वृद्धवेश्यायै परचित्तोपलक्षणतुष्टेन हारो दत्त.। इति नृपतिमनोनुसारी पृथ्वीरसप्रबन्ध ॥ २ पुण्णे

चावेव वृषौ शृङ्गाग्रेण तं स्तम्भं भूयो भूयस्ताडयतः[1] । अत्रान्तरे स विप्रोऽकस्मान्निद्राभङ्गमासाद्याकाशे शुक्रगुरुभ्यां निरुद्धं चन्द्रमण्डलमवलोक्य गृहिणीमुत्थाप्य चन्द्रमण्डलसूचितं तन्नृपतेः प्राणसङ्कटमवगम्य होतव्यद्रव्याणि तदुपशान्तये होमार्थमुपढौकयेति सावधानं नृपे शृण्वति स गृहिण्योचे । अयं नृपः पृथिवीमनृणां कुर्वन्मम कन्यासप्तकस्य विवाहाय द्रव्यमयच्छन्न्शान्तिकर्मणा कथं व्यसनान्मोचयितुमुचित इति तद्वचसा सर्वथा परिहृतगर्वस्तत्सङ्कटाच्छुट्टितः कीर्त्तिस्तम्भं[2] विस्मरन् राज्यं चिरं चकार* ॥

---

१ ताडयतः । उपरि च फणी पुच्छावलम्बेनाधोभूय कुसुमगन्धिनृपशिरसि दंशाय पुनः पुनः फूत्कुर्वेति । अत्रान्तरे B २ कीर्तिस्तम्भवार्तां H

* चकारः—

स्वच्छं सज्जनचित्तवल्लघुतरं दीनार्थिवच्छीतलं
पुत्रालिङ्गनवत्तथा च मधुरं बालस्य संजल्पवत् ।
एलोशीरलवङ्गचन्दनलसत्कर्पूरपालीमिल-
त्पाटल्युत्पलकेतकीसुरभितं पानीयमानीयताम् ॥ १ ॥
यदा जीवश्च शुक्रश्च परितश्चन्द्रमण्डलम् ।
परिवेष्टयतस्तद्वै राजा कष्टेन जीवति ॥ २ ॥
इति विक्रमार्कस्य निर्गर्वताप्रबन्धः ॥

अथान्यस्या निशि (इत्यादि भोजवृत्तान्ते द्रष्टव्यं, तत्रायं विशेषः) एका रजकी राज्ञा पृष्टा । वस्त्राणि विरूपाणि कथं ससैकतानि । तयोक्तं—

यासौ दक्षिणदक्षिणार्णववधूरेखाप्रतिस्पर्द्धिनी
गोविन्दप्रियगोकुलाकुलतटी गोदावरी विश्रुता ।
तस्या देव गतेऽपि मेघसमये स्वच्छं न जातं जलं
त्वद्दण्डद्विरदेन्द्रदन्तमुशलप्रक्षोभितैः पांशुभिः ॥ १ ॥
रजकवधूवचनमिदं श्रुत्वा नरनाथनायकः स ददौ ।
स्वाङ्गपृष्टकसहितं लक्षं भ्रूक्षेपमात्रेण ॥ २ ॥
चौरमागधविप्रेभ्यो रजक्यै कविताश्रुतौ ।
चातुः प्रहरिकं दानं दत्तं विक्रमभूभुजा ॥ ३ ॥

इत्यधिकौ प्रबन्धौ B आदर्शे मुद्रितपुस्तके च परिशिष्टे ३३२ पृष्ठे प्रदत्तौ

१८ कट्ठं काउं मुकं च साहसं मइलिअं च अप्पाणं ।
अजरामरं न पत्तं हा विक्रम हारिओ जम्मो ॥

१२ कदाचिदायुःप्रान्ते केनाप्यायुर्वेदविदा श्रीविक्रमस्य वपुरपाटवे वायसपिशिताहारेण रोगशान्तिर्भवतीत्युपदिष्टे नृपेण तस्मिन्पाके कार्यमाणे-प्रकृतिव्यत्ययं विमृश्य नृप इति ज्ञापितः। साम्प्रतं धर्मौषधमेव बलवत्। प्रकृतेर्विकृतिरुत्पातः। जीवितलोलुपतया लोकोत्तरां सत्वप्रकृतिमपहाय काकमांसमभिलषन्सर्वथा न जीवसीति वैद्येनाभिहितस्तं पारितोषिकदान-पूर्वं परमार्थबान्धवमिति श्लाघमानो गजतुरगकोशादिसर्वस्वमार्थिभ्यो वितीर्य राजलोकं नगरलोकमापृछ्य विजने कापि धवलगृहप्रदेशे तत्कालो-चितस्नानदानदेवार्चनपूर्वं दर्भसंस्तराधिरूढो ब्रह्मद्वारेण प्राणोत्क्रान्तिं करिष्यामीति विमृशन्नकस्मादाविर्भूतमप्सरोगणं स ददर्श। अञ्जलिं बद्ध्वा प्रणामपूर्वं का यूयमिति पृष्टे। न वाग्विस्तरार्होऽयमवसर। आपृच्छना-यैव वयमुपागता इत्यभिधायाप्सरसोऽपसरन्त्यो नृपेण भूयोऽभिदधिरे। नवीनब्रह्मणा निर्मितानां भवतीनामद्वैतरूपवतीनामेकमेवं रूपं नासया हीनमिति जिज्ञासुरस्मि। अथ ताः सहस्ततालं विहस्य निजमपराधमस्मासु संभावयसीति ता मौनमाश्रिता नृपेणोचिरे। स्वर्गलोकस्थितासु भवतीषु ममापराधः कथं संभाव्यत इति नृपवचःप्रान्ते तासां मुख्यया सुमुख्या-चचक्षे। राजन्प्राग्पुण्योदयेन साम्प्रतं नवापि निधयस्तव सौधेऽवतेरुस्तद-धिष्ठात्र्यो वयं। भवता देवतारूपेणाजन्मावधि महादानानि ददतैकस्यैव निधेरेतावदेव व्यवकलितं यावत्त्वं नासाग्रं न पश्यसि। इत्थं तदुक्तिमा-कर्ण्य ललाटं करतलेन स्पृशन् यद्यह नवनिधीन्वेद्मि तदा नवभ्यः पुरुषे-

१ म्लानदान P २ रूपवतीनामेव P ३ ता दत्तहस्त A B ता दत्त-स्वहस्त H ३ निजमेवापराधं A B ४ तासु मुख्यया P ताभ्यो मुख्यया B ५ नवनिधीनवतीर्णान्वेद्मि A B H

भ्यस्तान्समर्पयामीति दैवेनाज्ञानभावाद्वञ्चित इत्युच्चरंस्ताभिः कलौ भवानेवोदार इति प्रतिबोधितः परलोकमाप। ततः प्रभृति तस्य विक्रमादित्यस्य जगत्यामधुनापि संवत्सरः प्रवर्त्तते ॥ श्रीविक्रमार्कस्य दाने विविधाः प्रबन्धाः॰॥

---

२ अथ शालिवाहनप्रबन्धः ॥

१३ अथ दाने विद्वत्तायां च श्रीशातवाहनकथा यथाश्रुता ज्ञेया। तत्पूर्वभवकथा चैवं। श्रीप्रतिष्ठानपुरे[२] शातवाहनभूपो राजपाटिकायां गच्छन्नगरप्रत्यासन्ननद्यां वीचिभिर्नीरतीरक्षिप्तं मत्स्यमेकं हसन्तमालोक्य प्रकृतेर्विकृतिरुत्पात इति भयभ्रान्तो नृपः सर्वानेव विदग्धपुरुषान्सन्देहममुं पृच्छन्नुज्ञानसागरनामानं जैनमुनिं पप्रच्छ। ज्ञानातिशयेन तेन तत्पूर्वभवं विज्ञायेत्युपदिष्ट। यत्पुरातनभवे त्वमस्मिन्नेव पत्तने उच्छिन्नवंशः काष्ठभारवाहैकवृत्तिस्तस्यामेव नद्यां भोजनावसरे संनिहितशिलातले सक्तून्पयसालोडय नित्यमश्नासि। कस्मिंश्चित्प्यहनि जैनमुनिं मासोपवासपारणाहेतोः पुरो व्रजन्तमाहूय तं सक्तुपिण्डं तस्मै प्रादात्। तस्य पात्रदानस्यातिशयात्त्वं शातवाहननृपतिरासीः स मुनिर्देवो जातस्तद्देवताधिष्ठानवशात् काष्ठभारवाहिनो जीवं त्वां नृपतितयोपलक्ष्य प्रमोदाद्धसितवान्। तत्कथासंग्रहश्चैवं—

॰ वरिसाणि सयच्छक्क तिगसीगदाय जिणन्दवीरस्स। णिव्वाणं सम्पत्ते उव्वण्णो विक्कमो राउ ॥ निर्वाणं प्राप्तस्य जिनेन्द्रवीरस्य त्र्यशीत्यधिकषट्शतानि वर्षाणि गतानि तदा विक्रम उत्पन्नो राजा॥ इति जैनश्रुतपरम्परा टिप्पण्यां प्रथमावृत्तिसंशोधकेनोद्धृता॥

१ शातवाहनराजा प्रबन्धा लिख्यन्ते B २ प्रथमसंस्करणे प्रबन्धान्तरात्शालिवाहनकथा टिप्पण्यामुद्धृता पृ. २४–३१. ३ वृत्तिशब्दाग्रे– 'अहो कोपि दरिद्राणां दारिद्र्यव्याधिरद्भुतः। घृष्टिक्वाथेऽपि यः पीयमाने नक्षयभूरभूत् ॥ एषोऽधिकः श्लोकः B आदर्शे वर्तते ४ जैनमुनिं दृष्ट्वा पूर्वभवे मया कस्मैचिन्न ददे तस्येदं फलं यदुक्तं —रम्येषु वस्तुषु मनोहरतां गतेषु रे चित्त खेदमुपयासि कथं वृथा त्वं। पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ इत्थं चिन्तयित्वा मुनिमाकार्य तं सक्तुपिण्डं एव पाठ B आदर्शे ॰ शालिवाहननृपतिरासीः P

१९) मीनानने प्रहसिते भयमीतमाह श्रीसातवाहनमृपिर्भवतात्र नद्याम् ।
यत्सक्तुभिर्मुनिरकार्यत पारणं प्राक् दैवाद्द्रवन्तमुपलक्ष्य झषो जहास ॥

स श्रीसातवाहन पूर्वभववृत्तान्तं जातिस्मृत्या साक्षात्कृत्य ततः प्रभृति दानधर्ममाराधयन् सर्वेषां महाकवीना विदुषां च संग्रहपरः। चतसृभिः स्वर्णकोटीभिर्गाथाचतुष्टय क्रीत्वा सप्तशतीगाथाप्रमाणं शालिवाहनाभिधानं संग्रहगाथाकोशं शास्त्रं निर्माप्य नानावदातनिधिः सुचिरं राज्यं चकार । तद्गाथाचतुष्टयं बहुश्रुतेभ्यो ज्ञेयम् ॥

---

१ इय कथा इषत्प्रकारान्तरेण प्रबन्धकोशे दृश्यते २ गाथाकोशं K ३ प्रबन्धकोशेप्येवं कथितम् ४ तद्गाथाचतुष्टयमेतद्यथा इत्येवमुक्त्वा निम्नलिखिता दश गाथा a आदर्शे मुदित पुस्तके च प्रदत्ताः—

हारो वेणीदण्डो खड्डुग्गलियाइ तह य तालुत्ति ।
एयाइ नवरि सालाहणेण दहकोडि गहियाइ ॥ १ ॥
मग्ग चिय अलहन्तो हारो पीणुंनयाण थणयाण ।
उंत्रिम्बो भमइ उरे जउणानइफेणपुञ्जु व्व ॥ २ ॥
कसिणुज्जलो य रेहइ वेणीदण्डो नियम्बविम्बम्मि ।
तह सुन्दरि सुरयमहानिहाणरक्खाभुयङ्गु व्व ॥ ३ ॥
परिओसमुन्दराइं सुरए जायन्ति जाइ मुक्खाइं । ४
विरहाओ ताइ पियसहि खड्डुगलियाइ कोरन्ति ॥ ४ ॥
मा जाण कीर जह चञ्चुलालिय पडइ पक्कमाइन्दं ।
जरढत्तणदुल्लिय उब्भुयतालाहलं एयं ॥ ५ ॥
ताण पुरोयमरीढं कयलीथम्भाण सरिसपुरिसाण ।
जे अत्तणो विणास फलाइ दिन्ता न चिन्तन्ति ॥ ६ ॥
जइ सरणो तह मुक्के वि पायवे धरइ अणुदिण विञ्झो ।
उच्छंगवड्ढियं निग्गुणपि गरूया न छड्डन्ति ॥ ७ ॥
पडमो नेहाहारो तेहि निसिएहि तहं कहवि गहिऊ ।
पिच्छन्ति जं न अन्नं तच्चिय आजम्म भुञ्झारा ॥ ८ ॥

---

१ मग्गु b c २ पीणुण्ण आणयणआण b c ३ उन्त्रिम्भो a उव्विग्गो b c ४ परितोससुन्दराइ b सुरएसु रहन्ति जाइ सोक्खाइ ताइच्चिय उण विरहे C d ५ खण्डुग्गिआइ b खड्डुग्गिणिहाइ d ६ पडेइ पक्क b ७ उज्जुयतालाहल a ८ तहवि कहवि C ९ मुञ्जारो a b c

३ ॥ अथ शीलव्रते भूयराजप्रबन्धः ॥ तद्यथा—

१४ [1]षट्त्रिंशद्ग्रामलक्षप्रमिते कन्यकुब्जे[1] नगरे कल्याणकटके पानीयाधिकृतप्रियाभिलापव्यतिकराद्राजा भूयदेवो मालवके श्रीरुद्रमहाकालमाराध्य मालवकं तस्मै देवाय दत्त्वा स्वयं तापसोऽभूदिति सक्षेप ॥

४ [अथ वनराजादिचापोत्कटवंशः]

१५ तस्य कन्यकुब्जस्यैकदेशो गुर्जरधरित्री तस्यां गुर्जरभुवि वढीयाराभिधानदेशे पञ्चाशरग्रामे चापोत्कटवंश्य झोलिकासंस्थं बालकं वणनाम्नि[2] वृक्षे निधाय तन्मातेन्धनमवचिनोति । प्रस्तावात्तत्राथातैर्जैनाचार्यै

सयलजणाणन्दयरो मुक्कस्स वि एस परिमलो जस्स ।
तस्स नवसरसभावम्मि हुज्ज किं चन्दणदुमस्स ॥ ९ ॥
कयलिरू विज्झगिरी नेहाहारो य चन्दणदुमो य ।
एयाओ नवरि सालाहणेण नवकोडिगहियाओ ॥ १० ॥

[1] अय प्रबन्धो निम्नलिखितेन रूपेण B H K आदर्शेषु मुद्रितपुस्तके च परिशिष्टे ३३३ पृष्ठे दृश्यते—षट्त्रिंशद्ग्रामलक्षप्रमिते कन्यकुब्जदेशे कल्याणकटकनाम्नि राजधानीनगरे भूराज इति राजा राज्य कुर्वन् कस्मिंश्चित्प्रभातसमये राजा राजपाटिकाया सवरनेकस्मिन्सौधतले वातायनस्थिता कामपि मृगाक्षीं मृगयमाणो निजचित्तापहारापराधिनीं ता जिहीर्षुर्निज पानीयाद्यधिकृतपुरुष समादिदेश स च ता नृपसौधे समानीय कस्मिंश्चित्सङ्केतप्रदेशे स्थापयित्वा नृप विज्ञपयामास । नृपेण च तत्रागतेन बाहुदण्डे धृता सती भूपमवादीत् । स्वामिन् सर्वदेवतावतारस्य भवतो हन्त कोऽयं नीचनार्यामभिलाष । ततस्तद्वाक्यामृतेनेपच्छान्तकामानलो नृप· कासीति ता प्रोचे । तयाह दासीत्यभिहिते किं तथ्यमेतदिति नृपादेशात्प्रोभोदास पानीयाधिकृतस्तस्य पत्न्यह दासानुदासीति तद्वार्त्तयान्तश्चमत्कृतो नृपति सर्वथा विलीनकामार्तिं स्वा सुता मन्यमानो विससर्ज । तस्या वपुषि निजकरौ लग्नाविति विचिन्त्य तन्निग्रहवाञ्छया निशीथे निजैरेव यामिकैर्गवाक्षप्रविष्टनरकरभ्रान्त्या निजावेव भुजौ निग्राहयामास । अथ प्रत्यूषे तान्यामिकान् सचिवैर्निगृह्यमाणान्निवार्य मालवमण्डले महाकालदेवप्रासादे गत्वा स्वय देवमाराधयंस्तस्थौ । देवादेशाद्भुजद्वये लग्ने सति त कन्यकुब्जार्धमालवदेश सान्त पुर तस्मै देवाय दत्त्वा तद्रक्षाधिकृतान् परमारराजपुत्रान्नियोज्य स्वयमेव तापसीं दीक्षामङ्गीचक्रे । इति शीलव्रते भूयराजप्रबन्धः ।

[1] कन्यकुब्जदेशे कल्याणकटकनामनि राजधानीनगरे H [2] बाणनाम्नि A

श्रीशीलगुणसूरिनामभिरपराह्णेऽपि तस्य वृक्षस्य छायामनमन्तीमालोक्य झोलिकास्थितस्य तस्यैव बालकस्य पुण्यप्रभावोऽयमिति विमृश्य जिनशासनप्रभावकोऽयं भावीत्याशया वृत्तिदानपूर्वं तन्मातु: पार्श्वात्स बालो जगृहे । वीरमतीगणिन्यां स बाल परिपाल्यमानो गुरुभिर्दत्तवनराजाभिधानोऽष्टवार्षिको देवपूजाविनाशकारिणा मूषकाणां रक्षाधिकारे नियुक्तः । स तॉल्लोष्टैर्निघ्नन् गुरुभिर्निषिद्धोऽपि चतुर्थोपायसाध्यांस्तानेवं जगौ । तस्य जातके राजयोगमवधार्यायं महानृपतिर्भावीति निर्णीय स मातु पुन समर्पितो मात्रा समं कस्यामपि पल्लिभूमौ स्वमातुलस्य चौरवृत्त्या वर्तमानस्य सर्वत्र धाटीप्रपातमकरोत् ॥

१६ कदाचित् काकरग्रामे खात्रपातनपूर्वं कस्यापि व्यवहारिणो गृहे धन मुष्णन्दधिमाण्डे करे पतिते सत्यत्र भुक्तोऽहमिति विचिन्त्य तत्सर्वस्वं तत्रैव मुक्त्वा विनिर्ययौ । परस्मिन्नहनि तद्भगिन्या श्रीदेव्या निशि गुप्तवृत्त्या सहोदरवात्सल्यादाहूत । तया भोजनवस्त्रदानपूर्वकमुपकृतो मम पट्टाभिषेके भवत्यैव भगिन्या तिलकं विधेयमिति प्रतिपेदे ॥

१७ अथान्यस्मिन्नवसरे चरटवृत्त्या वर्तमानस्य चौरै काप्यरण्यप्रदेशे रुद्धो जर्म्बाभिधानो वणिग्त चौरत्रय दृष्ट्वा बाणपञ्चकमध्याद्बाणद्वय भङ्क्त्वा तै: पृष्टे इति प्राह भवत्त्रितयाधिक बाणद्वयं विफलमित्युक्ते तदुक्त चलवेध्य" बाणेनाहत्य तै परितुष्टैरात्मना सह नीतस्तद्योधविद्याचमत्कृतेन श्रीवनराजेन मम पट्टाभिषेके त्व महामात्यो भावीत्यादिश्य विसृष्ट ॥

---

१ शीलगणि A शील्गण B २ गणिना A K ३ प्रतिपाल्यमान B ४ बाणैर्निघ्नन् A B बाणेन a ताञ्छाणेननिघ्नन b c ५ पल्लीभूमौ a c

.. अत्र A आदर्शे निम्नलिखितमधिक-चौरस्वभावे स्म्रे न सुख कदाचिदपि । यत – नक्त दिवा न शयन प्रकटा न चर्या स्वैर न चानजलवस्त्रकलत्रभोग । शंकानुजादपि सुतादपि दारतोऽपि लोकस्तथापि कुरुते ननु चौर्यवृत्तिम् ॥ (पद्यमिद कविरामचन्द्रकृतकौमुदीमित्राणन्दनाटकस्थ अ. ७ श्लो. ३)

६ स्नानभोजनवस्त्रदानपूर्वक A B K भोजनवसुदानपूर्वक P ७ चौरवृत्त्या A ८ जाम्ब a ९ तेन पृष्ट b १० भवेत् b ११ चलवेध्य P १२ तद्योधृ A

१८ अथ कन्यकुब्जादायातपञ्चकुलेन तद्देशराज्ञः सुतायाः श्रीमहणिकाभिधानायाः कञ्चुकसम्बन्धे पितृप्रदत्तगूर्जरदेशस्योद्ग्राहणकहेतवे समागतेन सेलभृद्वनराजाभिधानश्चक्रे । षण्मासीं यावद्देशमुद्ग्राह्य चतुर्विंशतिसंख्यान् रूप्यकद्रम्मलक्षांस्तेजोजात्यांश्चतुःसहस्रसंख्यांस्तुरङ्गमान्गृहीत्वा पुनः स्वदेशं प्रति प्रस्थितं पञ्चकुलं सौराष्ट्राभिधानघाटे वनराजो निहत्य कस्मिन्नपि वननिकुञ्जे तद्राजभयाद्वर्षं यावद्दुस्थवृत्त्या तस्थौ ॥

१९ अथ निजराज्याभिषेकाय नगरनिवेशचिकीः शूरां भूमिमवलोकमानः पीपलुलातटागपाल्यां सुखनिषण्णेन भारुयाडसाखडसुतेनाणहिल्लनाम्ना पृष्टः । किमु विलोक्यते । नगरनिवेशयोग्या शूरा भूमिरवलोक्यते इति ते प्रधानैरभिहिते यदि तस्य नगरनिवेशस्य मम नाम दद्ध ततस्तां भुवमावेदयामीत्यभिधाय जालिवृक्षसमीपे गत्वा यावती भूः शशकेन श्वात्रासितस्तावतीं भुवं दर्शयामास । तत्राणहिल्लपुरनाम्ना नगरं निवेश्य संवत् ८०२ वर्षे वैशाखसुदि २ सोमे श्रीविक्रमार्कतस्तस्य जालितरोर्मूले धवलगृहं कारयित्वा राज्याभिषेकलग्ने काकरग्रामवास्तव्यां तां प्रतिपन्नभगिनीं श्रीदेवीमाहूय तया कृततिलकः श्रीवनराजो राज्याभिषेकं पञ्चाशद्वर्षदेश्यःकारयामास । स जम्बाभिधानो वणिग् महामात्यश्चक्रे । पञ्चासरग्रामतः श्रीशीलगुणसूरीन् सभक्तिकमानीय धवलगृहे निजसिंहासने निवेश्य कृतज्ञचूडामणितया सप्ताङ्गमपि राज्यं तेभ्यः समर्पयंस्तैर्निःस्पृहैर्भूयो निषिद्धः । प्रत्युपकारबुद्ध्या तदादेशाच्छ्रीपार्श्वनाथप्रतिमालंकृतं पञ्चासराभिधानं चैत्यं निजाराधकमूर्तिसमेतं च कारयामास । तथा तेन धवलगृहकण्ठे कण्ठेश्वरीप्रासादश्च कारितः ॥

---

१ तादृशराज्ञ P २ महणकाभिधानाया a b ३ स्योद्ग्राहणकसंबंधहेतवे B ४ सेलभृत A B ५ पारूपकद्रम्म B H ६ पञ्चकुलशब्दो हर्षचरिते प्राचीनोत्कीर्णलेखेषु च दृश्यते ७ राजधानीनगर B H ८ शशकेनोच्छासिता P ९ श्रियादेवीं P १० जाम्बाभिधान. a ११ धवलगृहे कण्ठेश्वरी A B K

२०) गूर्जराणामिदं राज्यं वनराजात्प्रभृत्यपि ।
जैनैस्तु स्थापितं मन्त्रैस्तद्द्वेषी नैव नन्दति ॥ १ ॥

२० पूर्वं निरुद्धं वर्षं[2] ५९ मास २ दिन २१ श्रीवनराजेन राज्यं कृतं। श्रीवनराजस्य सर्वायुर्वर्ष १०९ मास २ दिन २१। संवत् ८६२ वर्षे आषाढसुदि ३[3] गुरौ अश्विन्यां सिंहलग्ने वहमाने वनराजसुतस्य श्रीयोगराजस्य राज्याभिषेकस्तस्य त्रयः कुमाराः ॥

२१ अन्यस्मिन्नवसरे क्षेमराजनाम्ना कुमारेण राजेति विज्ञपयांचक्रे । देशान्तरीयस्य राज्ञः प्रवहणानि वात्यावर्त्तेन विपर्यस्तानि । अन्यवेलाकूलेभ्यः श्रीसोमेश्वरपत्तने समागतानि । ततस्तेषु तेजस्वितुरंगमसहस्रं तथा गजानां सार्द्धशती संख्यया[4] परवस्तूनि कोटिसंख्यया । एतावत्सर्वं निजदेशोपरि स्वदेशमध्ये भूत्वा संचरिष्यति । यदि स्वाम्यादिशति तदा तदानीयते इति विज्ञप्तेन राज्ञा तन्निषेधः कृत । तदनन्तरं तैस्त्रिभिः कुमारै राज्ञो वयोवृद्धभावाद्वैकल्यमाकल्य तस्यामपि स्वदेशप्रान्तभूमौ सैन्यं सज्जीकृत्याज्ञातचौरवृत्त्या तत्सर्वमाच्छिद्य स्वपितुरुपनिन्ये । अन्तः कुपितेन मौनावलम्बिना राज्ञा न किमपि तेषां प्रतिपत्त्यादि[5] कृतं । तत्सर्वं नृपतिसात्कृत्वा क्षेमराजकुमारेणैतत्कार्यं सुन्दरं कृतमसुन्दरं वेति विज्ञप्तो नृपतिर्बभाषे । यदि सुन्दरमुच्यते परस्वलुण्टनपातकं यद्यसुन्दरमभिधीयते तदा भवदीयचेतसो विरक्तिः । अतो मौनमेव श्रेय इति सिद्धं । श्रूयतां भवदीयप्रथमप्रश्ने परवित्तापत्तौ निषेधहेतुः । यदा परमण्डलेषु नृपतय सर्वेषामपि राज्ञां राज्यप्रशंसां कुर्वन्ति तदा गुर्जरदेशे चरटराज्यमित्युपहसन्ति । अस्मत्स्थानपुरुषैरित्यादिस्वरूपं[6] विज्ञप्तिकया ज्ञाप्यमानाः किञ्चिन्निजपूर्वजवैमनस्यमावहन्तो दूयामहे । यद्ययं पूर्वजकलङ्कः सर्वलोकहृदये विस्मृतिमावहति तदा समस्तराजपङ्क्तिषु वयमपि राजशब्दं लभामहे ।

१ तन नन्दति B H २ पूर्वं वर्षं ६० श्रीवनराजेन B संवत् ८०२ पूर्वं वर्षं ६० श्री वनराजेन राज्यं कृतं । संवत् ८६२ वर्षे श्रीयोगराजस्य राज्याभिषेक इत्येवं पाठ L आदर्शे. ३ शुद्ध १३ A B ४ सार्द्धघटासंख्ययारूप H सार्द्धशत b सिद्धघटा रू १८ b ५ प्रत्यादिष्टं B H ६ अस्मत्पुरुषैः P

घनलवलोलुभैर्भवद्भिः स पूर्वजकलङ्क उत्सृज्य[1] पुनर्नवीकृतः । तदनन्तरं राज्ञा शस्त्रागारान्निजं धनुरुपानीय यो भवत्सु बलवान् स इदमारोपयत्विति समादिष्टे सर्वाभिसारेण तन्नैकेनाप्यधिरोप्यत इति राज्ञा हेलयैवाधिज्यीकृत्याभिदधे[2]—

२१) आज्ञाभङ्गो नरेन्द्राणां वृत्तिच्छेदोऽनुजीविनाम्[3] ।
पृथक्शय्या च नारीणामशस्त्रो वध उच्यते ॥

इति नीतिशास्त्रोपदेशादस्माखशस्त्रवधकारिषु पुत्रेषु को दण्ड उचित । अतो राज्ञा प्रायोपवेशनपूर्वकं विंशत्यधिकवर्षशते पूर्णे चिताप्रवेशः कृतः । अनेन राज्ञा भट्टारिकाश्रीयोगीश्वरीप्रासादः कृतः ।

२२ अनेन राज्ञा वर्षाणि ३९ राज्यं कृतं । सं. ८९७ पूर्वं वर्षे २५ श्री क्षेमराजेन राज्यं कृतं । सं. ९२२ पूर्वं वर्षे २९ श्रीभूयडेन राज्यं कृतं । अनेन श्रीपत्तने श्रीभूयडेश्वरप्रासादः कारितः । सं. ९५१ पूर्वं श्रीवैरिसिंहेन (श्रीवीरसिंहेन B) वर्षाणि २५ राज्यं कृतं । सं. ९७६ पूर्वं वर्षे १५ श्री रत्नादित्येन राज्यं कृतं । स ९९१ पूर्वं वर्षाणि ७ श्रीसामन्तसिंहेन राज्यं कृतं । एवं चापोत्कटवंशे सप्त नृपतयोऽभूवन् विक्रमकालत. संख्यया वर्षाणि ९९८* ॥

---

१ उन्मृज्य a B H K २ वाधिज्यं विदधे H ३ द्विजन्मनाम् A B H ४ दानामङ्गात् a K

* मुद्रितपुस्तके a आदर्शानुसारी निम्नलिखित पाठ । संव० ८७८ श्रावणसुदि ४ निरुद्धं वर्षे १७ मास १ दिन १ श्रीयोगराजेन राज्यं कृतं ॥ सं० ८७८ । श्रावणसुदि ५ उत्तरापाढनक्षत्रे धनुर्लग्ने रत्नादित्यस्य राज्याभिषेको बभूव । सं० ८८१ कार्तिकसुदि ९ निरुद्ध वर्षं ३ मास ३ दिनान्यनेन राज्ञा राज्य चक्रे ॥ सं० ८९८ । वर्षे ज्येष्ठसुदि १३ शनौ हस्तनक्षत्रे सिंहलग्ने श्रीक्षेमराजदेवस्य राज्याभिषेकः समजनि । सं० ९२२ । भाद्रपदसुदि १५ रवौ वर्षं ३८ । मास ३ दिन १० अस्य राज्ञो राज्यनिबन्ध. । ५ । सं० ९३५ । वर्षे आश्विनसुदि १ सोमे रोहिणीनक्षत्रे कुम्भलग्ने श्रीचामुण्डराजदेवस्य पट्टाभिषेक. समजनि ॥ ६ ॥ स० ९३८ माघवदि [३ सोमे निरुद्धं वर्षे १३ । मास ४ दिन १६ अनेन राज्ञा राज्य विदधे ॥ स० ९३८] माघवदि १४ भौमे स्वातिनक्षत्रे सिंहलग्ने श्रीआकडदेवो राज्ये उपविष्टः । अनेन

५ [॥ अथ मूलराजप्रबन्धः ॥]

२२) असेव्या मातङ्गा परिगलितपक्षा शिखरिणो
जडप्रीति कूर्मो फणिपतिरयं च द्विरसन ।
इति ध्यातुर्धातुर्धरणिधृतये सान्ध्यचुलका—
त्समुत्तस्थौ कश्चिद्विलसदसिपट्ट सुसुभट ॥ इति ॥

२३ अथ पूर्वोक्तश्रीभूयडराजवशे मुञ्जालदेवसुता राजबीजदण्डकनामानस्त्रय सहोदरा यात्राया श्रीसोमनाथं नमस्कृत्य तत प्रत्यावृत्ता । श्रीसामन्तसिंहदेवनृप वाहकेल्यामवलोकमानास्तुरगस्य नृपेण कशाघाते दत्ते सति कार्पटिकवेषधारी राजनामा क्षत्रियोऽनवसरे दत्तेन तेन कशाघातेन पीडित शिर कम्पपूर्व हाहेति शब्दमवादीत् । राज्ञा तत्कारण पृष्ट स तुरङ्गमेन कृत गतिविशेष न्युञ्छनयोग्यमनवधार्य कशाघाते दीयमाने ममैव मर्माघात समजनि । तेन तद्वचसा चमत्कृतेन राज्ञा तुरङ्गो वाहनाय समर्पितस्तस्यैव । अश्वाश्ववारयोः सदृशयोर्गमालोक्य पदे पदे तयोर्न्युञ्छनानि कुर्वस्तेनैव तदाचारेण तस्य महत्कुलमाकलय्य लीलादेवीनाम्नीं स्वभगिनीं ददौ । आधानानन्तर कियत्यपि गते कालेऽकाण्डमरणे सजाते सचिवैरपत्यमरण पर्यालोच्य तदुदरविदारणपूर्वमपत्यमुद्धृत । मूलनक्षत्रजातत्वात्स श्रीमूलराजाभिधया समजनि । बालार्क इव तेजोमयत्वात्सर्ववल्लभतया पराक्रमेण मातुलमहीपाल प्रवर्द्धमानसाम्राज्य कुर्वन् मदमत्तेन श्रीसामन्तसिंहेन साम्राज्येऽभिषिच्यते

कच्चराया पूर्यामाक्कडेश्वरकण्टेश्वरीप्रासादौ कारितौ । स०९६५' पौषशुदि ९ बुधे निरुद्ध वर्ष २६' मास १ दिन २० राज्य कृत ॥ स०९९० ' पौषसुदि १० गुरौ आर्द्रानक्षत्रे कुम्भलग्ने भूयगडदेव पट्टे समुपविष्ट । अनेन राज्ञा भूयगडेश्वरप्रासाद कृत श्रीपत्तने प्राकारश्च स० ९९१' वर्षे आपाढसुदि १५ निरुद्ध वर्ष २७' मास ६ दिन ५ राज्य कृत एव चापोत्कटवशे पुरुषा ७ तद्वश १९० वर्ष मास २ दिनसप्त राज्य जात ॥

१ पूर्वोक्त श्रीभूयडराजवशे राजबीजदण्डनामानस्त्रय पुना सहोदरा यात्राया श्रीसोमनाथ नमस्कृत्य तत प्रत्यावृत्य श्रीमदणहिल्लपुरे श्रीसामन्तसिंहनृप वाहकेल्या A B H K २ भूयड a P ३ योग्यता L ४ श्री भूयडदेवेन a P

त्वमत्तेनोत्थाप्यते च तदादि चापोत्कटानां दानमुपहासप्रसिद्धम्। स इत्थमनुदिनं विडम्ब्यमानो निजपरिकरं सज्जीकृत्य विकलेन[*] मातुलेन स्थापितो राज्ये तं निहत्य सत्य एव भूपतिर्बभूव ॥ [1]सं० ९९८ वर्षे श्रीमूलराजस्य राज्याभिषेको निष्पन्नः ॥

२४ कस्मिन्नप्यवसरे सपादलक्षीयक्षितिपतिः श्रीमूलराजमभिषेणयितु गूर्जरदेशसंनिधौ समाजगाम । तद्योगपद्येन नरपतेस्तिलङ्गदेशीयराज्ञो बारपनामा सेनापतिरपाययौ। श्रीमूलराजेन तयोरेकस्मिन्विगृह्यमाणेऽपरः पार्ष्णिघातं कुरुत इति सचिवैः सह विमृशंस्तैरूचे। श्रीकन्थादुर्गे प्रविश्य कियन्त्यपि दिनान्यतिवाह्यन्ते । नवरात्रिकेषु समागतेषु सपादलक्षक्षितिपतिः स्वराजधान्यां शाकम्भर्यामेव स्वगोत्रजामाराधयिष्यति। तस्मिन्नवसरे श्रीबारपनामा सेनानीर्जीयते। तदनु क्रमतः सपादलक्षक्षोणीपतिरपीत्थं तदीये मन्त्रे श्रुते सति नृप प्राह। मम लोके पलायनापवाद कि न भविष्यतीत्यादिष्टे ते ऊचुः—

२३) यदपसरति मेष कारणं तत्प्रहर्तुं मृगपतिरपि कोपात्संकुचत्युत्पतिष्णुः। हृदयनिहितवैरा गूढमन्त्रप्रचाराः किमपि विगणयन्तो बुद्धिमन्तः सहन्ते॥

इति तद्वचसा श्रीमूलराज श्रीकन्थादुर्गे प्रविवेश । श्रीसपादलक्षीयभूपतिः श्रीगूर्जरदेशे वर्षाकालमतिक्रामन्नवरात्रेषु समागतेषु तस्यामेव कटकभूमौ शाकम्भरीनगरं निवेश्य तत्र गोत्रजामानीय तत्रैव नवरात्राणि प्रारेभे। श्रीमूलराजस्तत्स्वरूपमवगम्य निरुपायान्मन्त्रिणो ज्ञात्वा तत्कालोत्पन्नमतिवैभवो राजलाहणिकां प्रारभ्य राजादेशेन समस्तान्समन्तत.

१ सं. ९९३ वर्षे आषाढसुदि १५ गुरौ, अश्विनीनक्षत्रे सिंहलग्ने रात्रिप्रहरद्वयसमये जन्मत एकविंशतितमे वर्षे श्रीमूलराजस्य राज्याभिषेकः समजनि। इति मु पुस्तके पाठ ॥ २ मूलार्के श्रूयते शास्त्रे सर्वकल्याणकारक । अधुना मूलराजेन योगश्चित्रं प्रशस्यते ॥ इत्यादि स्तुतिभिः स्तूयमानः साम्राज्यं कुर्वनास्ते तस्मिन्नवसरे। A B M आदर्शेष्वेषपाठ (मूलार्के इत्यादि श्लोकः सिद्धहैमप्रशस्तिगतः श्लो. ९) ३ पराजेतुं A ४ देशसन्धौ P ५ बारवनामा P श्रीबारव P ६ रविकोपात्त a ७ प[illegible] पश्चात्ने दृश्यते ८ लिहिणिका a राजा लिहणिका P

सामन्तानाहूय कूटलेखव्ययकरणप्रतिबद्धपञ्चकुलमुखेन सर्वानपि राजपुत्रान्पदातींश्चान्वयावदाताभ्यामुपलक्ष्य यथोचितदानादिभिरावर्ज्य च समयसंकेतज्ञापनापूर्वं तान्सर्वान्सपादलक्षीयनृपतिशिबिरसंनिहितान्विधाय निर्णीते वासरे प्रधानकरभीमारुह्य तत्प्रतिपालकेन समं भूयसीमपि भुवमाक्रम्य प्रत्यूषकालेऽतर्कित एव सपादलक्षीयनृपतेः कटकं प्रविश्य करभ्या अवरुह्य कृपाणपाणिरेकाक्येव श्रीमूलराजस्तद्दौवारिकमभिहितवान् । साम्प्रतं नृपतेः कः समयः श्रीमूलराजो राजद्वारे प्रविशतीति स्वस्वामिने विज्ञापयेति वदंस्तं दोर्दण्डप्रहारेण द्वारदेशादपसार्यायं श्रीमूलराज एव द्वारे प्रविशतीति तस्मिन्नभिदधाने गुरूदरान्तः प्रविश्य तस्य राज्ञः पल्यङ्के स्वयं निषसाद । भयभ्रान्तः स राजा क्षणमेकं मौनमवलम्ब्येषत्साध्वसं विधूय भवानेव श्रीमूलराज इत्यभिहिते श्रीमूलराजः स्पष्टं जगौ ॐ इति । गिरमाकर्ण्य यावत्समयोचितं किंचिद्वक्ति तावत्पूर्वसंकेतितैस्तैश्चतुःसहस्रप्रमितैः पत्तिभिः स गुरूदरः परिवेष्टयांचक्रे । अथ मूलराजेन स नृप इत्यभिदधे । अस्मिन्भूवलये नृपति समरवीर समरे यो मम सम्मुखस्तिष्ठति स कोऽपि नास्त्यस्ति वेति मम विमृशतस्त्वमुपयाचितैरुपस्थितोऽसि । परमशनावसरे मक्षिकासन्निपात इव तिलङ्गदेशीयतैलपाभिधानराज्ञः सेनापतिं मज्जयुद्धे समागतं यावच्छिक्षयामि तावत्त्वया पार्ष्णिघातादिव्यापाररहितेन स्थातव्यमिति त्वामुपरोद्धुमहमागतोऽस्मि । मूलराजेनेत्यभिहिते भूपतिरेवमवादीत् । यत्त्व नृपतिरपि सामान्यपत्तिरिव जीवितनिरपेक्षतयेत्थं वैरिगृहे एक एव प्रविशसि तेन त्वया सार्धमाजीवितान्तमेव मे सन्धिः । तेन राज्ञेत्युदिते मा मैवं वदेति तं निवारयंस्तेन भोजनाय निमन्त्रितोऽवज्ञया तं निषिध्य त्वरे तरवारिमादायोत्थित । तां करभीमारुह्य तेन स्कन्धावारेण परिवेष्टितो चारप-

१ सामन्तानांकार्यं क्षणलेखेन व्ययकरण B H K २ ज्ञापनपूर्वं A ज्ञापनपूर्वकं H ३ प्रदोषकाले A H ४ करभ्यामेव C d करभ्यामवरुह्य b ५ मुपयाचितशतै A B H ६ प्रविश्य B ७ त्वरया P

सेनापतिकटके पतित । त निहत्य दशसहस्रसख्यास्तद्वाजिनोऽष्टादश-गजरूपाणि चादाय यावदावासान् दत्ते तावत्प्रणिधिभिरस्मिन्वृत्तान्ते ज्ञापिते सपादलक्षे पलायाचक्रे ॥

२७ तेन राज्ञा श्रीपत्तने श्रीमूलराजवसहिका कारिता । श्रीमूलदेवस्वामिन प्रासादश्च । तथा नित्य नित्य सोमवासरे श्रीसोमेश्वरपत्तने यात्राया शिवभक्त्यो व्रजस्तद्भक्तिपरितुष्ट सोमनाथ उपदेशदानपूर्वं मण्डलीनगरमार्गंत । तेन राज्ञा तत्र मूलेश्वर इति प्रासाद कारित । तत्र नर्मश्चिकीर्षाहर्षेण प्रतिदिनमागच्छतस्तस्य तद्भक्तिपरितुष्ट श्रीसोमेश्वर ससागर एव भवन्नगरे समेष्यामीत्यभिधाय श्रीमदणहिल्लपुरेऽवतारमकरोत् । समागतसागरसङ्केतेन सर्वेष्वपि जलाशयेषु सर्वाण्यपि वारीणि क्षाराण्यभवन् । तेन राज्ञा तत्र त्रिपुरुषप्रासाद कारित । अथ तस्य चिन्तायकमुचित तपस्विन कञ्चिदालोकमान सरस्वतीसरित्तीरे एकान्तरोपवासपारणकेऽनिर्दिष्टपञ्चग्रासभिक्षाहार कन्थडिनामान स तपस्विनमश्रौषीत् । यावत्तन्नमस्याहेतवे नृपतिस्तत्र प्रयाति तावत्तेन तृतीयज्वरिणा स ज्वर कन्थाया नियोजित इति नृपतिरालोक्य तेन राज्ञा कथ कन्था कम्पते इति पृष्टो नृपेण सह वार्ता कर्तुमक्षमतयेह ज्वर आरोपित इत्यभिहिते पार्थिव प्राह । यद्येतावती शक्तिर्भवतस्तदा ज्वर किं न सर्वथा मुच्यते इति राजादेशे—

२४) उपतिष्ठन्तु मे रोगा ये केचित्पूर्वसंचिता ।
आनृण्ये गन्तुमिच्छामि तच्छम्भो परम पदम् ॥

इति शिवपुराणोक्तान्यधीयन्नभुक्त कर्म न क्षीयते इति जानन् कथममु विसृजामीति तेनाभिहिते त्रिपुरुषधर्मस्थानस्य चिन्तायकत्वाय नृपतिरभ्यर्थयामास ।

---

१ सपादलक्षनृपति B H २ मङ्गाल देव a P ३ श्रीपत्तने P ४ शिवभक्तया B H ५ मुपागत B ६ कान्थडि B H ७ आनण्य B

८ नाभुक्त क्षीयते कर्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्य कृत कर्म शुभाशुभम् ॥
इति सर्पूर्ण श्लोक K आदर्शे

२९) अधिकारात्त्रिभिर्मासैर्मठापत्यात्त्रिभिर्दिनैः ।
शीघ्रं नरकवाञ्छा चेद्दिनमेकं पुरोहितः ॥

इति स्मृतिवाक्यं जानंस्तपउडुपेन संसारसागरमुत्तीर्य गोष्पदे निमज्जामि किमिति वचसा निषिद्धो नृपस्ताम्रशासनं मण्डकवेष्टितं निर्माय तस्मै भिक्षागताय पत्रपुटे मोचयामास । स तदजानंस्ततः प्रत्यावृत्तः । पुरा दत्तमार्गोऽपि सरस्वत्याः पूरे तदा न दीयमानमार्गः आजन्म निजदूषणानि विमृशंस्तात्कालिकभिक्षादोषपरिज्ञानाय यावद्विलोकते तावत्ताम्रशासनं ददर्श । तदनु क्रुद्धं तपोधनं विज्ञाय तत्रागत्य नृपस्तत्सान्त्वनाय यावद्विनयवाक्यानि ब्रूते तावत्तेन मया दक्षिणपाणिना गृहीतं भवत्ताम्रशासनं कथं वृथा भवतीति वयजल्लदेवनामा निजविनेयो नृपाय समर्पितः । तेन वयजल्लदेवेन प्रतिदिनमङ्गोद्वर्तनाय जात्यघुसृणस्याष्टौ पलानि मृगमदपलचतुष्टयं कर्पूरपलमेकं द्वात्रिंशद्वाराङ्गना ग्रामसहितं सितातपत्रं च यदा ददासि तदा चिन्तायकत्वमङ्गीकारोमीत्यभिहिते राज्ञा तत्सर्वं प्रतिपद्य त्रिपुरुषधर्मस्थाने तपस्विभूपपदे सोऽभिषिक्तः । ककरोलं इति प्रसिद्धः । इत्थं भोगान् भुञ्जानोऽप्यजिह्मब्रह्मचर्यनिरतः । स कदाचिन्निशि मूलराजपत्न्या परीक्षितुमारब्धः । ताम्बूलप्रहारेण कुष्ठिनीं विधाय पुनरनुनीतो निजोद्वर्तनविलेपनात्स्नानोत्सृष्टपयःप्रक्षालनाच्च सज्जीचकार ॥

६ ॥ अथात्रैव लाखाकोत्पत्तिविपत्तिप्रबन्धः ॥

२६ पुरा कस्मिन्नपि परमारवंशे कीर्तिराजदेशाधिपतेः सुता कामलतानाम्नी सा बाल्ये सममालिभिः कस्यापि प्रासादस्य पुरो रममाणा वरान्वृणीतेति ताभिर्व्याह्रियमाणा सा कामलता घोरान्धकारनिरुद्धनयनमार्गा प्रासादस्तम्भान्तरितं फुलडाभिधानं पशुपालमज्ञातवृत्त्या तमेव वृत्त्वा तदनन्तरं कतिपयैर्वर्षैः प्रधानवरैरुपढौक्यमाना पतिव्रताव्रतनि-

१ ग्रामसहितं A B १ H २ कुकुरालं a c d ३ लेपनस्नान P
४ विप्रतिपत्ति P ५ कदाचिदपि B H

वहणाय पितरावनुज्ञाप्य निर्बन्धात्तमेवोपयेमे । तयोर्नन्दनो लाखाकः । स कच्छदेशाधिपति प्रसादितयशोराजवरप्रसादात्सर्वतोऽप्यजेयः । एकादशकृत्वस्त्रासितश्रीमूलराजसैन्यः । कस्मिन्नप्यवसरे कापिलकोट्टदुर्गे स्थित एव राज्ञा लाखाकः स्वयं निरुद्धः । तदनु स लक्षः क्वाप्यवस्कन्ददानाय प्रहितं निर्व्यूढसाहसं माहेचाभिधं भृत्यमागच्छन्तमियेष । तत्स्वरूपमवधार्य श्रीमूलराजेन तदागमनमार्गेषु निरुद्धेषु स समाप्तकार्यस्तत्रागच्छन् शस्त्रं त्यजेति राजपुरुषैरुक्तः स्वामिकार्यसमर्थनाय तथैव कृत्वा समरसज्जं लाखाकमुपेत्य प्रणंसीत् । अथ संग्रामावसरे—

२६) उग्गया ताविउं जहिं न किउ लक्खउ भणइ तिघट्ठ ॥

गणिया लब्भइ दीहडा के दहक अहवा अट्ठ ॥ १ ॥

इत्यादिबोधवाक्यानि विविधानि व्याहरन्माहेचभृत्येनोद्भटवृत्तिदर्शनेन प्रोत्साहितसाहसः श्रीमूलराजेन समं द्वन्द्वयुद्धं कुर्वाणस्तस्याजेयतां दिनत्रयेण विमृश्य तुर्यदिने श्रीसोमेश्वरमनुस्मृत्य ततोऽवतीर्णरुद्रकलया स लक्षो निजघ्ने । अथ तस्याजौ भूपतितस्य वातचलितं श्मश्रुणि पदा स्पृशन् राजा लक्षजनन्या लूतारोगेण भवद्वंशो विपत्स्यत इति प्रशप्तः ॥

२७) स्वप्रतापानले येन लक्षहोमं वितन्वता ।

सूत्रितस्तत्कलत्राणां बाष्पावग्रहनिग्रहः ॥ १ ॥

२८) कच्छपलक्षं हत्वा सहसाधिकलम्बजालमायातम् ।

संगरसागरमध्ये धीवरता दर्शिता येन ॥ २ ॥

॥ इति लाखाकोत्पत्तिविपत्तिप्रबन्धः ॥

२७(२९) मेदिन्यां लब्धजन्मा जितबलिनि बलौ बद्धमूला दधीचौ

रामे रूढप्रवाला दिनकरतनये जातशाखोपशाखा ।

---

१ ताव्यउजिहिं L २ बहूनि वाक्यानि B ३ माहिचभृत्योद्भट K L साहिवाभृत्योद्भट H ४ लूति P ५ श्लोकौ २७,२८ न दृश्येते H पुस्तके

किंचिन्नागार्जुनेन प्रकटितकलिका पुष्पिता साहसाङ्के
ओंमूलं मूलराज त्वयि फलितवती त्यागिनि त्यागवल्ली ॥ ३ ॥

३०) स्नाता प्रावृषि वारिवाहसलिलै· संरूढदूर्वाङ्कुर–
व्याजेनात्तकुशा· प्रणालसलिलैर्दत्त्वा निवापाञ्जलीन् ॥
प्रासादास्तव विद्विषा परिपतत्कुड्यस्थपिण्डच्छला–
स्कुर्वन्ति प्रतिवासरं निजपतिप्रेताय पिण्डक्रियाम्* ॥ ४ ॥

इत्थं तेन राज्ञा पञ्चपञ्चाशद्वर्षाणि निष्कण्टकं साम्राज्य विधाय सन्ध्यानीराजनाविधेरनन्तर राज्ञा प्रसादीकृतं ताम्बूलं वण्ठेन करतलाभ्यामादाय तत्र कृमिदर्शनात्तत्स्वरूपमवगम्य वैराग्यात्संन्यासाङ्गीकारपूर्वं च दक्षिणचरणाङ्गुष्ठे वह्नियोजनापूर्वं गजदानप्रभृतीनि महादानानि ददानोऽष्टभिर्दिनै —

३१) उद्धूमकेश पदलग्नमग्नि—
मेक विषेहे विनयैकवश्य ।
प्रतापिनोऽन्यस्य कथैव का य—
द्बिभेद भानोरपि मण्डलं य ॥

इत्यादिभि स्तुतिभि स्तूयमानो दिवमारुरोह ॥

अर्थे सं. ९९८ पूर्वं वर्षाणि ५५ राज्यं मूलराजेन चक्रे ।

॥ इति मूलराजप्रबन्धः ॥

---

१ आमुला P . पद्यमिद शार्ङ्गधरपद्धत्या (१२८०) दृश्यते २ सवत् ९९८ पूर्वं निष्कटकं B ३ द्वादशभि H L

४ B आदर्शमनुसृत्यमुद्रितपुस्तकेऽत्र निम्नलिखित पाठ अथ स. १०५० (५२) श्रावणसुदि ११ शुक्रे पुष्यनक्षत्रे वृषलग्ने श्रीचामुण्डराजो राज्ये उपाविशत् । अनेन श्रीपत्तने चन्दनाथदेव, चाचिणेश्वरदेवप्रासादौ कारितौ ॥ सं० १०६५ आश्विनशुदि ५ सोमे निरुद्ध वर्ष १३ मास १ दिन २४ राज्य कृत ॥ सं० १०६५ आश्विनशुदि ६ भौमे ज्येष्ठानक्षत्रे मिथुनलग्ने श्रीवल्लभराज देवो राज्ये उपविष्ट । अस्य राज्ञो मालवकदेशे धाराप्राकार वेष्टयित्वा शीलीरोगेण विपत्ति. सजाता । अस्य राजदमनशंकर इति तथा जगझम्पण इति विरुदद्वय सजात ॥

२८ सं. १०९३ पूर्वं वर्षाणि १३ श्रीचामुण्डराजेन राज्यं कृतं। अथ सं. १०६६ पूर्वं मास ६ वल्लभराजेन राज्यं कृतं। अथ सं.१०६६ पूर्वं वर्ष ११ मास ६ श्रीदुर्लभराजेन राज्यं कृतं। (अथ तस्य राजमदनशंकर तथा जगझंपण इति बिरुदद्वयं जातं B) तेन राज्ञा श्रीपत्तने दुर्लभसरोवरं रचयांचक्रे ॥

२९ तदनु श्रीभीमाभिधानं भ्रातुः सुतं राज्येऽभिषिच्य स्वयं तीर्थोपासनवासनया वाराणसीं प्रति प्रतिष्ठासुर्मालवकमण्डलं प्राप्य तन्महाराजश्रीमुञ्जेन छत्रचामरादिराजचिह्नानि विमुच्य कार्पटिकवेषेणैव पुरतो व्रजेति यद्वा युद्धं विधेहीत्यभिहितेऽन्तरा धर्मान्तरायमुदितमवगम्य तं वृत्तान्तं नितान्तं श्रीभीमराजाय समादिश्य कार्पटिकवेषेण तीर्थे गत्वा परलोकं साधयामास। ततः प्रभृतिमालविकराजैभिः सह गूर्जरनृपतीनां मूलविरोधः संवृत्तः ॥

---

६ ॥ अथ मुञ्जराजप्रबन्धः ॥

३० अथ प्रस्तावायातं मालवकमण्डलमण्डनश्रीमुञ्जराजचरितमेवम्। पुरा तस्मिन्मण्डले श्रीपरमारवंश्यः सिंहदन्तभटनामा नृपती राजपाटिकायां परिभ्रमन् शरवणमध्ये जातमात्रं रूपपात्रमतिमात्रं कमपि

–सं० १०६५ चैत्रशुदि ५ निरुद्धं मास, ५ दिन २९ अनेन राज्ञा राज्यं कृतं ॥ सं० १०६५ चैत्रशुदि ६ गुरौ, उत्तराषाढानक्षत्रे मकरलग्ने तद्भ्राता दुर्लभराजनामा राज्येऽभिषिक्तः। अनेन श्रीपत्तने सप्तभूमिधवलगृहकरणं व्ययकरणहस्तिशालाघटिकागृहसहितं कारितं ॥ स्वभ्रातृवल्लभराजश्रेयसे मदनशंकरप्रासादः कारितस्तथा दुर्लभसरः कारयाञ्चक्रे ॥ एवं १२ वर्षं राज्यं कृतं ॥ तदनु सं० १०७७ ज्येष्ठशुदि १० भौमे अश्विनीनक्षत्रे मकरलग्ने श्रीभीमाभिधानं

* तदनु भीमाभिधानं निजमंगजं राज्येऽभिषिच्य A B H १ यियासु d २ मालवकराज्ञां C ३ मालवकमण्डन P ४ श्रीसिंहभट C श्रीहर्षनामा d

बालमालोक्य पुत्रवात्सल्यादुपादाय देव्यै समर्पयामास । तस्य सान्वयं मुञ्ज इति नाम निर्ममे । तदनु सीन्धल इति नाम्ना सुत समजनि । नि शेषगुणपुञ्जमञ्जुलमुञ्जस्यं राज्याभिषेकचिकीर्नृपस्तस्य सौधमलंकुर्वन्नमन्दमन्दाक्षतया निजवधूं वेत्रासनान्तरिता विधाय प्रणामपूर्वं भूपति माराध । राजा तं प्रदेश विजनमवलोक्य तज्जन्मवृत्तान्तमादित एव तस्मै निवेद्य तव भक्त्या परितोषित सन्सुत विहाय तुभ्य राज्य प्रयच्छामीति वदन् परमेनेन सीन्धलनाम्ना बान्धवेन समं प्रीत्या वर्त्तितव्यमित्यनुशास्ति दत्वा तस्याभिषेकं चकार । स्वजन्मवृत्तान्तप्रसरशङ्किना तेन स्वदयितापि निजघ्ने । तदनु पराक्रमाक्रान्तभूतल समस्तविद्वज्जनचक्रवर्ती रुद्रादित्यनाम्ना महामात्येन चिन्तितराज्यस्तं सीन्धलनामान भ्रातरमुत्कटतयाज्ञाभङ्गकारिणं स्वदेशान्निर्वास्य सुचिर राज्य चकार । स सीन्धलो गूर्जरदेशे समागत्य काशहृदनगरसंनिधौ निजा

१ सिन्धुल b सिन्धुराज d B २ पुञ्जमुञ्जस्य a नि शेषराजगुणपुञ्ज d F H ३ समस्तसज्जन P ४ अत्र A आदर्श पश्चात्प्रक्षिप्तमिव मुद्रितपुस्तके च निम्नावतारितमधिकमुपलभ्यते–चिन्तितराज्यस्थिर सुखमनुभवन्कस्यामपि योषित्यनुरक्तश्चिरिकाभिधकरभमधिरुह्य द्वादशयोजनीं निशि प्रयाति प्रत्यायाति च तया सम विश्लेषे जाते इमं दोधकमपैठीत्—

मुञ्ज पडला दोरडी पेक्खिसि न गम्मारि ।
असाढि घण गज्जीइ चिक्खिलि होसेऽवारि ॥

५ शुभशीलकृतभोजप्रबन्धेऽय प्रसग इत्थ वर्णित —

रुष्टेन मुञ्जभूपेन सिन्धुलो दुर्दमस्तदा ।
देशान्निष्कासितो मेदपाटे नागहृदे ययौ ॥ ४९ ॥
नागहृदपुरो प्रान्ते निना पत्नीं निवेश्य सः ।
स्थितश्च मृगया कर्तुमागाद्दीपोत्सवोषसि ॥ ५० ॥
* ।
यावद्धन्ति किरि तावद्देवीभूय जगावद ॥ ५१ ॥
त्वत्साहसेन तुष्टोऽस्मि वर याचस्व सप्रति ।
सिन्धुलोऽवक्क्षितौ क्षितो मापनद्विशिखो मम ॥ ५२ ॥ मु पु ३ २८

पल्लीं निवेश्य दीपोत्सवे रात्रौ मृगयां कर्तुं प्रयातः । चौरवधभूमेः सन्निधौ शूकरं चरन्तमालोक्य शूलिकायाः पतितं चौरशबमजानन् जानुनाधो विधाय यावत्प्रति किरिं शरं सज्जीकुरुते तावत्तेन शबेन संकेतितः। ततस्तं करस्पर्शान्निवार्य शूकरं तं शरेण विदार्य यावदाकर्षति तावत्स शबोऽट्टहासपूर्वमुत्तिष्ठन् सीन्धलेन प्रोचे तव संकेतकाले शूकरे शरप्रहारः श्रेयान् । किं वाऽवबुध्य मत्प्रदत्तः प्रहार इति तद्वाक्यान्ते स छिद्रान्वेषी प्रेतः तन्निस्सीमसाहसेन परितुष्टो । वरं वृणु इत्यभिहिते[2] मम बाणः क्षितौ मा पतत्विति याचिते भूयोपि वरं वृणु । इति श्रुत्वा मद्भुजयोः सर्वापि लक्ष्मीः स्वाधीनेति । तत्साहसचमत्कृतः स प्रेत इत्याह त्वया मालवमण्डले गन्तव्यमिति । तत्र श्रीमुञ्जराजा सन्निहितविनाशस्तथापि तत्र त्वया गन्तव्यमेव तत्र तवान्वये राज्यं भविष्यतीति । तत्प्रेषितस्तत्र गत्वा श्रीमुञ्जराज्ञः संपदः पदं कमपि जनपदमवाप्य पुनरुत्कटतया श्रीमुञ्जेन निगृहीतनेत्रः काष्ठपञ्जरनियन्त्रितो भोजं सुतमजीजनत् । सोऽभ्यस्तसमस्तराजशास्त्र· षट्त्रिंशदायुधान्यधीत्य[3] द्वासप्ततिकलाकूपारपारंगमः समस्तलक्षणलक्षितो ववृधे । तज्जन्मनि जातकविदा केनापि नैमित्तिकेन जातकं समर्पितं ।

३२) पञ्चाशत्पञ्चवर्षाणि मासाः सप्त दिनत्रयम् ।
भोक्तव्यं[4] भोजराजेन सगौडं दक्षिणापथम् ॥[5]

इति श्लोकार्थमवगम्यास्मिन्सति मत्सूनो राज्यं न भविष्यतीत्याशङ्कयान्त्यजेभ्यो वधाय तं समर्पयामास । अथ तैर्निशीथे माधुर्यधुर्यां तन्मूर्त्तिमवधार्य तैर्जातानुकम्पैः सकम्पैश्चेष्टदैवतं स्मरेत्यभिहिते ।

---

१ अवबुध्य महाप्रदत्तः P अवबुध्यमदत्त K अवबुध्यति मत b २ त्यभिहिते K ३ दण्डायुधानि A B ४ भोजदेवेन भोक्तव्य A ५ पद्यमिद भोजप्रबन्धेप्यस्ति (६)

३३) *मान्धाता स महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः¹ ।
अन्ये चापि युधिष्ठिरप्रभृतयो² यावद्भवान् भूपते
नैकेनापि समं गता वसुमती मुञ्ज³ त्वया यास्यति ॥

इदं काव्यं पत्रके आलिख्य तत्करेण नृपतये समर्पयामास । नृपतिस्तद्दर्शनात्खेदमेदुरमना अश्रूणि मुञ्चन् भ्रूणहत्याकारिणं स्वं निनिन्द। अथ तैस्त सबहुमानमानीय युवराजपदवीदानपूर्वं संमान्य तिलिङ्गदेशीयराज्ञा श्रीतैलिपदेवनाम्ना सैन्यप्रेषणैराक्रान्तो रोगग्रस्तेन रुद्रादित्यनाम्ना महामात्येन निषिध्यमानोऽपि तं प्रति प्रतिष्ठासुर्गोदावरीं सरितमवधीकृत्य तामुल्लंघ्य प्रयाणकं न कार्यमिति शपथदानपूर्वं व्याविद्धोऽपि⁴ तं पुरा षोढानिर्जितमित्यवज्ञया पश्यन्नतिरेकवशात्तां सरितमुत्तीर्य स्कन्धावारं निवेशयामास । रुद्रादित्यो नृपतेर्वृत्तान्तमवगम्य कामपि भाविनीमविनीततया विपद विमृश्य स्वयं चितानले⁵ प्रविवेश । अथ तैलिपेन⁶ तत्सैन्यं छलबलाभ्यां हतविप्रहतं कृत्वा मुञ्जरज्वा विबध्य⁷ श्रीमुञ्ज-

* पद्यमिदं भोजप्रबन्धे (३८) शार्ङ्गधरपद्धत्या (४००२) सुभाषितार्णवेऽपि दृश्यते

१ अन्तकृत् c d　२ प्रभृतय सर्वेपि चास्तं गता b　३ मुञ्ज b

४ गोदावर्यास्तटादर्वाक् स्थितेन भवता रणं ।
कार्यं न चेत्तवाह्राय वपुर्भङ्गो भविष्यति ॥
गोदावरीपुरोभागभू श्चुरास्ति भृशं नृप ।
तेन तत्र न गन्तव्य रणाय भवता मनाक् ॥
इति शुभशीलकृते भोजप्रबन्धे मु. पु पृ ३३८

५ चिन्तानले a b　६ तैलपेन c d　७ मुञ्ज रज्वा बद्ध्वा a b c d'

राजो वगृहे । कारागृहे निहितः काष्ठपञ्जरनियन्त्रितो मृणालवत्या तद्भगिन्या परिचार्यमाणस्तया सह जातकलत्रसंबन्धः । पाश्चात्यैर्निजप्रधानैः सुरङ्गादानपूर्वं तत्र ज्ञापितसकेत. । कदाचिद्दर्पणे स्वं प्रतिबिम्बं पश्यन्नज्ञातवृत्त्या पृष्ठत.समागताया मृणालवत्या वदनप्रतिबिम्बं जराजर्जरं मुकुरे निरीक्ष्य यूनः श्रीमुञ्जस्य वदनसामीप्याद्विशेषविच्छायतया तां विषण्णामालोक्यैवमवादीत्—

३४) *मुञ्ज भणइ मुणालवइ जुव्वण गयुं न झूरि ।
जइ सक्कर सयखण्ड थिय तो इस मीठी चूरि ॥

इति तां संभाष्य स्वस्थानं प्रति यियासुस्तद्विरहासहो भयात्तं वृत्तान्तं ज्ञापयितुमशक्तो भूयो भूयः प्रोच्यमानोऽपि तां चिन्तामनुचरन्लवणादिलवणरसवर्ती भोजितोऽपि तदास्वादानवबोधाचया निर्बन्धबन्धुरया गिरा सप्रणयं पृष्टः प्राह । अहमनया सुरङ्गया स्वस्थाने गन्तास्मीति चेद्भ-

---

१ शुभशीलकृते भोजप्रबन्धे मृणालवतीचरितं यथा :—
इतस्तैलिपदेवस्य पित्रा देवलभूभुजा ।
पत्नीस्थाने कृता दासी सुन्दरीत्यभिधा पुरा ॥
पुत्री मृणालवत्याह्वा सुते स्म सुन्दरी पराम् ।
* * * * ॥
वर्धमाना क्रमात्प्राप्ता यौवनं भगिनी पुन. ।
दत्ता तैलिपदेवेन श्रीपुरे चन्द्रभूपतेः ॥
चन्द्रो यदागमच्छूलरोगेण यममन्दिरम् ।
सापि तैलिपदेवस्य भ्रातुर्गेहमुपागमत् ॥
स्वसा तैलिपदेवस्य रण्डा मृणालवत्यथ ।
भक्तपानादि मुञ्जस्य चक्रे भ्रातृनिदेशत. ॥
तिलङ्गनगरोपान्ते गत्वा गव्यूतपञ्चके ।
ग्रामे चन्द्राभिधे तस्थुः सुरङ्गादातुमेव ते ॥
मु. पु. पृ ३३८–३३९

२ पभणइ मुञ्ज c d ३ जुव्वणु गियउ म झूरि c d

वंती तत्र समुपैति तदा महादेवीपदेऽभिषिच्य प्रसादफलं दर्शयामीत्यभिहिते यावदाभरणकरण्डिकामुपनयामि तावत्क्षणं प्रतीक्षस्वेत्यभिदधानाऽसौ कात्यायिनीं तत्र गतो मा परिहरिष्यतीति विमृशन्ती स्वभ्रातुर्भूपतेस्तं वृत्तान्तं निवेद्य विशेषतो विडम्बनाय बन्धनबद्धं कारयित्वा प्रतिगृहं भिक्षाटनं कारयाभास । स प्रतिगृहं परिभ्रमनिर्वेदमेदुरतयेमानि वाक्यानि पपाठ ॥ तथाहि—

३५) सउ चित्तह रि सट्ठी मम्मणहँ बत्तीसडी हियार्हें ।
अम्मिं ते नर दड्ढ सीझे जे वीससइ थिया ॥ १ ॥

३६) झोली तुट्टी किं न मूउ किं न हूयउ छारपुञ्ज ।
हिण्डइ दोरीबन्धीयउ जिम मक्कड तिम मुञ्ज ॥ २ ॥

तथा च—

३७) गय गय रह गय तुरय गय पायक्कडा निभिच्च ।
सग्गट्ठिय करि मन्तण उम्मुहु ता रुद्दाइच्च ॥ ३ ॥
अथान्यस्मिन्वासरे कस्यापि गृहपतेर्गृहे भिक्षानिमित्तं नीतः ।

पँड्डकपाणिं तत्पत्नी तक्रं पाययित्वा गर्वोद्धुरकन्धरां भिक्षादाननिषेधं विदधतीं मुञ्जः प्राह—

३८) भोलि'' मुन्धि म गव्वु करि पिकि वि पड्डुपाइ
चँउदसइ सइं छहुत्तरइं मुञ्जह गयह गयाइ ॥ ४ ॥

---

१ तद्भवती a b ２ विशेषतोऽपि H ३ चित्तहस॰मणह a ४ पञ्चासडीहियाइ c d ५ अस्सीळिरे b हि अम्भि P ६ सियजे पत्तिनहताह अम्मी सीजै d ७ झोली तुट्टिवि किं न गउ मुउ । छारहपुञ्ज घरिघरि तिम्म नचावियइ जिम C । तुटवि D झाली p । हुयउ b ८ पायक्कडा ठकुर रुद्दाइच्च C d ९ ऊंमुऊ b मतणुमहता d १० पट्टुकरूपाणि H ११ धनवन्ती म गव्व पड्डुरुमाइ C १२ चउदहसइ a छउत्तर c

३९) मा मङ्कड कुरुद्वेगं यदहं खण्डितोऽनया ।
रामरावणमुञ्जाद्याः स्त्रीभिः के के न खण्डिताः ॥ ५ ॥

४०) रे रे यन्त्रक मा रोदीर्यदहं भ्रामितोऽनया ।
कटाक्षाक्षेपमात्रेण कराकृष्टौ च का कथा ॥ ६ ॥

४१) *जा मति पच्छइ सम्पज्जइ सा मति पहिली होइ ।
मुञ्ज भणइ मुणालवइ विघन न वेढइ कोइ ॥ ७ ॥

४२) यशःपुञ्जो मुञ्जो गजपतिरवन्तिक्षितिपतिः
सरस्वत्यावासः समजनि पुरा य कृतिरिति ।
स कर्णाटेशेन स्वसचिवबुद्धयैव विधृतः
कृतः शूलाप्रोतस्त्वहह विषमाः कर्मगतयः ॥ ८ ॥

४३) सुहृद्देवेन्द्रस्य क्रतुपुरुपतेर्जीशजनकः
प्रमीतः शय्यायां सुतविरहदुःखाद्दशरथः ।
ज्वलत्तैलद्रोण्यां निहितवपुषस्तस्य नृपते—
श्चिरात्संस्कारोऽभूदहह विषमाः कर्मगतयः ॥ ९ ॥

४४)[१] आपद्गतं हससि किं द्रविणान्धमूढ
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ।
किं त्वं न पश्यसि घटीर्जलयन्त्रचक्रे
रिक्ता भवन्ति भरिता भरिता च रिक्ताः ॥ १० ॥

४५) अलङ्कारः शङ्काकरनरकपालं, परिजनो
विशीर्णाङ्गो भृङ्गी, वसु च वृष एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो—
र्विधौ वक्रे मूर्ध्नि स्थितवति, वयं के पुनरमी ॥ ११ ॥

---

१ पद्यमात् द्वादशपर्यन्ताः श्लोका H पुस्तके न सन्ति २ पद्यमिदं सुभाषितावल्यां (२३८८) दृश्यते

३ पद्यमिदं सुभाषितार्णवेऽप्यस्ति ४ हैमकाव्यानुशासने (पृ. २२७) प्युदाहृतं पद्यमिदम्

४६) *सायर खाई लंक गढ गढवइ दससिरु राउ ।
भग्गक्खय सो भज्जि गय मुञ्ज म करि विसाउ ॥ १२ ॥

इत्थं सुचिरं भिक्षां भ्रामयित्वा वध्यभूमौ नृपादेशाद्वधविधौ नीत । तैरुक्तमिष्टं दैवतं स्मर ।

४७) लक्ष्मीर्यास्यति गोविन्दे वीरश्रीर्वीरवेश्मनि ।
गते मुञ्जे यशःपुञ्जे निरालम्बा सरस्वती ॥

इत्यादि तद्वाक्यानि यथाश्रुतमवगन्तव्यानि ॥ तदनु मुञ्जं निहत्य तच्छिरो राजाङ्गणे शूलिकाप्रोतं कृत्वा नित्यं दधिवेष्टितं कारयन्निजममर्षं पुपोष । अथ मालवमण्डले तद्वृत्तान्तवेदिभिः सचिवैस्तद्भ्रातृजं भोजनामानं राज्येऽभ्यषिच्यत ॥

॥ इति श्रीविक्रमप्रमुखनृपवर्णनो नाम प्रथमः प्रकाशः ॥

---

१ विक्रमाद्वासरादष्टमुनिव्योमेन्दुसंमिते ,।
वर्षे मुञ्जपदे भोजभूपो पट्ट,निवेशितः ॥
इति शुभशीलकृते भोजप्रबन्धे मु. पु. पृ. ११९

श्रीः

प्रबन्धचिन्तामणिः

द्वितीय प्रकाशः

॥ भोजभीमप्रबन्धाः ॥

१ अथ यदा मालवकमण्डले श्रीभोजराजा राज्यं चकार तदात्र गुर्जरधरित्र्यां चौलुक्यवंशीयश्रीभीम पृथिवीं शशास। कस्मिन्नपि निशाशेषे स श्रीभोजः श्रियश्चञ्चलतां निजचेतसि चिन्तयन् कल्लोललोलं निजं जीवितं च विमृशन् प्रातःकृत्यानन्तरं दानमण्डपेऽनुचरैराहूतेभ्योऽर्थिभ्यो यदृच्छया सुवर्णटङ्ककान्दातुमारेभे।

२ अथ रोहकाभिधानस्तन्महामात्य· कोशविनाशात्तदौदार्यगुणं दोषं मन्यमानोऽपरथा त दानविधिं निषेद्धुमक्षम. सर्वावसरे भग्ने सभामण्डपमारपट्टे—

१) *आपदर्थे धन रक्षेत्

इत्यक्षराणि खटिकयालेखि प्रातर्यथावसरं नृपतिस्तान्वर्णान्निर्वर्ण्य समस्तपरिजने तं व्यतिकरमपन्हुवाने।

भाग्यभाज क चापद ।
इति नृपतिना लिखिते।
दैवं हि कुप्यते क्वापि
एवं मन्त्रिलिखनादनन्तरं नृपतिनां तद्विलोक्य
संचयोपि विनश्यति ॥

इति पुरो लिखिते स सचिवोऽभय याचित्वा स्वलिखितं विज्ञापयामास ॥ तदनु पण्डितानां पञ्चशती मम मनोगज ज्ञानाङ्कुशेन वशीकर्तुममात्रं महामात्यसन्निभा यथोचित ग्रासं लभते ॥

१ चौलुक्यचक्रवर्ती c d २ लिलेख c d ३ नृप· a नृपेण d
* भोजप्रबन्धे पद्यमिदं (१९८)
४ स्वं लेखकं ज्ञापयामास c d ५ इयं पण्डितानां c d ६ अतिमात्रं c d अङ्कुशेन वशीकृत्ता d

तथाहि कङ्कणोत्कीर्णमार्याचतुष्टयमेतत्—

२) *इदमन्तरमुपकृतये प्रकृतिचला यावदस्ति संपदियम् ।
विपदि नियतोदितायां पुनरुपकर्तुं कुतोवसरः ॥ १ ॥

३) निजकरनिकरसमृद्ध्या धवलय भुवनानि पार्वणशशाङ्क ।
सुचिरं हन्त न सहते हतविधिरिह सुस्थितं किमपि ॥ २ ॥

४) अयमवसरः सरस्ते सलिलैरुपकर्तुमर्थिनामनिशम् ।
इदमपि सुलभमम्भो भवति पुरा जलधराभ्युदये ॥ ३ ॥

५) कतिपयदिवसस्थायी पूरो दूरोन्नतोऽपि चण्डरयः ।
तटिनि तटद्रुमपातिनि पातकमेकं चिरस्थायि ॥ ४ ॥

किंच—

६) यदि नास्तमिते सूर्ये न दत्तं धनमर्थिनाम् ।
तद्धनं नैव जानामि प्रातः कस्य भविष्यति ॥ ५ ॥

इति स्वकृतं कण्ठाभरणीकृतं श्लोकमिदमन्त्रवज्जपन्मन्त्रिन्, प्रेतप्रायेण भवता कथं विप्रलभ्ये ।

३ अथान्यस्मिन्नवसरे राजा राजपाटिकायां संचरन् सरित्तीरमुपागतः । तत्तीरमुल्लङ्घ्यागच्छन्तं दारिद्र्योपद्रुतं काष्ठभारवाहकं कमपि विप्रं प्राह—

---

* अयं श्लोकः राजतरंगिण्या (५-३६) अवन्तिवर्म (इ स. ८५५) कालीनो वर्तते

१ उदयाया c d २ अयं श्लोकः कस्यापीति शार्ङ्गधरपद्धत्यां (५५१) ३ अयं श्लोकः वल्लभदेवस्येति शार्ङ्गधरपद्धत्या (११२८) मस्ति ४ अयं श्लोकः कस्यापीति शार्ङ्गधरपद्धत्या प्रदत्त (११२४) ५ दूरोन्नतिश्च भविता ते d ६ किंच श्लोकद्वय कुण्डलोत्कीर्णम् ॥ तद्यथा—

प्रासादर्धमपि ग्रासमर्थिभ्यः किं न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥

यदि नास्तमिते-० इत्यादि B, d

७ यदनस्त A B ८ इमानि सुभाषितानीष्ट d ९ विप्रलभ्यः d विप्रलम्भ्यः P

७) *कियन्मात्रं जलं विप्र

विप्र—

जानुदघ्नं नराधिप ।

इति तेनोक्ते राजा—

कथं सेयमवस्था ते

इति नृपेणोक्त' ॥ विप्र—

न सर्वत्र भवादृशा ॥

इति तद्वाक्यान्ते यत्पारितोषिकं नृपतिरस्मै अदापयत्तन्मन्त्री धर्मवहिकायां श्लोकबद्धं लिलेख । तद्यथा—

८) लक्षं लक्षं पुनर्लक्षं मत्ताश्च दश दन्तिन' ।
दत्त देवेन तुष्टेन जानुदघ्नप्रभाषणात्[१] ॥ १ ॥

४ ×अथान्यदा निशि निशीथसमयेऽकस्माद्विगतनिद्रो राजा राजानं गगनमण्डले नवोदितमालोक्य स्वसारस्वताम्भोधिप्रोन्मीलद्वेलानिभमिदं काव्यार्धमाह ।

९) यदेतच्चन्द्रान्तर्जलदलवलीलां प्रकुरुते
तदाचष्टे लोक शशक इति नो मा प्रति तथा ।

इति राज्ञा भूयो भूयो निगद्यमाने कश्चिच्चौरो नृपसौधे खात्रपातपूर्वं कोशभुवने प्रविश्य प्रतिभाभरं निषेद्धुमक्षमः—

अहं त्विन्दु मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणशतकलङ्काङ्किततनुम् ॥

---

* इय कथा ७,८ श्लोकसहिता भोजप्रबन्धे (पृ ४०) पि वर्तते

१ प्रभाषिणे A C D २ ऊचे L

× भोजप्रबन्धे चतुर्थ. प्रबन्धः ९,१० श्लोकसहितो (पृ. ५२,५३) वर्तते ९।१० श्लोकौ हर्षदेवचौरयोरिति सुभाषितावल्या (१५७८,१५७९) प्रदत्तौ

इति तत्पठनानन्तरं चौरमङ्गरक्षकैः कारागारे निवेशयामास । ततोऽहर्मुखे सभामुपनीताय तस्मै चौराय यत्पारितोषिकं राज्ञा प्रसादीकृतं तद्धर्मवहिकानियुक्तो नियोग्येवं काव्यमलिखत् ।

१०) अमुष्मै चौराय प्रतिनिहितमृत्युप्रतिभिये
प्रभुः प्रीत प्रादादुपरितनपादद्वयकृते ।
सुवर्णानां कोटीर्दश दशनकोटिक्षतगिरी-
न्करीन्द्रानप्यष्टौ मदमुदितगुञ्जन्मधुलिह॰ ॥

५ अथ कदाचित्तस्यां वाच्यमानायां स्वमेव स्थूललक्षं मन्यमानो दर्पभूताभिभूत इवं

११) तत्कृतं यन्न केनापि तद्दत्तं यन्न केनचित् ।
तत्साधितमसाध्यं यत्तेन चेतो न दूयते ॥

इति स्वं मुहुर्मुहु॰ श्लाघमान॰ केनापि पुरातनमन्त्रिणा तद्गर्वखर्वचिकीर्षया श्रीविक्रमार्कधर्मवहिका नृपायोपनिन्ये । तस्या उपरितनविभागे प्रथमतः प्रथमं काव्यमेतत्—

१२) अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः
पञ्चाशन्मदगन्धमत्तमधुपक्रोधोद्धुरा॰ सिन्धुरा॰ ।
अश्वानामयुतं प्रपञ्चचतुरं वाराङ्गनानां शतं
दण्डे पाण्ड्यनृपेण ढौकितमिदं वैतालिकस्यार्पितम् ॥

१३) वक्त्राम्भोजे सरस्वत्यधिवसति—०
अस्य काव्यस्य पारितोषिकदानमष्टौ हाटकमिदं काव्यं ज्ञेयम् ॥

---

१ दर्पाभिभूतः C २ तादृग्योपचयप्रपञ्चितदशा d ३ वेतालकस्य b d वैतालिकायार्प्यतामिति भोजप्रबन्धे पाठ॰ ४ पद्यमिद भोजप्रबन्धे (२३१) शार्ङ्गधरपद्धत्या च वर्तते एतत्सम्बन्धिनी कथा कथारत्नाकराच्च ज्ञेया पञ्चम. प्रबन्ध. १०,११ श्लोकसहितो भोजप्रबन्धे (पृ ५१) वर्तते ५ अथ श्लोकः पूर्वं विक्रमार्कप्रबन्धे (श्लो. १४) संपूर्णः प्रदत्त

इति सत्काव्यार्थमवगम्य तदौदार्यविनिर्जितगर्वसर्वस्वस्तां वहिकामर्चयित्वा यथास्थानमस्थापयत् ।

६ प्रतीहारेण विज्ञप्तः स्वामिन्देवदर्शनोत्सुकं सरस्वतीकुटुम्बं द्वारमध्यास्ते । क्षिप्रं प्रवेशयेति राजादेशादनु प्रथमं प्रविष्टः तत्प्रेष्य प्राह—

(१४) बापो विद्वान् बापपुत्रोऽपि विद्वान्
आई विउँषी आईधुआपि विउर्षा ।
काणी चेटी सापि विउँषी वराकी
राजन्मन्ये विर्ज्ञपुञ्जं कुटुम्बम् ॥

इति तस्य प्रहसनप्रायेण वचसा नृपतिरीषद्विहस्य तज्ज्येष्ठपुरुषाय समस्यापदमाह—

असारात्सारमुद्धरेत् ॥

(१५) ×दानं वित्ताद्दृतं वाचः कीर्तिधर्मौ तथायुषः ।
परोपकरणं कायादसारात्सारमुद्धरेत् ॥

अथ नृपस्तत्पुत्राय—हिमालयो नाम नगाधिराजः । चकार मेनाविरहातुराङ्गीति नृपतिवाक्यानन्तरम्—

(१६) तव प्रतापज्वलनाज्जगाल
हिमालयो नाम नगाधिराजः ।
चकार मेना विरहातुराङ्गी
प्रवालशय्याशरणं शरीरम् ॥

प्रविष्टः तत्प्रेष्यः प्राह A. प्रविष्टं तत् । प्रेष्य- प्राह P

१ बप्पो b २ विदुषी a c d ३ विद्री a विध्री C विदुसी d ४ विज्ञ b विद्व d

× पद्यमिदं साहित्यदर्पणे, सुभाषितार्णवे हेमकाव्यानुशासने (पृ–२८७) च दृश्यते

५ पदमिदं कुमारसंभवस्थं (१–१) ६ इदमपि कुमारसंभवस्थं (३-८)

इति समस्यायां पूरितायां ज्येष्ठस्य पत्नीं प्रति राजा । कवणु पियावउ खीरु । इति समस्यापदे राज्ञाऽर्पिते—

१७) लई यह रावणु जाईयउ दहमुह इक्कु शरीरु ।
जणणि वियम्भी चिन्तवइ कवणुपियावउ खीरु ॥

सेत्थं पूरयामास ॥ अथ दासीं प्रति राज्ञः, कण्ठि विलुलइं काउ । इति समस्यापदं ।

१८) काण वि विरहकरालिइं पइउड्डावियउ वराउ ।
सहि अच्चमूउं दिठ्ठ मइं कण्ठि विलुलइ काउ ॥

सा इत्थं पूरयामास । सुता विस्मृत्य राज्ञा तानि सर्वाणि सत्कृत्य विसृष्टानि ॥

अथ राजा विसृष्टसर्वावसरः चन्द्रशालाभुवि परिभ्रमन्विधृतातपत्रो द्वाःस्थेन विज्ञप्तसुतावृतान्तो नृप उच्यतामिति तां प्रति प्राह ॥ अथ सा—

१९) राजन्भोजे कुलप्रदीप निखिलक्ष्मापालचूडामणे
युक्तं संचरणं तवात्र भुवने छत्रेण रात्रावपि ।
मा भूत्त्वद्वदनावलोकनवशाद्व्रीडाविलक्षः शशी
मा भूच्चेयमरुन्धती भगवती दुःशीलताभाजनम् ॥

इति तद्वाक्यानन्तरं तत्सौन्दर्यापहृतचित्तस्तामुद्वाह्य भोगिनीं चकार ।

७ अथान्यदा यमलपत्रेषु सत्स्वपि सन्धिदूषणोत्पत्तये श्रीभोजराजो गूर्जरदेशविज्ञतां जिज्ञासुः सान्धिविग्रहिककरे कृत्वेमां गाथां भीमं प्रति प्राहिणोत् ॥

२०) हेलानिद्दलियगइंदकुम्भपयडियपयावपसरस्स ।
सिंहस्स मएण समं न विग्गहो नेय सन्धाणं ॥

---

१ जेइ a जइ b २ अचिमू c d ३ सर्वावसरे a P ४ मुज्झल B H
५ भोजप्रबन्धेपि पद्यमिदं दृश्यते (११२)

यामपरथा प्रवेशमलभमानोऽनेनैव प्रपञ्चेन स्वामिदर्शनचिकीरयं राजशेखर इति ज्ञापितः।

तदुचितमहादानैः प्रसादीकृते—

२८) [2]भेकैः कोटरशायिभिर्मृतमिव क्ष्मान्तर्गतं कच्छपैः
पाठीनैः पृथुपङ्कपीठलुठनाद्यस्मिन्मुहुर्मूर्छितम्।
तस्मिन्नेव सरस्यकालजलदेनोन्नम्य तच्चेष्टितं
येनाकुम्भनिमग्नवन्यकरिणां यूथैः पयः पीयते॥

इत्यकालजलदराजशेखरोक्तिः॥

११ कस्मिन्नपि संवत्सरे वृष्ट्यभावात्कणतृणानामप्राप्त्या स्थानपुरुषैर्भोजागमं ज्ञापितं श्रीभीमश्चिन्तां प्रपन्नो डामरनामानं सान्धिविग्रहिकमादिशत्। यत्किमपि दण्डं दत्वाऽस्मिन्वर्षे श्रीभोज इहागच्छन्निवार-

---

१ इति भाषिणे विप्राय हस्तिनीं ददौ पुनः स विप्रः—
निर्वाता न कुटी न चाग्निशकटी नापि द्वितीया पटी
वृत्तिर्नारभटी न तुन्दिलपुटी भूमौ च घृष्टा कटी।
तुष्टिर्नैकघटी प्रिया न वधुटी तेनाप्यहं संकटी
श्रीमद्भोज तव प्रसादकरटी भङ्क्तां ममापत्तटी॥ D B
इति श्रुत्वा एकादशसहस्राश्च प्रदत्ता B

२ पद्यमिदं भोजप्रबन्धे (२०१) तथा च शार्ङ्गधरपद्धत्यामकालजलदस्येति (३७७७) सुभाषितावल्यां (८४३) च दाक्षिणात्यस्येति

३ अथ राजशेखरनामा कवि संध्याया महाकालप्रसादे सुप्तः पठति—
पोतानेतानय गुणवति ग्रीष्मकालावसान
यावत्तावच्छमय रुदतो येन केनाशनेन।
पश्चादम्भोधररसपरीपाकमासाद्य तुम्बी
कुष्माण्डी च प्रभवति यदा के वयं भूभुज के॥
प्रसन्नेन राज्ञा सर्वस्वदानात्तोषितेन कविनोक्तं भेकैरिति॥ D B

णीय । स इति तदादेशात्तत्र गतोऽत्यन्तविरूपत्वात्मरचित्तज्ञः श्रीभोजे-
नेत्यभिदधे† ।

२९) यौष्माकाधिपसन्धिविग्रहपदे दूताः कियन्तो वद
मादृक्षा बहवोऽपि मालवपते ते सन्ति तत्र त्रिधा ।
प्रेष्यन्तेऽधममध्यमोत्तमगुणप्रेक्षानुरूपक्रमा-
त्तेनान्तःस्मितमुत्तरं विदधता धाराधिपो रञ्जित ॥

इति तद्वचनचातुर्यचमत्कृतो राजा गूर्जरदेशं प्रति प्रयाणपटहदानं चक्रे । प्रयाणावसरे बन्द्योक्तं ।

३०) चौलः क्रोड पयोधेर्विशति निवसते रन्ध्रमन्ध्रो गिरीन्द्रे
कर्णाटः पट्टबन्धं न भजति भजते गूर्जरो निर्झराणि ।
चेदिर्लीयतेऽस्त्रैः क्षितिपतिसुभट कन्यकुब्जोऽत्र कुब्जो
भोज त्वद्यन्त्रमात्रप्रसरभयभरव्याकुलो राजलोकः ॥ १ ॥

---

† अथैकदा डामरनामा नागरज्ञातीयो द्विज श्रीभोजपार्श्वे गतो राज्ञोपहास-पूर्वमभिदधे यौष्माका-० इति d b आदर्शयोः पाठः १ त्वादृक्षा L २ प्रेक्षन्ते d ॥ ३ अत्र निम्नरूप वर्णन d b आदर्शयो –श्रीभोजराजा गूर्जरोपरि कृतप्रस्थानो बाह्यावासे कृतस्नानो भेटित· सन् राज्ञोचे डामराख्य । भीमडीयाको नापितोऽद्य कल्ये किं करोति । तेनोक्त । अन्येद्या राज्ञा शिरोमुण्डितमेकस्य शिरो जलभिन्नमास्ते पश्चान्मुण्डयिष्यतीति भणिते राज्ञा चमत्कृतेन राजभुवने राजविडम्बननाटके चित्रे डामरस्वामी कर्णाटराजश्चाङ्गनि कुर्वन् दर्शित । दूतेनोक्त ।

भोजराज मम स्वामी यदि कर्णटभूपते· ।
कराकृष्टो न पश्यामि कथ मुञ्जशिर करे ॥ १ ॥

इति वाक्येन स्मृतपूर्ववैर गूर्जरदेश परित्यज्य कर्णाटोपरि प्रयाण कृतवान् । नृपाग्रे डामरस्योक्तिः—

सत्य त्व भोज मार्त्तण्ड पूर्वस्या दिशि राजसे ।
सूरोपि लघुतामेति पश्चिमाशावलम्बने ॥

४ चौड. d b ५ पद्यमिद काव्यानुशासने दृश्यते

२१) कोणे कौङ्कणकः कपाटनिकटे लाटः कलिङ्गोऽङ्गणे–
त्वं रे कोशल नूतनो मम पिताप्यत्रोषितः स्थण्डिले ।
इत्थं यस्य विवर्द्धितो निशि मिथः प्रत्यर्थिनां संस्तर-
स्थानन्यासभुवा विरोधकलहः कारानिकेतक्षितौ ॥ २ ॥

प्रयाणकपटहदापनादनु समस्तराजविटम्बनाटकेऽभिनीयमाने । सकोपः कोऽपि भूप कारागारान्तरास्थितं सुस्थितं तैलिपं भूपमुत्थापयंस्तेनोचे । अहमिहान्वयवासी कथमागन्तुकभवद्वचसा निजं पदमुज्झामीति । विहसन्नृपो डामरं प्रति नाटकरसावतारं प्रशंसंस्तेनाभिदधे । देवातिशायिन्यपि रसावतारे धिग्नटस्य कथानायकवृत्तान्तानभिज्ञताम् यतः श्रीतैलिपदेवराजः शूलिकाप्रोतमुञ्जराजशिरसा प्रतीयत इति सभासमक्षं तेनोक्ते तन्निर्भर्त्सनसंपन्नमन्युरनन्यसामग्र्या[1] तदैव तिलङ्गदेशं प्रति प्रयाणमकरोत् ।

अथ तैलिपदेवस्यातिवल्मायान्तमाकर्ण्य व्याकुलं श्रीभोजं डामरः समायातः कल्पितराजादेशदर्शनपूर्वं भोगपुरे श्रीभीमं समायातं विज्ञपयामास । तया तद्वार्त्तया क्षते क्षारनिक्षेपसदृक्षया विलक्षीक्रियमाणः श्रीभोजराजो डामरमभ्यधात् । अस्मिन्वर्षे त्वया स्वस्वामी कथंचनेहागच्छन्निवार्य इति भूयो भूयः सदैन्यं भाषमाणे नृपे प्रस्तावविन्नृपाद्धस्तिनीसहितं हस्तिनमुपायने उपादाय पत्तने श्रीभीमं परितोषयामास । *

---

१ रनन्यसामान्यसामग्र्या B H

* अत्र मु. जि. F संज्ञकआदर्शे डामरसम्बन्धी निम्नलिखितमधिकमुपलभ्यते—

अथान्यस्मिन् वर्षे श्रीभीमस्तं डामरं मालवमण्डले प्रेषयितुकामो वार्तादि शिक्षयन् आस्ते । डामर उत्तिष्ठन् पट्टीं ग्राहयामास । ततः श्रीभीमेन पृष्टः स आह–भवच्छिक्षितमत्रैव मुञ्चामीत्यूचे । यत अत्र गतोऽहं स्वयमेवावसरोचितं वदिष्ये । अन्यशिक्षितं कियत्कथयिष्यते । ततो राजा तस्यावसरोचितचातुरीविज्ञानाय प्रच्छन्नं स्वर्णमयं समुद्गकं रक्षापुञ्जेन भृत्वा, भोजसभाया अन्यत्र नायमुद्घाटनीयः, इति शिक्षयित्वा तद्धस्ते उपदार्थमदात् । ततः स गतो मालवभोजसभायां तं बहुपटकूलवेष्टितं आनाय्य भोजनृपाग्रे मुमोच । स उद्वेष्ट्य विलोकयति तदा मध्ये क्षारपुञ्जः । ततो–

१२ कस्मिंश्चिद्धर्मशास्त्राकर्णनक्षणेऽर्जुनस्य राधावेधमाकर्ण्य किमभ्यासस्य दुष्करमिति विमृशन्सततताभ्यासवशाद्विश्वविदितं राधावेध विधाय नगरे हट्टशोभां कारयन्तैलिकसूचिकाभ्यामवज्ञया निराकृतोत्सवाभ्यां श्रीभोजभूपो व्यज्ञप्यत । तैलिकेन चन्द्रशालास्थितेन भूमिस्थितसकीर्णवदने मृण्मयपात्रे तैलधाराधिरोपणात्, सूचिकेन च भूमिस्थितेनोर्ध्वीकृततन्तुमुखे आकाशात्पतन्त्या सूच्या विवर नियोज्य निजाभ्यासकौशल निवेद्य नृपं प्रति चेच्छक्तिरस्ति तत प्रभुरप्येवं करोत्वित्यभिधाय राज्ञो गर्व सर्व चक्राते ॥

16277

३२) भोजराज मया ज्ञात राधावेधस्य कारणम् ।
धाराया विपरीत हि सहते न भवानिति[1] ॥

१३ विद्वद्भिरिति श्लाघ्यमानो नवनगरनिवेश कर्तुकाम[2] पटहे वाद्यमाने धाराभिधया पणस्त्रियाग्निवेतालनाम्ना पत्या सह लङ्का गत्वा तं

—नृपेणोक्तम्-भो इद किमुपायनम् ? डामरस्तत्कालोत्पन्नमति प्राह–देव ' श्रीभीमेन कोटिहोम कारित, तद्भस्मेय तीर्थभूता, प्रीत्या भवन्कृते प्राभृतीकृताऽस्ति। इति तेनोक्ते हृष्टचेतसा राज्ञा स्वहस्तेन सर्वेषा समर्पिता । ते सर्वैस्तिलककरणेन वन्दिता । अन्त पुरे प्रेषिता । तत स सम्मानित प्रतिप्राभृतसहित पश्चादागत । ज्ञातवृत्तान्तेन श्रीभीमेनापि पूजित ।

पुन कौतुकाक्षिप्तचित्त श्रीभीम कस्मिन्नवसरे मुद्रामुद्रितलेख विधाय तद्धस्ते समर्प्य, उपदापणि तद्डामर मालवेऽप्रैषीत् । स उपदासहित लेख भोजहस्ते ऽदात् । यावदुन्मुद्र्य वाचयति तावदय भवता शीघ्र निपातनीय इति पश्यति । तत सविस्मयेन राज्ञा पृष्टम्–भो इद कि लिखितमस्ति । तत स उत्पातिकामति प्राह–देव ' मज्जन्मपत्रिकाया समस्ति, यत्रास्य रुधिरं पतिष्यति तत्र द्वादशवर्षप्रमाणो दुर्भिक्ष पतिष्यति इति ज्ञात्वा श्रीभीमेनाहमत्र प्रेषित स्वदेशविनाशभीतेन प्रच्छन्नलेखयुक्त । एव सति त्व यथा रुचित कुरु इति तेनोक्ते राजाह– नाहमात्मदेशप्रजामनर्थे पातयिष्ये । तत सम्मान्य विसर्जित प्राप्त स्वदेशे । तद्बुद्धिकौशलेन पुनश्चमत्कृतः श्रीभीमस्त बहुमन्यते ।

१ नैव भूपति H २ प्रवेष्टु काम H L पद्यमिदं वाग्भट्टस्य काव्यानुशासनेऽप्युदाहृतम् भोजराजस्थाने प्रज्ञापुञ्जेति पाठान्तर तत्र

नगरनिवेशमालोक्य पुन समागतया मन्नाम नगरे दातव्यमित्यभिधाय तत्प्रतिच्छन्दपट समर्प्य स धारा नगरीं निवेशयामास ।

१४ कस्मिन्नप्यहनि स नृप सान्ध्यसर्वावसरानन्तर निजनगरान्त परिभ्रमन् ॥

३३) एऊ जम्मु नग्गह गिउ भडसिरि खग्गु न भग्गु ।
तिक्खा तुरिया न माणिया गोरी गलि न लग्गु ॥

इति केनापि दिगम्बरेण पठ्यमानमाकर्ण्य प्रातस्तमाकार्य रात्रिपठितवृत्तान्तसंकेतवशेन शक्ति पृष्ट सन्—

३४) देव दीपोत्सवे जाते प्रवृत्ते दन्तिना मदे ।
एकच्छत्र करोम्येव सगौड दक्षिणापथम् ॥

इति स्वपौरुषमावि कुर्वन्सेनानीपदेऽभिषिक्त ॥

१५ इतश्च सिन्धुदेशविजयव्यापृते श्रीभीमे स दिगम्बर समस्तसामन्तै सम समेत्य श्रीमदणहिल्लपुर भङ्ग कृत्वा धवलगृहघटिकाद्वारे कपर्दिकान्वापयित्वा जयपत्र जग्राह । तदादि कुलचन्द्रेण मुषितमिति सर्वत्र क्षितौ ख्यातिरासीत् । स जयपत्रमादाय मालवमण्डले गत श्रीभोजाय त वृत्तान्त विज्ञपयन्नुक्तो भवताङ्गालवाप कथ न कारितोऽन्नरयमुद्ग्राहित्तं गूर्जरदेशे प्रयास्यतीति श्रीसरस्वतीकण्ठाभरणेन श्रीभोजेनेत्यभिदधे ॥

---

१ प्रापृते P २ कुलचद्र समेत्य H

३ १४,१५,१६ प्रबन्धानां स्थाने निम्नलिखित C आदर्शे समुपलभ्यत
नवजलभरीया मग्गडा गयणि धडक्कई मेहु ।
इत्यन्तरि जरि आविसिइ तउ जाणीसिइ नेहु ॥

एषां भूपऽभया सह० राज्ञा तानिनपुत्रीरत्नरूप दृष्ट्वा प्रातराकाय गूर्जरदेशोपरि सेनाधिपत्य ददौ तदा तेनोक्त । देव दीपति ॥ ततो गूर्जरदेश समग्रोपि तेन विनाशित । श्रीपत्तनचतुष्पथ कपर्दिका वापितास्तस्यागतस्य राज्ञोक्त । न कृत स्म्य १ अद्य प्रभृति मालवदेशदण्ड श्रीगूर्जरे यास्यतीति ॥

१६ कदाचिच्चन्द्रातपे उपविष्टे श्रीभोजे सनिहिते कुलचन्द्रे पूर्णचन्द्रमण्डलमवलोकमान इदमपाठीत्—

३५) येषा वल्लभया सह क्षणमिव क्षिप्र क्षपा क्षीयते
तेषा शीतकर शशी विरहिणामुल्केव सतापकृत् ।

इत्यर्धकविना तेनोक्ते कुलचन्द्र प्राह—

अस्माक तु न वल्लभा न विरहस्तेनोभयभ्रशिना
मिन्दू राजति दर्पणाकृतिरसो नोष्णो न वा शीतल ॥ ‡

इति तदुक्तेरनन्तरमेवैका वेराङ्गना प्रसादीचकार ॥

१७ अथ डामरनामा सान्धिविग्रहिको मालवमण्डलादायात श्रीभोजस्य सभा वर्णयन्महान्तमायलैक जनयति । तत्र गतश्च श्रीभीमस्या मात्रा रूपपात्रता वर्णयस्तद्दिदृक्षातरलित श्रीभोजस्तमिहानय तत्र वा मा नयेत्यभ्यर्थ्यमान सभादर्शनोत्कण्ठितेन भीमेन तथैवोच्यमानश्च कस्मिन्नपि वष उपायविन्महदुपायनमादाय विप्रवेषधारिण ताम्बूलकरण्डकवाहिन श्रीभीम स गृहीत्वा सदसि गत प्रणमन् श्रीभोजेन श्रीभीमानयनवृत्तान्त व्याहृत स विज्ञपयाचक्रे । स्वतन्त्रा स्वामिनोऽनभिमत कार्य केन बलात्कार्यन्ते, इति सर्वथैय कदाशा देवेन नावधारणीया इत्यभिहिते, श्रीभीमस्य वयोवणाकृतीना सादृश्य पृच्छञ्श्रीभोजस्तान्स भासदो लोकानवलोकयन्स्थगीधर लक्षीकृत्य डामरेणेत्याभिदधे—स्वामिन्

३६) इमाकृतिरय वर्ण इद रूपमिद वय ।
अन्तर चास्य भूपस्य काचचिन्तामणेरिव ॥

---

‡ पद्यमिद शार्ङ्गधरपद्धत्या (४१०६) भोजराजचोरकविकृतमिति वर्तते

१ इत्यर्ध P २ वारागना H ३ आश्चर्य ४ अतिमाना H ५ सर्वथाप्येके दासा देवेन नावधीरणीयाइत्यभिधाय P

इति तेन विज्ञप्ते चतुरचक्रवर्ती श्रीभोजस्तत्सामुद्रिकविलोकनाभिश्चलदृक्। तादृशं नृपं विमृश्योपायनवस्तून्युपनेतुं स सान्धिविग्रहिकस्तं प्राहिणोत्। तेषु वस्तुषूपनीयमानेषु तद्गुणवर्णनवार्त्तान्तरव्याक्षेपेण च भूयसि काल‌विलम्बे संवृत्ते स्थगीवाहकोऽद्यापि कियच्चिरं विलम्बत इति राज्ञा समादिष्ट स तं भीममिति विज्ञपयामास। राजा तदा तदनुपदिकानि सैन्यानि प्रगुणयन् डामरेणाभिदधे। द्वादश द्वादश योजनानां प्रान्ते प्रवहणिका हया घटिकायोजनगामिन्य करभ्योऽनया समग्रसामग्र्या श्रीभीमो भुवमाक्रमन्कथं भवता गृह्यते इति विज्ञप्तस्तेन पाणी घर्षयित्वा चिरं तस्थे।

१८ अथ श्रीभोज. श्रीमाघपण्डितविद्वत्तां पुण्यवत्तां च सततमाकर्ण्य तद्दर्शनोत्सुकतया राजादेशैः सततं प्रेष्यमाणैः श्रीमालनगराद्धिमसमये समानीय सबहुमानं भोजनादिभि· सत्कृत्य तदनु राजोचितान्विनोदान्दर्शयन्, रात्रावारात्रिकावसरानन्तरं संनिहिते स्वसंनिभे पल्यङ्के माघपण्डितं नियोज्य तस्मै स्वशीतरक्षामुपनीय प्रियालापैश्चिरं कुर्वाणः सुखं सुखेन सुष्वाप। प्रातर्माङ्गल्यतूर्यनिर्घोषैर्विनिद्रं नृपं स्वस्थानगमनाय माघपण्डित आपृष्टवान्। विस्मयापन्नहृदयेन राज्ञा दिने भोजनाच्छादनादिसुखं पृष्ट· स कदन्नसदन्नवार्त्ताभिरलं शीतरक्षाभारेण श्रान्तं विज्ञपयन्खिद्यमानेन राज्ञा कथं कथञ्चिदनुज्ञात. पुरोपवनं यावद्भूभुजानुगम्यमानः माघपण्डितेन स्वागमनप्रसादेन संभावनीयोऽहमिति विज्ञप्यं नृपानुज्ञात. स्वं पदं भेजे। तदनु कतिपयदिनैः श्रीभोजस्तद्विभवभोगसामग्रीदिदृक्षया श्रीश्रीमालनगरं प्राप्त। माघपण्डितेन प्रत्युद्गमादियथोचितभक्त्याऽऽवर्जित ससैन्यस्तन्मन्दुरायां ममौ। स्वयं तु माघपण्डितस्य सौधमध्यास्य सञ्चारकभुवं काञ्चनबद्धामवलोक्य स्नानादनु देवतावसरो·

१ निश्चलदृश P H २ करिण्य. L ३ कुमुदपण्डितसुतमाघ d ४ आकर्णयत् C ५ शीतभारेण P ६ विज्ञप्तो P ७ काचबद्धा H K

र्व्यां मणिमरकतकुट्टिमशैवलवल्लरीयुगजलभ्रान्त्या धोताम्बरीय सवृण्वन् सौवस्तिकेन ज्ञापितवृत्तान्तस्तदैव तद्देवतार्चानन्तर निवृत्ते मन्त्राव सरेऽशनसमयसमागता रसवतीमास्वादमान अकालिकैरदेशजैर्व्यञ्जनै फलादिभिश्चित्रीयमानमानस संस्कृतपथ्य शालिशालिनीं रसवतीमाकण्ठ-मुपभुज्य भोजनान्ते चन्द्रशालामधिरुह्याश्रुतादृष्टपूर्वकाव्यकथाप्रबन्धप्रे-क्षादीनि प्रेक्षमाण शिशिरसमयेऽपि सजाताकस्मिकग्रीष्मभ्रान्त्या सर्वी तसितस्वच्छवसनस्तालवृन्तकरैरनुचरैर्वीज्यमानोऽमन्दचन्दनालेपनेपथ्य सुखनिद्रया ता क्षणदा क्षणमिवातिवाह्य प्रत्यूषे शङ्खनिस्वनाद्विगतनिद्रो हिमसमये ग्रीष्मावतारव्यतिकरो[2] माघपण्डितेन ज्ञापित प्रतिसमय सविस्मय कति दिनान्यवस्थाय स्वदेशगमनायापृच्छन् स्वय का[3]रे प्यमाणनव्यभोजस्वामिप्रासाद[4]प्रदत्तपुण्यो मालवमण्डल प्रति प्रतस्थे ।

तथा निजजन्मदिने जनकेन नैमित्तिकाज्जातके कार्यमाणे पूर्वमुदितो दितसमृद्धिर्भूत्वा प्रान्ते गलितविभव किंचिच्चरणयोराविर्भूत श्वयथुविकार पञ्चत्वमाप्स्यतीति निमित्तविदा निवेदितं[5] विभवसंभारेण ता ग्रहगति निराचिकीर्षुणा माघपित्रा संवत्सरशतप्रमाणे मनुजायुषि षट्त्रिंशत्सहस्राणि दिनानि भविष्यन्तीति विमृश्य नाणकपरिपूर्णास्तावत्संख्यान् हारकान् कारितनव्यकोशेषु निवेश्य तदधिका परा भूतिं शतश समर्प्य प्रदत्त-माघनाम्ने सुताय कुलोचिता शिक्षा वितीर्य कृतकृत्यमानिना तेन विपेदे । तदनन्तरमुत्तराशापतिरिव प्राज्यसा[6]म्राज्यो विद्वज्जनेभ्य श्रिय तदिच्छया यच्छन्नमानैर्दानैरर्थिसार्थं[7] कृतार्थयस्तैर्भोगविधिभि स्वममानुपावतारमिव दर्शयन् विरचितशिशुपालवधाभिधानमहाकाव्यचमत्कृतविद्वज्जन स प्रान्ते पुण्यक्षयात्क्षीणवित्तो विपत्तिपाते स्वविषये स्थातुमप्रभूष्णु सकलत्रो माल-

१ ग्रीष्मोष्मभ्रान्त्या २ K H २ ०व्यतिकर K ३ कारित K L
४ प्रसाद P ५ निवेदिते a K ६ प्राप्त प्राज्य साम्राज्यो K L ७ तैस्तै a K

वमण्डले गत्वा धारायां कृतावासः पुस्तकग्रहणकार्पणपूर्वकं श्रीभोजात्किंयदपि द्रव्यमानेयमिति तत्र पत्नीं प्रस्थाप्य यावत्तदाशया माघपण्डितश्चिरं तस्थौ तावत्तथावस्थां श्रीभोजस्तत्पत्नीं विलोक्य ससंभ्रमः शलाकान्यासेन तत्पुस्तकमुन्मुच्य काव्यमद्राक्षीत्—

३७) कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकःप्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिललितानां ही विचित्रो विपाकः[1]॥

अथ काव्यार्थमवगम्य का कथा ग्रन्थस्य केवलमस्यैव काव्यस्य विश्वम्भरामूल्यमल्पं । समयोचितस्यानुच्छिष्टस्य हीशब्दस्य पारितोषिके क्षितिपतिर्लक्षद्रव्यं वितीर्य तां विससर्ज। सापि तत संचरन्ती विदितमाघपण्डितपत्नी कैश्चिद्भिरर्थिभिर्याच्यमाना तत्पारितोषिकं तेभ्यः समस्तमपि वितीर्य यथावस्थिता गृहमुपेयुषी तद्वृत्तान्तं विज्ञापनापूर्वं किञ्चिचरणस्फुरच्छोफाय पत्ये निवेदयामास । अथ त्वमेव मे शरीरिणी कीर्त्तिरिति श्लाघमानस्तदा स्वगृहमागतं कमपि भिक्षुं वीक्ष्य भुवने तदुचितं किमपि देयमपश्यन् संजातनिर्वेद इदमवादीत्—

२८) Tअर्था न सन्ति न च मुञ्चति मां दुराशा
दानान्न[2] सङ्कुचति दुर्ललितः करो मे ।
याच्ञा च लाघवकरी स्ववधे च पापं
प्राणाः स्वयं व्रजत किं परिदेवितेन ॥ १ ॥

---

१ अयं कथाभाग भोजप्रबन्धेऽपि वर्तते (पृ. ६३) पद्यमिदं माघकृते शिशुपालवधे वर्तते

T ३८,३९ श्लोकौ माघकवेरिति शार्ङ्गधरपद्धत्यां (४०७,४०६) भोजप्रबन्धेऽपि (२८१,२८२) सुभाषितावल्या (३१८०) कस्यापीति

२ दानाद्धि P त्यागानसङ्कुचति L त्यागान्नसंचलति दुर्ललितं मनो मे । H

३९) दारिद्र्यानलसताप शान्त सतोषवारिणा ।
दीनाशाभङ्गजन्मा तु केनायमुपशाम्यतु ॥ २ ॥

४०) न भिक्षा दुर्भिक्षे पतति दुरवस्था कथमृण
लभन्ते, कर्माणि क्षितिपरिवृढान्कारयति क ।
अदत्त्वापि ग्रास ग्रहपतिरसावस्तमयते
क याम किं कुर्मो गृहिणि गहनो जीवितविधि ॥ ३ ॥

४१) क्षुत्क्षाम पथिको मदीयभवन पृच्छन्कुतोऽप्यागत
तत्किं गेहिनि किंचिदस्ति यदय भुङ्क्ते बुभुक्षातुर ।
वाचास्तीत्यभिधाय नास्ति च पुन प्रोक्त विनैवाक्षरे
स्थूलस्थूलविलोललोचनगलद्बाष्पाम्भसा बिन्दुभि ॥ ४ ॥

४२) व्रजत व्रजत प्राणा अर्थिनि व्यर्थता गते ।
पश्चादपि हि गन्तव्य क्व सार्थ पुनरीदृश ॥ ५ ॥

इति तद्वाक्यान्त एव स माघपण्डित पञ्चत्वमवाप । प्रातस्त वृत्ता न्तमवगम्य श्रीभोजेन श्रीमालेषु सजातिषु धनवत्सु सत्सु तस्मिन्पुरुषरत्ने विनष्टे क्षुधाबाधिते सति भिल्लमाल इति तज्ज्ञातेर्नाम निर्ममे ॥

१९पुरा समृद्धिविशालाया विशालाया पुरि मध्यदेशजन्मा सौकाश्यगोत्र सर्वदेवनामा द्विजो निवसन् जैनदर्शनससर्गप्राय प्रशान्तमिथ्यात्वो धनपालशोभनपुत्रद्वयेनान्वित कदाचिदागतान्श्रीवर्द्धमानसूरीन्गुणानुरागान्निजोपाश्रये निवास्य निर्द्वन्द्वभक्त्या परितोषितान्सर्वज्ञपुत्रानिति धिया तिरोहित निजपूर्वजनिधि पृच्छस्तैर्वचनच्छलेनार्धविभाग याचित सकेतनिवेदनाल्लब्धनिधिस्तदर्ध यच्छस्तै पुत्रद्वयादर्ध याचितो ज्यायसा धनपालेन मिथ्यात्वान्धमतिना जैनमार्गनिन्दापरेण निषिद्ध कनीयसि शोभने

१ जलैवा P पद्यमिद भोजप्रबन्धेऽपि वर्तते (२८३) २ क्वसार्थ पुनरीदृश इति वाक्यान्ते H ३ तज्ज्ञातनाम P ४ काश्यपगोत्र P ५ शोभनाभिधान H

कृपापर स्वप्रतिज्ञाभङ्गपातक तीर्थेषु क्षालयितुमिच्छु प्रतितीर्थं प्रतस्थे । अथ पितृभक्तेन शोभननाम्ना लघुपुत्रेण त तदाग्रहान्निषिध्य पितु प्रतिज्ञा प्रतिपालयितुमुपात्तव्रत स्वय तान्गुरूननुससार ॥

अभ्यस्तसमस्तविद्यास्थानेन धनपालेन श्रीभोजप्रसादसम्प्राप्तसमस्तपण्डितप्रकृष्टप्रतिष्ठेन निजसहोदरामर्षभावाद्द्वादशाब्दी यावत्स्वदेशनिषिद्धजैनदर्शनप्रवेशेन तद्देशोपासकैरत्यर्थमभ्यर्थनया गुरुपुरुषेष्वाहूयमानेषु सकलसिद्धान्तपारावारपारदृश्वा स शोभननामा तपोधनो गुरूनापृच्छ्य तत्र प्रयातो धाराया प्रविशन् पण्डितधनपालेन राजपाटिकाया व्रजता त सहोदरमित्यनुपलक्ष्य सोपहास "गर्दभदन्त भदन्त नमस्ते" इति प्रोक्ते "कपिवृषणास्य वयस्य सुख ते" इति शोभनमुनेर्वचसान्तश्चमत्कृतो मया नर्मणापि नमस्ते इत्युक्तेऽनेन तु वयस्य सुख ते इत्युच्चरता वचनचातुर्या न्निर्जितोस्मीति । तत्कस्यातिथयो यूयमिति धनपालस्यालापेभवत एवातिथयो वयमिति शोभनमुनेर्वाचमाकर्ण्य बटुना सह निजसौधे प्रस्थाप्य तत्रैव स्थापित । स्वय सौधे समागत्य धनपाल प्रियालापै सपारिकरमपि त भोजनाय निमन्त्रयस्तै प्रासुकाहारसेवापरैर्निषिद्ध । बलाद्दोषहेतु पृच्छन्—

४३) भजेन्माधुकरीं वृत्तिं मुनिर्म्लेच्छकुलादपि ।
एकान्नं नैव भुञ्जीत बृहस्पतिसमादपि ॥

तथाच जैनसमये दशवैकालिके—

४४) महुकारसमा बुद्धा जे भवन्ति अणिस्सिया ।
नाणापिण्डरया दन्ता तेण वुच्चन्ति साहुणो ॥

इति स्वसमयपरसमयाभ्या निषिद्ध कल्पितमाहार परिहरन्त शुद्धाशनभोजिनो वयमिति तच्चरित्रचित्रितमना सतूष्णीकमुत्थाय सौधमाप । मज्जनारम्भे गोचरचर्यया समागत तन्मुनिद्वन्द्वमवलोक्यासिद्धेऽन्नपाके

१ प्र० L h २ मवलोक्यसिद्ध P

तद्ब्राह्मण्योपढौकिते दध्नि, मुनिभ्यां व्यतीतकियद्दिनमेतदिति पृछ्यमाने, धनपाल 'किमत्र पूतरा' सन्तीति' सोपहासमभिदधानो, व्यतीतदिनद्वयमेतदिति ब्राह्मण्या निर्णीय प्रोक्त। ताभ्यां पूतराः सन्त्यत्रेत्यभिहिते स्नानासनात्तद्दर्शनार्थमुत्थाय तत्रागतः सन् स्थालेऽधिरोपितदधिसंनिधौ यावद्यावकपुम्भेऽधिरूढैस्तद्वर्णजन्तुभिर्दधिपिण्डइव पाण्डुरतामालोक्य जिनधर्मे जीवदयाप्राधान्य तत्रापि जीवोत्पत्तिज्ञानवैदग्ध्य । यत.—

४५) मुग्गमासाइपमुह विदिल कच्चम्मि गोरसे पडइ ।
ता तसजीवुप्पत्ती भणन्ति दहिए तिदिणुव्वरिऍ ॥

तज्जिनशासने एवेति निश्चित्य शोभनमुनेः शोभनबोधात्सम्यक्प्रतिपत्तिपुरःसरं सम्यक्त्व भेजे । कर्मप्रकृत्यादिजैनविचारग्रन्थेपु प्रकृत्या प्राज्ञः परं प्रावीण्यमुद्वहन्, प्रात' प्रातर्जिनार्चावसरप्रान्ते—

४६) *कतिपयपुरस्वामी कायव्ययैरपि दुर्ग्रहो
मतिवितरतो मोहेनाहो मयानुसृत पुरा ।
त्रिभुवनपतिर्बुद्ध्याराध्योऽधुना स्वपदप्रद
प्रभुरधिगतस्तत्प्राचीनो दुनोति दिनव्यय ॥ १ ॥

४७) सव्वत्थँ अत्थि धम्मो जा मुणियं जिन न सासण तुम्ह ।
कणगाउराण कणगु व्वं ससियपयमलम्भमाणाणं ॥ २ ॥

४८) देशाधीशो ग्राममेकं ददाति
ग्रामाधीशः क्षेत्रमेक ददाति ।
क्षेत्राधीशः शिम्बिका सप्रदत्ते
सर्वस्तुष्टः संपदं स्वा ददाति ॥ ३ ॥

---

१ सन्तीत्यत्रेत्य P २ पभिई c ३ खदम्मि c ४ वितिदिण्डवरि c ५ सम्यक्तत्वं भेजे a K ६ मितवितरिता मोहेन K a ७ पद्यमिदं प्रभावकचरिते महेन्द्रसूरिप्रबन्धेऽप्यस्ति (११४)

७ सव्वत्थ c ८ कणग व. ९ सेतिकां a शाकमान b १० सर्वत्र

इत्यादीनि वाक्यानि पठन्स धनपाल ॥

२० कदाचिन्नृपेण सह मृगया नीतो धनपालोऽभिहित —

४९.) किं कारण नु धनपाल मृगा यदेते
व्योमोत्पतन्ति विलिखन्ति भुव वराहा ।
देव त्वदस्त्रचकिता श्रयितु स्वजाति-
मेके मृगाङ्कमृगमादिवराहमन्ये ॥

राज्ञा बाणेन मृगे विद्धे सति तद्वर्णनाय विलोकितमुखो धनपाल प्राह—

५०) ‡रसातल यातु तवात्र पौरुष
कुनीतिरेषा शरणो ह्यदोषवान् ।
निहन्यते यद्बलिनापि दुर्बलो
ह हा महाकष्टमराजकं जगत् ॥

इति तन्निर्भर्त्सनात्क्रुद्धो नृप किमेतदित्यभिदधाने—

५१) 'वैरिणोऽपि' हि मुच्यन्ते प्राणान्ते तृणभक्षणात् ।
तृणाहारा सदैवैते हन्यन्ते पशव कथम् ॥

इत्यूचेऽतोऽद्भुतसञ्जातकृपेण नृपेण धनुर्बाणभङ्गमङ्गीकृत्याजीवितान्त सन्यस्तमृगयाव्यसनेन पुर प्रत्यागच्छता तत्र यज्ञमण्डपे यज्ञस्तम्भनियन्त्रितच्छागस्य दीना गिरमाकर्ण्य किं पशुरसौ व्याहरतीत्यादिष्ट स धनपालोऽवधेहीति प्राह—

१ स्वागभट्टरचिते काव्यानुशासने (पृ ११) प्युदाहृत पद्यमिदम्
२ कविराज b c H २ शरणागत ३ अत्र धनपाल —रसातलमित्यादि॰ तन्निर्भर्त्सनात्क्रुद्धो नृप किमेतदित्यभिदधान वैरिणोपि—॰ c ४ वैरिणापि P ५ धनपाल प्राह B

‡ पद्यमिद प्रभावकचरिते महेन्द्रसूरिप्रबन्धे (१५०) प्यस्ति

५२) [T]नाह स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्व मया
सतुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।
स्वर्गे यान्ति यदि त्वया विनिहता यज्ञे ध्रुव प्राणिनो
यज्ञं किं न करोषि मातृपितृभि पुत्रैस्तथा बान्धवै ॥

इति तद्वाक्यानन्तर राज्ञा किमेतदिति भूयोऽभियुक्त —

५३) यूप कृत्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येव गम्यते स्वर्गे नरके केन गम्यते ॥ १ ॥

५४) सत्य यूप तपो ह्यग्नि· कर्माणि समिधो मम ।
अहिंसामाहुति दद्यादेव यज्ञ सता मतं ॥ २ ॥

इत्यादि शुकसवादोदितानि वचासि नरेन्द्रस्य पुरत पठन् हिंसाशास्त्रोपदेशिनो हिंसकप्रकृतीन्ब्राह्मणरूपेण राक्षसास्तान्ज्ञापयन्नृपमर्हद्धर्माभिमुख चकार ॥

२१ अथ कस्मिन्नप्यवसरे नरेश्वर सरस्वतीकण्ठाभरणप्रासादे व्रजन्सदा सर्वज्ञशासनप्रशसापर पण्डित धनपालमाल्पत् । सर्वज्ञस्तावत्कदाचिदासीत्तद्दर्शने साम्प्रत कश्चिज्ज्ञानातिशयोऽस्तीत्यभिहिते, अर्हच्चूडामणिग्रन्थे विश्वत्रयस्य त्रिकालवस्तुविषयस्वरूपपरिज्ञानमद्यापि विद्यत इति तेनोक्ते, त्रिद्वारमण्डपे स्थित कस्मिन्द्वारेऽस्माक निर्गम इति शास्त्रकल्पद्वारोपणोद्यते नृपे बुद्धिमात्रा त्रयोदशीति पाठ सत्यापयता भूर्जपत्रे नृपप्रश्ननिर्णयमालिख्य मृण्मयगोलके निधाय च छगिकाधरस्य त समर्प्य देव पादोऽवधार्यतामिति नृप प्राह । नृपस्तद्बुद्धिसङ्कटे निपतित स्व मन्यमान एतद्द्वारत्रयस्य मध्यात्किमपि निर्णीत भविष्यतीति विमृश्य सूत्रभृ-

T पद्यमिद प्रभावकचरिते महेन्द्रसूरिप्रबन्धे (१३८) ऽप्यस्ति

१ प्राणा ह्यग्निर्यो C २ एष यज्ञ सनातन B K ३ श्रुतिमशाद॰ B H
४ अर्हन्तश्रीचूडामणिनामनि d ५ निर्णयस्तु बुद्धिमात्रगम्य इति लोकोक्ति, तत्स्थानेऽधुना सर्वसिद्धा त्रयोदशीति ज्योतिर्विद । इति प्रथमसस्कृता ६ नृपस्तु बुद्धि K

द्विर्मण्डपपद्मशिलातलमपनीय तन्मार्गेण निर्गत्य तं गोलकं भित्त्वा तेष्वक्षरेषु तमेवनिर्गमनिर्णयं वाचयंस्तत्कौतुकोत्तालचित्तः श्रीजिनशासनमेव प्रशशंस। तथाहि—

११) द्वाभ्यां यत्र हरिस्त्रिभिर्न च हरः स्रष्टा न चैवाष्टभि-
र्यत्र द्वादशभिर्गुहो न दशकद्वन्द्वेन लङ्कापतिः।
प्रत्नेन्द्रो दशभि· शतैर्न जनता नैत्रैरसंख्यैरपि
तत्प्रज्ञानयनेन पश्यति बुधश्चैकेन वस्तु स्फुटम् ॥[1]

२२ अथ धनपालः ऋषभपञ्चाशिकास्तुतिं निर्माय, सरस्वतीकण्ठाभरणप्रासादे स्वनिर्मितप्रशस्तिपट्टिकां राज्ञे कदाचिद्दर्शयामास तत्र।

---

१ मु. जि. F आदर्शेऽत्र निम्नलिखितमधिकं कथनमुपलभ्यते–
अन्यदा जलाश्रयपृच्छा–

सत्यं वप्रेषु शीतं शशिकरधवलं वारि पीत्वा प्रकामं
व्युच्छिन्ना शेषतृष्णा प्रमुदितमनसः प्राणिसार्था भवन्ति।
शोषं नीते जलौघे दिनकरकिरणैर्यान्त्यनन्ता विनाशं
तेनोदासीनभावं भजति मुनिगण· कूपवप्रादिकार्ये ॥

कदाचित् स्वकारितप्रौढतरनवसरसि गतो नृप., कीदृगिदं धर्मस्थानमिति पृच्छति। धनपालः प्राह–

एषा तटाकमिषतावकदानशाला मत्स्यादयो रसवती प्रगुणा सदैव।
पात्राणि यत्र बकसारसचक्रवाकाः पुण्यं कियद् भवति तत्तु वयं न विद्म· ॥

तथातश्चकोप। पुरमागच्छन् मार्गे बालिकासहितां वृद्धां जरया शिरो धूनयन्तीं दृष्ट्वा नृपः पृच्छति–किं शिरो धूनयति। ततो धनपालः–

किं नन्दी किं मुरारि· किमु रतिरमणः किं विधु किं विधाता
किं वा विद्याधरोऽसौ किमुत सुरपतिः किं नल किं कुवेरः।
नायं नायं न चायं न खलु नहि न वा नापि नासौ न चासौ
क्रीडां कर्तुं प्रवृत्त· स्वयमपि च हले भूपतिर्भोजदेवः ॥
अनेन नृपं हृष्टं तोषयामास।

२ धनपालरचिता ऋषभपञ्चाशिका अद्याप्युपलभ्यते ३ पट्टिकायांकदाचिन्नृप· C

५६) अभ्युद्धृता वसुमती दलितं रिपूरः
क्रोडीकृता बलवता बलिराज्यलक्ष्मीः ।
एकत्र जन्मनि कृतं तदनेन यूना
जन्मत्रये यदकरोत्पुरुषः पुराणः ॥*

काव्यमिदं निर्वर्ण्य पारितोषिके तस्याः पट्टिकायाः काञ्चनकलशं ददौ नृपः । तस्मात्प्रासादादपसरंस्तदीयद्वारखत्तके रत्या सह हस्ततालदानपरं स्मरं मूर्त्तिमन्तमालोक्य नृपेण हासहेतुं पृष्टः पण्डितः प्राह—

५७) ‡स एव भुवनत्रयप्रथितसंयमः शंकरो
बिभर्ति वपुषाधुना विरहकातरः कामिनीम् ।
अनेन किल निर्जिता वयमिति प्रियायाः करं
करेण परिताडयन् जयति जातहासः स्मरः ॥ १ ॥

२३)५८) अन्नदिणे सिवभवणे दुवारदेसे निए वि भङ्गिगणं ।
किं दुव्बलो पलोइअ निवपुट्ठो भणइ धणपालो ॥ २ ॥

५९) दिग्वासा यदि तत्किमस्य धनुषा तच्चेत्कृतं भस्मना
भस्माथास्य किमङ्गना यदि च सा कामं पुनर्द्वेष्टि किम् ।
इत्यन्योन्यविरुद्धचेष्टितमहो पश्यन्निजस्वामिनो
भृङ्गी सान्द्रशिरापिनद्धपरुषं धत्तेऽस्थिशेषं वपु ॥ ३ ॥

६०) पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।
अङ्कुरित इव मनोभूर्यस्मिन्भस्मावशेषोऽपि ॥ ४ ॥

---

* पद्यमिदं भोजप्रबन्धे (२१६) प्यस्ति

१ हास्य c d

‡ प्रभावकचरिते महेन्द्रसूरिप्रबन्धे (१६२) तथा च हैमकाव्यानुशासने टीकायां विद्यते पद्यमिदम्

२ सुभाषितावल्यां (२३९९) पद्यमिदं वर्तते प्रभावकचरिते च श्रीमहेन्द्रसूरिप्रबन्धे (१३०) ३ गोवर्धनसप्तशत्यामिदम्

वितान्तं कवित्वस्य संन्यास एवेति तत्प्रतिश्रवसमकालमेव यानपात्रे निर्यामकान्निक्षेप्यावगाह्यमाने नीरधौ षड्भिर्मासैस्तं प्रासादमासाद्य पुनर्भदनपट्टिकायां न्यस्तायामिदमेवोत्तरार्धमागतमालोक्य तस्मै तदुचितं पारितोषिकं प्रसादीचकार ॥ इति खण्डप्रशस्तेर्यथाश्रुतानि बहूनि काव्यानि मन्तव्यानि ॥

२५ कदाचिद्राज्ञा सेवाश्लथतां पृष्टः, स्वं पण्डितस्तिलकमञ्जरीगुंम्फवैयग्र्यं जगौ । शिशिरयामिन्याश्चरमयामे निर्विनोदत्वात्तां प्रथमादर्शप्रतिमानीय पण्डितेन व्याख्यायमानां तिलकमञ्जरीकथां वाचयंस्तद्रसनिपातभीरुः पुस्तकस्याधः कच्चोलकयुतसुवर्णस्थालस्थापनापूर्वं तां समाप्य तच्चित्रकवितार्चिचीयमाणचित्तो नृपः पण्डितं प्राह । मामत्र कथानायकं कुर्वन् विनतायाः पदेऽवन्तीमारोपयन् शक्रावतारतीर्थस्य पदे महाकालमाकलयन् यद्याचसे तत्तुभ्यं ददामीत्यभिदधाने नृपे खद्योतप्रद्योतनयोः सर्षपकनकाचलयोः काचकाञ्चनयोः धत्तूरकल्पपादपयोरिव तेषां महदन्तरमित्युच्चरन्—

६७) दोमुहय निरक्खर लोहमइयँ नाराय तुज्झ किं भणिमो ।
गुञ्जाहि समं कणयं तोऽन्तु न गउसि पायालं ॥

इत्याक्रोशपरे तस्मिन् जाज्वल्यमानेऽग्नौ श्रीभोजः तां मूलप्रतिमिन्धनीचकार । अथ स द्विधा निर्वेदभाग् द्विधाऽवाङ्मुखो निजसौधपश्चाद्भागे जीर्णमञ्चाधिरूढो निःश्वसन् भृशं सुष्वाप । बालपण्डितया तत्सुतया सभक्तिकमुत्थाप्य स्नानपानभोजननिर्मापणानन्तरं तिलकमञ्जरी* प्रथमादर्शलेखदर्शनात्संस्मृत्य ग्रन्थस्यार्धं लेखयांचक्रे तदुत्तरार्धं नूतनीकृत्य ग्रन्थः समर्थितः ॥

१ सः C d २ ग्रन्थ H ३ लोहमयी a ४ किंतिय B ५ श्रीभोजे P
* अयं तिलकमञ्जरीग्रन्थो मुद्रित
६ प्रथमादर्शलेखनात् c d

२६ अन्यदा भोजसभायां काव्यमिदमुक्तं तेन—

६८) धाराधीश धरामहीशगणने कौतूहलीवानयं
वेधास्त्वद्गणनां चकार खटिकाखण्डेन रेखां दिवि ।
सैवेयं त्रिदशापगा समभवत्त्वत्तुल्यभूमिधवा-
भावात्त्यजति स्म सोयमवनीपीठे तुषाराचलः[1] ॥

अपरपण्डितैरस्मिन्काव्ये उपहसिते धनपालेनोक्तम्—

६९) *शैलैर्बन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधिं
व्यासः पार्थशरैस्तथापि न तयोरत्युक्तिरुद्भाव्यते ।
वस्तु प्रस्तुतमेव किंचन वयं ब्रूमस्तथाप्युच्चकै-
र्लोकोयं हसति प्रसारितमुखस्तुभ्यं प्रतिष्ठे नमः ॥

एकदा राजन्महाभारती कथा श्रूयतामित्युक्ते पण्डितं प्रति परमार्हतेन तेन प्रत्युक्तं—

७०)Tकानीनस्य मुनेः स्वबान्धववधूवैधव्यविध्वंसिनो
नेतारः किल पञ्च गोलकसुताः कुण्डाः× स्वयं पाण्डवाः ।
तेमी पञ्च समानजानय[1] इति ख्यातास्तदुत्कीर्तनं
पुण्यं स्वस्त्ययनं भवेद्यदि नृणां पापस्य कान्या गतिः ॥

२७ अधुना किमपि प्रबन्धादि क्रियमाणमास्ते नृपेणेत्युक्ते धनपालः प्राह—

७१) [2]आरनालगलदाहशङ्कया
मन्मुखादपगता सरस्वती ।

१ पद्यमिदं भोजप्रबन्धे (२१०) प्यस्ति

* पद्यमिदं सदुक्तिकर्णामृते ५-३७३ धर्मकीर्तेरिति तत्र च पाठान्तरं तृतीये पदे 'वागर्थौ च तुलाधृताविव तथाप्यस्मत्प्रबन्धानयं' T पद्यमिद सुभाषितावल्या ३०४४ धर्मविवेकादुद्धृतं बोथलिक महाशयेन (सुभाषितावलि notes p. 93) तत्र चतुर्थं पदं यथा—देपा कीर्तनमामनन्ति मुनयो धर्मस्य सूक्ष्मा गतिः × अमृते जारजः कुण्डो मृते भर्तरि गोलकः १ समानजातय P २ भोजप्रबन्धे पद्यमिदं (२८८)

७९) *सुरताय नमस्तस्मै जगदानन्ददायिने ।

इति प्रोक्ते—

आनुषङ्गि फलं यस्य भोजराज भवादृशाः ॥

इति विजययोक्ते राजा सत्रपमधोमुखः तस्थौ । ततो राजा तां भोगिनीं चक्रे ।

अन्यदा तया जालान्तरे, चन्द्रकरस्पर्शेऽपाठि—

८०) †अलं कलङ्कशृङ्गार करस्पर्शनलीलया ।
चन्द्र चण्डीशनिर्माल्यमसि न स्पर्शमर्हसि ॥
इत्यत्र बहु वक्तव्यं परंपरया तत्तु ज्ञातव्यम् ॥

इति शीता (सीता) पण्डिताप्रबन्धः ॥

२९ अथ मयूरबाणाभिधानौ भावुकशालकौ पण्डितौ निजविद्यया मिथः स्पर्धमानौ नृपसदसि लब्धप्रतिष्ठावभूतां कदाचिद्बाणपण्डितो जामिमिलनाय तद्गृहं गतो निशि द्वारप्रसुप्तो भावुकेनानुनीयमानां जामिं निशम्य तत्र दत्तावधान इत्यशृणोत्—

८१) ×गतप्राया रात्रिः कृशतनु शशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो
इति भूयो भूयस्तेन त्रिपदीमुदीर्यमाणामाकर्ण्य ।
कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् ॥

इति भ्रातृमुखात्तूर्यं पदमाकर्ण्य क्रुद्धा सा सत्रपा च कुष्ठी भवेति तं भ्रातरं शशाप इति । पतिव्रताव्रतप्रभावात्तदात्वप्रसूतरोगः प्रातः शीतरक्षा-

---

* भोजप्रबन्धे वर्तते पद्यमिदं (२८९) शार्ङ्गधर पद्धत्यां (५११) सरस्वतीकुटुम्बदुहितुरिति १ मुखं C D † वाग्भट्टालकारेऽप्युदाहृतं पद्यमिदम् × सुभाषितावल्यां (१६१२) बाणस्येति शार्ङ्गधरपद्धत्या (३७१३) च कस्यापीति २ इमां H ३ तदात्वे प्रसृतप्रभूतरोगः C D तदा च प्रभूतप्रसूतरोगः H B

पिहिततनुर्नृपसभायामायातो मयूरेण मयूरेणेव कोमलगिरा वेरकोडीति त प्राकृतशब्दे प्रोक्ते चतुरचक्रवर्ती नृपो बाण सविस्मय प्रेक्षमाणस्तेन प्रस्तावान्तरे देवताराधनोपायश्चेतस्यन्तरायाचक्रे । बाणस्तु सापत्रपस्तत उत्थाय नगरसीमनि स्तम्भमरोप्य खदिराङ्गारपूर्णमध कुण्ड विधाय स्तम्भाग्रवर्तिनि सिक्कके स्वयमधिरूढ *सूर्यस्तुतौ प्रतिकाव्यप्रान्ते सिक्ककपद छुरिकया छिन्दन् पञ्चभि काव्यैस्तेन पञ्चसु पदेषु छिन्नेषु सिक्ककाग्रे विलग्न षष्ठेन काव्येन प्रत्यक्षीकृतभानुस्तत्प्रसादात्सद्य सजातजात्यकाञ्चनकाय । अन्यस्मिन्नहनि स सुवर्णचन्दनावलिप्ताङ्ग सवीतसितदिव्यवसन समाजगाम । तद्वपु पाटव पश्यता नृपेण सूर्यवरप्रसाद मयूरे विज्ञपयति बाणो बाणनिभया गिरा त मर्मणि विव्याध । यदि देवताराधन सुकर तदा त्वमपि किमपीदृक् चित्रमावि कुरु । इत्यभिहिते तेन मयूरेण त प्रति प्रतिवच सदधे । निरामयस्य किमायुर्वेदविदा तथापि तव वच सत्यापयितु निजपादौ च पाणी छुर्या विदार्य त्वया षष्ठे काव्ये सूर्य परितोषितोऽह तु पूर्वस्य काव्यस्य षष्ठेऽक्षरे भवानीं परितोषयामीति प्रतिश्रुत्य सुखासनमासीनश्चण्डिकाप्रासादपश्चाद्भागे निविष्टो मा भाङ्क्षीर्विभ्रममिति षष्ठेऽक्षरे‡ प्रत्यक्षीकृतचण्डिकाप्रसादात्प्रत्यग्रप्रथमानवपु पल्लव स्वसन्मुख च तत्प्रासादमालोक्याभिमुखागतैर्नृपतिप्रमुखराजलोकै कृतजयजयारवो महता महेन पुर प्राविक्षत् ।

---

१ वरकोढी b वक्रोढी d　२ तत d　३ चिन्तयाचक्रे H c　४ शिक्यके d

* सूर्यशतकं मयूररचित न बाणकृत काव्यमालाया च प्रसिद्धम्

५ कायकान्ति b L　६ आराधनाय a

‡ चण्डीशतक तु बाणरचित न मयूरकृतम् काव्यमालाया च प्रसिद्धम् तस्य प्रथम श्लोक इत्थ समग्र B आदर्शे प्रदत्त —

मा भाङ्क्षीर्विभ्रम भ्रूरधरविधुरता केयमास्यस्य राग
पाणौ प्राण्येव नायं कलयसि कलहश्रद्धया किं त्रिशूल ।
इत्युद्युक्तोपकेतून्प्रकृतिमवयवान्प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्न्यमुया मरुदसुहृदसून्संहरन्नङ्घ्रिरद्य ॥

३० एतस्मिन्नवसरे मिथ्यादृशां शासने विजयिनि सम्यग्दर्शनद्वेषिभिः कैश्चित्प्रधानपुरुषैर्नृपोऽभिदधे । यदि जैनमते कश्चिदीदृग्प्रभावाविर्भावः प्रभवति तदा सिताम्बराः स्वदेशे स्थाप्यन्ते नो चेन्निर्वास्यन्ते इति तद्वचनानन्तरं श्रीमानतुङ्गाचार्यास्तत्राकार्य निजदेवतातिशयं कमपि दर्शयन्तु[1] इति राज्ञा भणितं । ते प्राहुः—मुक्तानामस्मद्देवतानामत्र कोऽतिशयः संभवति तथापि तत्किंकराणां सुराणां प्रभावाविर्भावः कोऽपि विश्वचमत्कारकारी दर्श्यत[2] इत्यभिधाय[3] चतुश्चत्वारिंशता[4] निगडैर्निजमङ्गं नियमितं कारयित्वा तन्नगरवर्तिनः श्रीयुगादिदेवस्य प्रासादपाश्चात्यभागे स्थितो मन्त्रगर्भं *भक्तामरेति नवं स्तवं कुर्वन्प्रतिकाव्यं भग्नैकैकनिगडशृङ्खलासंख्यैः काव्यैः पर्याप्तस्तवोऽभिमुखीकृतप्रासादः शासनं प्रभावयामास ॥ इति श्रीमानतुङ्गाचार्यप्रबन्धः ॥

३१ अथ कदापि राजा स्वदेशपण्डितानां पाण्डित्यं श्लाघमानो गूर्जरदेशमविदग्धतया निन्दन् स्थानपुरुषेणाभिदधे । अस्मद्देशीयबालगोपालस्यापि[5] भवदीयपण्डिताग्रणीः कोऽपि तुलां नारोहतीति । §ततः ज्ञापितवृत्तान्तः श्रीभीमः कदापि गोपवेषधारिणं पण्डितं पणस्त्रियं च तत्र

१ ततस्तौ स्पर्द्धया काश्मीरं गतौ इत्यधिकः पाठः d आदर्शे २ दर्शयत L d ३ अभिहिते L H ४ ततश्चत्वारिंशत् c d

* भक्तामरस्तोत्रं श्रीमानतुंगाचार्यरचितं प्रसिद्धमस्ति

५ देशीयबालगोपालयोः c H

§ B H आदर्शयोरत्रैवं पाठ –विज्ञप्ते नृपस्तं वृथा भाषिण चिकीर्षुः आकारसंवृत्त्या कियन्तमपि कालं विलम्बमान स्थानपुरुषेण तद्वृत्तान्ते ज्ञापितः श्रीभीमः स्वदेशसीमान्तनगरे विदग्धाः काश्चित्पणस्त्रियः काश्चन गोपवेषधारिणः पण्डितांश्च मुक्तवान् । अन्यदा श्रीभोजदौवारिकेण, तत्रागत्य कश्चिद्द्विधो गोपः प्रतापदेवीनाम्नीं पणस्त्रियं स गृहीत्वा विदग्धलोकसुधासारां धारामासाद्वाप्य तां क्वापि सज्जनाकृते विमुच्य प्रत्यूपसुखे भूपाय गोपे निवेदिते श्रीभोजेन किमपि वदेत्यादिष्टः—

प्रहितवान् । तत्र प्रत्यूषे नृपसमीपे नीतो गोपालः श्रीभोजेन किमपि निवेदयेत्यादिष्टः

(८२) भोय ए हु गलि[1] कण्ठुलउ भण केहउँ पडिहाइ ।
उर लच्छिहि[3] मुह सरसति सीम निबद्धि काईं ॥

T सरस्वतीकण्ठाभरणगोप इत्याह ततो राजा तदुक्तिविस्मितः T । सभायामलङ्कृतायां नेपथ्यधारिणीं पणस्त्रियं पुरो विलोक्य तां प्रति 'इह किं' इत्याकस्मिकं वचः श्रीभोजः समादिशत् । अथ स्वजातिपक्षपातादिव सरस्वत्याः प्रसादपात्रं शेमुषीनिधिः सा सुमुखी शरीरिणी प्रतिभेव गम्भीरमपि तद्वचनतत्त्वमवगम्य, पृच्छन्तीति नृपं प्रति वचः प्रथितवतीत्युचिततद्वचनैर्विकसितास्येन भोजेन लक्षत्रये दाप्यमानेऽज्ञाततत्त्वतया[†] त्रिरुक्तोऽपि कोशाधिपो यदा न ददाति तदा तं प्रकाशमाह । देशसात्म्यात्प्रकृतिकार्पण्याच्च लक्षत्रयमस्यै दाप्यते । औदार्यात्तु साम्राज्यमपि दीयमानमल्पतरमेव स्यादित्यादिष्टे समस्तसमाजलोकैः प्रेर्यमाणः स तयोर्वचनयोरन्वयं पृष्ट इत्यभिदधे । कर्णान्तविश्रान्तमपाङ्गाञ्जनरेखायुगं युगपदस्या निरूप्य मयेह किमित्यभिहितं । अनया तु द्विवचनस्य बहुवचनमिति प्राकृतलक्षणात्पृच्छन्तीति कर्णाभ्यर्णेऽञ्जनरेखामिषात् । यो भवद्भ्यां श्रुतपूर्वः स एवायं श्रीभोज इति निर्णेतुं दृशौ गते इत्युत्तरं प्रतिपादितं तदियं प्रत्यक्षरूपा भारती तदस्याः पारितोषिके लक्षत्रयं कियदिति ततो लक्षत्रयस्य त्रिर्व्याहारान्नवलक्षांस्तस्यै दापयामास ॥

१ भोज एव हु वण्ठलउ a २ स्तभन्उ वचुल a ३ लच्छिहिं c
४ काइ c उरि लाच्छिहि मुहि c सीम विहली कोइ c

T T स्थाने इति तदुक्तिमाकर्ण्य विस्मयस्मेरमानसः H आदर्शे पाठः

५ सुमुखी शिरोमणी P ६ तद्वचोवगम्य B H c ७ वचमा D ८ विकसितवदनाम्भोजेन d

† तस्मिन्स्तब्धता भजमाने B H आदर्शयोरधिकापङ्क्तिः

९ प्राकृतसूत्रलक्षणात् A H वररुचिकृतप्राकृतप्रकाशे वर्तते चैतादृशं सूत्रम् । १० गत इत्याद्युत्तरं दत्तवती प्रज्ञावदातवाचस्पतीनामपि पण्डितानां योऽर्थोऽविषयस्तं सहसैवोद्गिरन्ती B H ११ लक्षान्प्रत्यक्षान् H

३२ अथावाल्यादेव स नृपः—

८३) *मस्तकस्थायिनं मृत्युं यदि पश्येदयं जनः।
आहारोऽपि न रोचेत किमुताकार्यकारिता॥

इति विज्ञाततत्त्वो धर्मेऽप्रमत्तोऽभूत्। कदाचिन्निद्राभङ्गानन्तरं कश्चिद्द्विपश्चित्समेत्य वेगवति तुरगेऽधिरूढस्त्वां प्रति प्रेतपतिरुपैतीत्यनुसारेण धर्मकर्मणि सज्जीभवितव्यमिति वचनाधिकारिणे पण्डिताय प्रत्यहमुचितदानं ददानः कदापि पराह्णे सभासिंहासने उपविष्टः। स्थगिकावित्तसमर्पितबीटकात्प्रागेव मुखे पत्रं क्षिप्त्वाभ्यवहरन् व्यवहारवेदिभिस्तत्कारणं पृष्ट इत्यवदत्। कृतान्तदन्तान्तरवर्तिनां मनुष्याणां यद्दत्तं यच्च भुक्तं तदेवात्मीयं परस्य तु संशय। तथाच—

८४) उत्थायोत्थाय बोधव्यं किमद्य सुकृतं कृतम्।
आयुषः खण्डमादाय रविरस्तं प्रयास्यति॥ १ ॥×

८५) लोकः पृच्छति मे वार्त्तां शरीरे कुशलं तव।
कुतः कुशलमस्माकमायुर्याति दिने दिने॥ २ ॥

८६) श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्।
मृत्युर्न हि परीक्षेत कृतं वास्य न वा कृतम्॥ ३ ॥¶

८७) मृतो मृत्युर्जरा जीर्णा विपन्नाः किं विपत्तयः।
व्याधयो बाधिताः किं तु हृष्यन्ति यदमी जनाः॥ ४ ॥

इत्यनित्यताश्लोकचतुष्कप्रबन्धः॥‡

---

* श्लोकः सुभाषितावल्यां (३२६७) वर्तते *

१ अकृत्य C

२ पत्रं मुखश्रीटिकयाभ्यवहरन् व्यवहारवेदिभिर्विज्ञप्त इति श्लोकचतुष्टयं जगाद a H

× हितोपदेशे सुभाषितावल्यां (३२९०) च वर्तते

३ पूर्वाह्ह चापराह्णिकम् C

¶ महाभारते शान्तिपर्वणि सुभाषितावल्यां (३२८१) च वर्तते

४ व्याधिताः C K ५ मोदन्ति C

‡ अनित्यताश्लोकचतुष्कप्रबन्धः a H L C आदर्शान्मुक्त्वान्यत्र नोपलभ्यते

३३ अथान्यदा श्रीभोज श्रीभीमभूपतेः पार्श्वाद्दूतमुखेन वस्तुचतुष्टयमयाचिष्ट । १ एकं वस्तु इहास्ति परत्र नास्ति २ द्वितीयं परत्रास्ति अत्र नास्ति ३ तृतीयमुभयत्रास्ति ४ चतुर्थमुभयत्रापि नास्ति इति विदुषां संदिग्धेऽर्थे पटहे वाद्यमाने गणिकावचनाद्वेश्यातपस्विदानेश्वरद्यूतकाररूपं वस्तुचतुष्टयं प्रहितमिति। वस्तुचतुष्टयप्रबन्धः ॥

३४ अन्यदा भोजनृपो वीरचर्यया परिभ्रमन्निशि कयाचिदपि दरिद्रवध्वा ।

८८) माणुसडा दस दसे दसा सुणियई लोयपसिद्ध ।
महं कन्त ह इक्क दसा अवरि नवोरहिं लिद्धं ॥

इति पठ्यमानमाकर्ण्य तस्या दुस्थावस्थया संजातकृपो नृपः प्रातस्तत्पतिं सदस्यानीय तस्या किमप्यायतिहितं विमृश्य बीजपूरकद्वये प्रत्येकलक्षमूल्यं रत्नं तदुपकारायान्तर्विधाय तस्मै प्रसादीकृतवान् । तेनापि तं वृत्तान्तमजानता मूल्येन पत्रशाकापणे विक्रीतं तेनाप्युपायनाय तन्मातुलिङ्गद्वयं कस्यापि समर्पितं तेन श्रीभोजस्यैव समर्पितं ॥

८९) वेलामहल्लकल्लोलपल्लिहं[10] जइ वि गिरिनिई पत्त ।
अणुसरइ मग्गलग्ग पुणोवि रयणायरे रयण ॥

*इत्यनुभवाद्भाग्य नृपस्तथ्यमेव मेने यतः—

९०) प्रीणिताशेषविश्वासु वर्षास्वपि पयोलवम् ।
नाप्नुयाचातकों नूनमलभ्य लभ्यते कुतः ॥*

इति बीजपूरकप्रबन्धः ॥

---

१ प्रहीयता d २ दुर्विध d ३ माणसडी b ४ हवइ d ५ माणसडा दसइं देवेहि निम्मवियाइं c ६ मुज्झ C ७ नवोरिहि हरियाइ ते वोरहिं C ८ लक्षमूल्यरत्नद्वयं फलद्वयोपकारार्थ H· L ९ उपचौकितम् d १० पल्लियं a पिल्लिय c d

* ~ तारकद्वयान्तर्गतः पाठ. a आदर्शे नोपलभ्यते

३८ अथान्यदा कस्यामपि निशि नृप एको न भव्य इति प्रच्छन्नं क्रीडाशुकं पाठयित्वा प्रातस्त्वया वाक्यमिदमुच्चारणीयमिति शिक्षितवान्। अथ तेन तथाभिधीयमाने नृपेण पृष्टाः पण्डिता निर्णयमजानन्तः षाण्मासीमवधिं[1] याचितवन्तः। ततस्तन्मुख्यो वररुचिस्तन्निर्णयाय देशान्तरं परिभ्रमन्केनापि पशुपालेनाहमेवामुं निर्णयं भवत्स्वामिने निवेदयिष्यामि। परममुं श्वानं वृद्धतया नोद्वोढुं वत्सलतया न मोक्तुं च शक्नोमीति तेनोक्ते तं श्वानं निजस्कन्धे समारोप्य पशुपालं सह नीत्वा नृपसभामुपागतस्तमुत्तरकारिणं निवेदयामास। अथ स पशुपालो नृपेण तदेव वचनं पृष्टः। अस्मिन् जीवलोके राजन् लोभ एवैको न भव्यः। राज्ञा कथमिति भूयोऽपि पृष्टः। यद्ब्राह्मणः श्वानं स्कन्धदेशेनास्पृश्यमपि वहति तल्लोभस्यैव विजृम्भितमतो लोभ एव न भव्यः* इति एको न भव्यः प्रबंधः॥

३६ अथान्यदा मित्रमात्रसहायो नृपतिर्निशि परिभ्रमन्पिपासाकुलतया पणरमणीगृहं गत्वा मित्रमुखेन जलं याचितवान्। ततोऽनुच्छवारसस्याच्छभल्या कालविलम्बनेनेक्षुरसपूर्णः करकः सखेदमुपानीयत। मित्रेण खेदकारणे पृष्टे, एकस्यामिक्षुलतायां[3] पुरा रससंपूर्णः सवाहटिको घट आसीत् साम्प्रतं तु प्रजासु विरुद्धमानेसे नृपे चिरकालेन केवला वाहटिकैव भृतेति खेदकारणं। नृपस्तदाकर्ण्य केनापि वणिजा शिवा-

१ षण्मासीं यावत्याचितव्यवधानाः H L २ तन्निघृक्षयाचक्रान्तरितं श्वानं H L क्ष्म H L आदर्शयोः निम्नलिखितमुपलभ्यते–यत —

अहो लोभस्य साम्राज्यमेकच्छत्रमहीतले।
ताक्वीर्त्तिर्विनीतत्वमतिशीलं कुलीनता।
यावज्जगज्जयी लोभ क्षामं नाभ्येति जन्तुषु॥
(पद्यमिदं H आदर्शप्रान्ते लिखित)

इत्युच्चरन्कथमपि भूयोऽनुयुक्त श्वानं दधानं विप्रमपगतावरणं दर्शयन् लोभवशविसंस्थुलवृत्तिं ज्ञापयामास।

३ शूलेन भिद्यमानाया रसः परिपूर्णः सवोद्दटिको घट आसीत H c
४ विरुद्धमानसाय a P

यतने महति नाटके कार्यमाणे तल्लुण्टनचित्तमात्मानं विमृश्य तद्वच स्तथ्यमेवेति' ततो व्यावृत्य स्वस्थानमासाद्य निद्रां सिषेवे । अथ परेद्युः प्रजासु संजातकृपो नृपः पणाङ्गनागृहं गतः । तदा च तयाद्य प्रजासु वत्सलो नृपतिरिति प्रचुरेक्षुरससंकेतादिति व्याहरन्त्या राजा तोषितः ॥ इतीक्षुरसप्रबन्धः ॥

३७ अथ धारानगर्याः शाखानगरे प्रासादस्थिताया गोत्रदेव्या नमश्चिकीर्षया नित्यमागच्छन् कैदापि तद्भक्तिरञ्जितया देव्या स नृपः साक्षादभ्यधायि । परबलं सन्निहितमागतं ततः शीघ्रं व्रजेति विसृष्टः क्षणाद्गूर्जरसैन्यैः स्वं वेष्टितमालोक्य जवाधिकेन वाजिना व्रजन् धारानगरगोपुरे प्रविशन्नाल्याकोल्याभिधानाभ्यां गूर्जराश्ववाराभ्यां तत्कण्ठे धनुषी प्रक्षिप्य, एतावता व्यापादितोऽसीति वदद्भ्यां त्यक्त ॥

९१) असौ गुणी नमत्वेव भोजः कण्ठमुपेयुषा ।
धनुषा गुणिना यश्चापश्यदश्वान्निपातितः ॥ १× ॥
इत्यश्ववारप्रबन्ध ॥

३८ अथान्यदा स एव राजा राजपाटिकायाः प्रत्यावृत्तः पुरगोपुरे सुँ-

---

१ दध्यौ पुनः स वसुधाधव. सौधमध्यास्य निद्रावसरे संजातकृपः प्रजासु । परस्मिन्नहनि पणाङ्गनागृहमुपगतस्तत्कालागतया तयाद्य प्रजासु वत्सलो नृपतिरिति C H

२ कदाचिद्वेलाव्यतिक्रमे जाते सति प्रत्यक्षीभूतया देवतया मितपरिच्छदं द्वारप्रदेशमागतमकस्मान्नृपमालोक्य ससंभ्रमान्निपेदुषी निजासनमतिचक्राम । नृपः प्रणामपूर्वकं तं वृत्तान्तं पृच्छन् सन्निहितं परबलमागतं विचिन्त्य शीघ्रं व्रजेति विसृष्टे देवतया क्षणात् गूर्जरसैन्यैर्वेष्टितं स्वमपश्यत् B C d H

+ कीर्तिकौमुद्यामेवं पाठः श्लोकस्यास्यः—
असौ गुणीति मत्वेव भोजः कण्ठमुपेयुषा ।
धनुषा गुणिना यस्य नश्यन्नश्वान पातित. ॥
पद्यमिदं B L H आदर्शेषु नोपलभ्यते

३ सुमुख P मुख L

त्समुक्तेन तुरगेण प्रविशन् व्याकुलीकृतेषु लोकेषु, इतस्तत पलायमानेषु जनेषु कामपि तक्रविक्रयिणी जनसमर्दन मौलिकंपाद्गतलपतितभग्नभाण्डामपि गोरसे सरित्प्रवाह इव प्रसरति विकसितमुखां तां प्राह । तवाविषादे किं कारणमिति नृपेण पृष्टे सा प्राह—

९२) हत्वा नृपं पतिमवेक्ष्य भुजङ्गदष्टं
देशान्तरे विधिवशाद्गणिकास्मि जाता ।
पुत्रं भुजङ्गमधिगम्य चितां प्रविष्टा
शोचामि गोपगृहिणी कथमद्य तक्रम् ॥
तस्मात्प्रदेशान्महीनदी प्रादुरासेत्यवादिषु. ॥

॥ इति गोपगृहिणीप्रबन्धः ॥

३९ अन्यदा प्रीतो भोज उपशिलोमिकां लक्षीकृत्य धनुर्वेदमनिर्वेदमभ्यसंस्तत्कालदर्शनार्थमागतेन सिताम्बरवेषधारिणा श्रीचन्दनाचार्येण प्रत्युत्पन्नप्रतिभामिरामतयौचित्यमभिदधे—

९३) विद्धा विद्धा शिलेयं भवतु परमतः कार्मुकक्रीडितेन
राजन्पाषाणवेधव्यसनरसिकतां मुञ्च देव प्रसीद ।
क्रीडेयं चेत्प्रवृद्धा कुलशिखरिकुलं केलिलक्ष्यं करोषि
ध्वस्ताधारा धरित्री नृपतिलक तदा याति पातालमूलम् ॥

इति तत्कविताविशयचमत्कृतोऽपि किञ्चिद्विचिन्त्य नृपतिरित्युवाच । भवता सर्वशास्त्रपारङ्गतेनापि ध्वस्ता धरेति यत्पदमपाठि ततः कमप्युत्पातं सूचयति× ॥

४० इतश्च डाहालदेशीयराज्ञो राज्ञी देमतीनाम्नी महायोगिनी कदाचिदासन्नप्रसवा सदैव दैवज्ञानिति पप्रच्छ । कस्मिन्सुलग्ने जातः सुतः सार्व-

१ पलायमानेषु लोकेषु c जातभयेषु लोकेषु H L २ ता श्रीभोज प्राह तव विषादेऽपि किं हर्षकारणं नृपेणेत्यभिहिता सा प्राह L ३ महीयसी नदी प्रादुरासीत L H इति लोका वदन्ति D

× प्रबन्धोऽयं B L आदर्शयोर्नोपलभ्यते

भौमो भवतीति । अथ तै· सम्यगवगम्योच्चराशिषु केन्द्रस्थेषु सौम्यग्रहेषु त्रिषडायगेषु क्रूरेषु चामुकलग्ने जातः सुतः सार्वभौमो भवतीत्युक्तं तन्निशम्यै निश्चितप्रसवदिनादूर्ध्वं षोडशप्रहरान्यावद्योगयुक्त्या गर्भस्तम्भं कृत्वा नैमित्तिकनिर्णीते लग्ने सुतं कर्णनामानं प्रासूतं । तद्गर्भधारणदोषादष्टमे यामे सा विपन्नौ ।

सुलग्नजातत्वात्पराक्रमाक्रान्तदिग्चक्रः षट्त्रिंशदधिकेन राज्ञां शतेन सेव्यमानश्चतुष्षु राजविद्यासु परं प्राविण्यमावहन् विद्यापतिप्रमुखैर्महाकविभिः स्तूयमान· । तद्यथा—

९४) *मुखे हारावाप्तिर्नयनयुगले कङ्कणभरो
नितम्बे पत्राली सतिलकमभूत्पाणियुगलम् ।
अरण्ये श्रीकर्ण त्वदरियुवतीनां विधिवशा—
दपूर्वोऽयं भूषाविधिरहह जातः किमधुना ॥ १ ॥

९५) गोपीपीनपयोधराहतमुरः सन्त्यज्य लक्ष्मीपतेः
शङ्के पङ्कजशङ्कया नयनयोर्विश्राम्यति श्रीस्तव ।
श्रीमत्कर्णनरेन्द्र यत्र चलति भ्रूवल्लरीपल्लव—
स्तत्र त्रुट्यति भीतिभङ्गुरतया दारिद्र्यमुद्रा यतः ॥ २ ॥

इति स्तूयमानः स कर्णनृप कदाचिद्दूतमुखेन श्रीभोजमुवाच । भवन्नगर्यां भवत्कारिताश्चतुरुत्तरं शत प्रासादाः । एतावन्त एव गीतप्रबन्धा भवदीयाः । एतावन्ति तव बिरुदानि । अतश्चतुरङ्गयुद्धेन द्वन्द्वयुद्धेन वा चतसृषु विद्यासु वादशक्त्यौं त्यागशक्त्या वा मां निर्जित्य पञ्चोत्तरशतबिरुदानां

१ इति निशम्य D २ सुतमसुत H ३ संयमिनीं पुरीं जगाम D H ४ कुन्तलकलापेन C भृगविभ्रमकारिणा कुन्तलकलापेन सेव्यमानविमलक्रमकमलयुगलः B H

* पद्यमिदं शार्ङ्गधर पद्धत्या (१२६२) कस्यापीति प्रदत्तम्

५ पत्रालिः d ६ स्तूयमाननानावदात श्रीभोजं प्रधानानि प्राहिणोत B L H (अतोऽग्रिमवृत्तान्तः B आदर्शे नास्ति) ७ वादिवत् a P वादस्थलेन त्यागेन च H L

भाजनं भूयाः। नो वाहं त्वां विजित्य सप्तत्रिंशताधिकस्य राज्ञां शतस्य नाथो भवामीति तद्वचसा परिम्लानमुखाम्भोजः श्रीभोजः सर्वेष्वपि प्रकारेषु जितकाशिनं श्रीकाशिपुराधीशं विमृशन् स्वं विजितं मन्यमानस्तानुपरोधपूर्वमभ्यर्थ्यैवमङ्गीकारयामास। मयावन्त्यां श्रीकर्णेन वाराणस्यामेकस्मिन्नहनि लग्ने गर्तापूरपूर्वमारभ्याहंपूर्विकया कार्यमाणयोः पञ्चाशद्धस्तप्रमाणयोः प्रासादयोः यस्मिन्प्रासादे प्रथम कलशध्वजारोपो भवति तस्मिन्नुत्सवे परेण नरेन्द्रेण त्यक्तच्छत्रचामरेण करेणुमधिरूह्य समागन्तव्यमित्थं भोजस्य यथारुच्यङ्गीकारे कर्णगोचरंगते श्रीकर्णस्तेनापि प्रकारेण भोजमधश्चिकीर्षुरेकस्मिन्नेव लग्ने पृथग् पृथग् प्रारब्धयोरुभयोः प्रासादयोः सर्वाभिसारेण निजप्रासादं निर्मापयंस्तत्र कर्णः सूत्रभृतं पप्रच्छ। एकस्मिन्नहन्युदयास्तयोरन्तरे कियान्कर्मोऽर्यो भवतीति निवेद्यतां। अथ तेन चतुर्दश्यनध्याये तत्र सप्तहस्तप्रमाणा एकादश प्रासादा दिनोदये प्रारभ्य दिनान्ते कलशारोपपर्यन्ताः कारयित्वा नृपाय दर्शितास्तया समग्रसामग्र्या नृपः प्रमुदितचित्तो भोजप्रासादकलापबन्धे संजायमाने निजप्रासादेऽनलसः कलशमधिरोप्य निर्णीते ध्वजाधिरोपलग्ने तया प्रतिज्ञया श्रीभोजं दूतमुखेन निमन्त्रयामास। ततः स्वप्रतिज्ञाभङ्गभीरुर्मालवमण्डलप्रभुस्तथा प्रयातुमप्रभुश्च श्रीभोजस्तूष्णीमासीत्

४१ अथ प्रासादध्वजाधिरोपानन्तरं श्रीकर्णस्तावद्भिरेव नृपैः समं प्रस्थितः श्रीभोजमभिषेणयितुं। तदाच श्रीभोजराज्यार्धं प्रतिश्रुत्य श्रीमालवकमण्डलपार्ष्णिघाताय श्रीकर्णे श्रीभीममाजूहवत्। अथ ताभ्यां नरेन्द्राभ्यां मन्त्रेणाक्रान्तो व्याल इव भोजभूपालो विगलितदर्पविषो बभूव।

---

१ इति प्रभावाविर्भावादीपत्परि H D २ श्रीकर्णस्तेषु सामर्पोऽपि H L ३ निर्मापयतोस्तत्र P ४ कर्मस्थायो c a H ५ चित्तो भोजप्रासादे कपालबन्धे ज्ञायमाने H c ६ अप्रभूष्णुश्च L H a ७ अवतीर्णपुराणकर्ण इव H ८ श्रीभोजमभ्यर्पेणयत् तस्मिन्नवसरे H L c ९ नि सीमतद्दीयसीमनगरे L H

तदा चाकस्मिके सजाते भोजवपुरपाटवेऽपह्रुयमाने, सर्वेष्वपि घाटमार्गेषु निजनियुक्तमानुषै सर्वथा निषिध्यमाने परपुरषप्रवेशे, श्रीभीम कर्णाभ्यर्णवर्तिनं निजसान्धिविग्रहिक डामर भोजवृत्तान्तज्ञानाय स्वपुरुषेण पप्रच्छ तेनापि स पुरुषो गाथामध्याप्य प्रहित श्रीभीमसभामुपागत ॥

९६) अम्बयफल सुपक्क बिण्ट सिढिल समुब्भडो पवणो ।
साहा मिल्हणसीलां न याणिमो कज्जपरिणामो ॥

अनया गाथया श्रीभीमे तथास्थिते श्रीभोज सन्निहितपरलोकपथप्रयाण कृततदुचितधर्मकृत्यो मम पञ्चत्वानन्तर मत्करौ विमानाद्बहिर्विधेयावित्यादिश्य दिवं गत ॥

९७) कमु करुरे पुत्र कलत्र धी कमु करुरे करसणवाडी ।
एकला आइवो एकला जाइवो हाथपग बे झाडी ॥

. ४२ इति भोजवाक्य वेश्यया कथित लोकाना प्रति। तद्वृत्तान्तविदा *कर्णेन दुर्गभङ्गपूर्वं समग्राया भोजलक्ष्म्यामुपात्ताया श्रीभीमेन* डामर आदिष्टो यच्छ्रीकर्णात्त्वया मत्परिकल्पित राज्यार्धं निज शिरो वोपनेतव्यमिति राजादेश विधिसुद्वात्रिंशता पत्तिभि सह गुरुदरे प्रविश्य मध्याह्नकाले प्रसुप्त श्रीकर्ण बँान्ध जग्राह । अथ तेन राज्ञा एकस्मिन् विभागे नीलकण्ठचिन्तामणिगणाधिपप्रमुखदेवतावसरे निर्णीते परस्मिन्नुत्तराधे समस्तराज्यवस्तूनि स्वेच्छयैकमर्धमादत्स्वेत्यभिहिते षोडशप्रहरास्तथा स्थित्वा पुन *श्रीभीमराजादेशाद्देवतावसरमादाय श्रीभीमायोपायनीचकार* ॥ अथैतत्प्रबन्धसग्रहकाव्ययुगम यथा—

९८) पञ्चाशद्धस्तमाने सुरभवनयुगे तुल्यलग्नक्षणे प्राक्
प्रारब्धे यस्य शीघ्र भवति हि कलशारोपण तत्र राज्ञा ।

---

१ अपह्रियमाणेषु P २ उद्धतसाहा मल्हणमीला b c ३ परिणामे b c ४ कृत्यो राज्यस्यानुशास्ति समस्ताराजलोकस्य वितीर्य c L ५ दिवमुपेयिवान् c L ६ मत्परिकल्ति निज P ७ बन्धै K छान्ध P ८ शिव d

अन्येन च्छत्रबालव्यजनविरहितेनाभ्युपेतव्यमेवं
संवादे भोजराजो व्ययविमुखमतिः कर्णदेवेन जिग्ये ॥ १ ॥

९९) भोजे राज्ञि दिवं गतेऽतिबलिना कर्णेन धारापुरी-
भङ्गं सूत्रयतोपरुध्य नृपतिर्भीमः सहायीकृतः ।
तद्भृत्येन च डामरेण जगृहे बन्दीकृतात्कर्णतो
हैमी मण्डपिका गणाधिपयुत श्रीनीलकण्ठेश्वरः ॥ २ ॥

१००)*कविषु वादिषु भोगिषु योगिषु
द्रविणदेषु सतामुपकारिषु ।
धनिषु धन्विषु धर्मपरेषु च
क्षितितले न हि भोजसमो नृपः ॥ ३ ॥

(a आदर्शे तथा मु. पुस्तके निम्नलिखितः प्रबन्धोऽधिको वर्तते)

अथ श्रीकर्णस्याग्रे इदं काव्यमुक्त कर्पूरकविना मुखे हारावासिरित्यादि (श्लो. ५३) । अपशब्दकथनाद्राज्ञा तस्य कवे किंचिन्न प्रदत्त ।

कुक्षेः कोटर एव कैटभरिपुर्वर्त्ते त्रिलोकीमिमा-
मन्तर्भूरिभरं बिभर्ति तमपि प्रीतो भुजङ्गाधिप ।
श्रीकण्ठस्य स कण्ठसूत्रमभवद्देव त्वया तं हृदा
विश्राणेन परेषु विक्रमकथा श्रीकर्ण निर्नाशिता ॥ १ ॥

श्रीनाचिराजकविनोक्तमेतद्राज्ञा प्रदत्तम् ।
दत्ता कोटी सुवर्णस्य मत्ताश्च दश दन्तिनं ।
दत्त श्रीकर्णदेवेन नाचिराजकवेर्मदात् ॥ २ ॥

भार्यया हक्कितेन कर्पूरकविना समागच्छतो नाचिराजकवेरग्रे मार्गे इदं काव्यं भणितं । यत्—

कन्ये कासि, न वेत्सि मामपि कवे कर्पूर, किं भारती
सत्यं, किं विधुरासि, वत्समुषिता, केनाम्ब दुर्वेधसा ।
किं नीतं तव, मुञ्जभोजनयनद्वन्द्वं, कथं वर्तसे
दीर्घायुर्भजतेऽन्वयाष्टिपदवीं श्रीनाचिराज कवि ॥

श्रीनाचिराजकविना सतुष्टेन यद्राज्ञा प्रदत्तं तत्सर्वमपि कर्पूरकवये प्रदत्तं ।

* पद्यमिद भोजप्रबन्धेऽप्यस्ति

१०१ धाराधीशधरामहीशगणने०—

(अयं श्लोकः पूर्वं (७०) संपूर्णः प्रदत्तः)

*इत्यादि भोजस्य नानाविधाः प्रबन्धा अवशेषा यथाश्रुतं मन्तव्याः ॥

---

* c d b पुस्तकेषु प्रान्तभागे लिखितानि मुद्रितपुस्तके च टिप्पण्या प्रदत्तानि काव्यानि यथा (*सर्वाण्येतानि श्रीबल्लालविरचितभोजप्रबन्धे सन्ति*)—

धाराधरस्त्वदसिरेव नरेन्द्र चित्रं
वर्षन्ति वैरिवनिताजनलोचनानि ।
कोशेन सन्ततमसङ्गतिराहवेऽस्य
दारिद्र्यमभ्युदयति प्रतिपार्थिवानाम् ॥ १ ॥

कूर्मः पातालगङ्गापयसि विहरतां तत्तटीरूढमुस्ता-
मादत्तामादिपोत्री शिथिलयतु फणामण्डलं कुण्डलीन्द्रः ।
दिङ्मातङ्गा मृणालीकवलनकलनां कुर्वतां पर्वतेन्द्राः
सर्वे स्वैरं चरन्तु त्वयि वहति विभो भोज देवीं धरित्रीम् ॥ २ ॥

अये लाजा उच्चैः पथि वचनमाकर्ण्य गृहिणी
शिशोः कर्णौ यत्नात्सुपिहितवती दीनवदना ।
मयि क्षीणोपाये यदकृत दृशावश्रुबहुले
तदन्तः शल्यं मे त्वमसि पुनरुद्धर्तुमुचितः ॥ ३ ॥

आमोदैर्मरुतो मृगाः किसलयोल्लासैस्त्वचा तापसाः
पुष्पैः षट्चरणाः फलैः शकुनयो घर्मार्दितारछायया ।
स्कन्धैर्गन्धगजास्त्वयैव विहिताः सर्वे कृतार्थास्ततः
त्वं विश्वोपकृतिक्षमोऽसि भवता भग्नापदोऽन्ये द्रुमाः ॥ ४ ॥

हठाद्गृष्टानां कतिपयपदानां रचयिता
जनः स्पर्धालुश्चेदहह कविना वश्यवचसा ।
भवेदद्य श्वो वा किमिह बहुना पापिनि कलौ
घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः ॥ ५ ॥

मुक्ताभूषणमिन्दुबिम्बमजनि, व्याकीर्णतारं नभः
स्मारं चापमपेतचापलमभूदिन्दीवरे मुद्रिते ।
व्यालीनं कलकण्ठमन्दरणितं मन्दानिलैः स्पन्दितं
निष्पन्दस्तबका च चम्पकलता साम्प्रतं जाने ततः ॥ ६ ॥

१०२) देव त्वत्करनीरदे दशदिशि प्रारब्धपुण्योन्नतौ
चञ्चत्काञ्चनकङ्कणद्युतितडित्स्वर्णामृतं वर्षति ।
वृद्धा कीर्तितरङ्गिणी समभवत्पीता गुणग्रामभू·
पूर्णं चार्थिसर· शशाम विदुषां दारिद्र्यदावानलः ॥ १ ॥

खिन्नं मण्डलमैन्दवं, विलुलितस्रग्भारनद्धं तमः
प्रागेव प्रथमानकैतकशिखालीलायितं सुस्मितम् ।
शान्तं कुण्डलताण्डवं, कुवलयद्वन्द्वं तिरोमीलितं
वीतं विद्रुमसीत्कृतं, नहि ततो जाने किमासीदिति ॥ ७ ॥
अहो मे सौभाग्यं मम च भवभूतेश्च भणितिं
तुलायामारोप्य प्रतिफलति तस्यां लघिमनि ।
गिरां देवी सद्यः श्रुतिकलितकल्हारकलिका
मधूलीमाधुर्यं क्षिपति परिपूर्त्यै भगवती ॥ ८ ॥
लक्ष्मीक्रीडातडागो रतिधवलगृहं दर्पणो दिग्वधूनां
पुष्पं श्यामालतायास्त्रिभुवनजयिनो मन्मथस्यातपत्रम् ।
पिण्डीभूतं हरस्य स्मितममरधुनीपुण्डरीकं मृगाङ्को
ज्योत्स्नापीयूषवापी जयति सितवृषस्तारकागोधनस्य ॥ ९ ॥
महाराज श्रीमन् जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं कविवरमभौमं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥ १० ॥
नीरक्षीरे गृहीत्वा निखिलखगततीर्याति नालीकजन्मा
तक्रं धृत्वा तु सर्वानटति जलनिधींश्चक्रपाणिर्मुकुन्दः ।
सर्वानुत्तुङ्गशैलान् दहति पशुपतिर्भालनेत्रेण पश्यन्
व्याप्ता त्वत्कीर्तिकान्तौ त्रिजगति नृपते भोजराज क्षितीन्द्र ॥ ११ ॥
विद्वद्राजशिखामणे तुलयितुं धाता त्वदीयं यशः
कैलासं च निरीक्ष्य तत्र लघुतां निक्षिप्तवान् पूर्तये ।
उक्षाणं तदुपर्युमासहचरं तन्मूर्ध्नि गङ्गाजलं
तस्याग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितिम् ॥ १२ ॥
स्वर्गाद्गोपाल कुत्र व्रजसि सुरमुने भूतले कामधेनो—
र्वत्सस्यानेतुकामस्तृणचयमधुना मुग्ध दुग्धं न तस्याः ।

१०३) श्रीभोजे मृगया गतेऽपि सहसा चापे समारोपिते-
ऽप्याकर्णान्तगतेऽपि मुष्टिगलितेऽप्येणागलमेऽपि च ।
न त्रस्तं न पलायितं न चलितं नोत्कंपितं नोत्प्लुतं
मृग्या मद्वशिनं करोति दयितं कामोऽयमित्याशया ॥ २ ॥

श्रुत्वा श्रीभोजराजप्रचुरवितरणं व्रीडशुष्कस्तनी सा
व्यर्थो हि स्यात्प्रयासस्तदपि तदरिभिश्चर्वितं सर्वमूर्व्याम् ॥ १३ ॥
अस्य श्रीभोजराजस्य द्वयमेव सुदुर्लभम् ।
शत्रूणां शृङ्खलैर्लोहं ताम्रं शासनपत्रकैः ॥ १४ ॥
निजानपि गजान् भोज ददानं प्रेक्ष्य पार्वती ।
गजेन्द्रवदनं पुत्रं रक्षत्यद्य पुनः पुनः ॥ १५ ॥
घटो जन्मस्थानं मृगपरिजनो भूर्जवसनं
वने वासः कन्दादिकमशनमेवंविधगुणः ।
अगस्त्यः पाथोधिं यदकृत कराम्भोजकुहरे
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ १६ ॥
रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धि० ॥ १७ ॥
विजेतव्या लङ्का चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्याजौ रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धि० ॥ १८ ॥
धनुः पौष्पं मौर्वी मधुकरमयी चञ्चलदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः ।
स्वयं चैकोऽनङ्गः सकलभुवनं व्याकुलयति
क्रियासिद्धि० ॥ १९ ॥
अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतं
देवेत्थं *जगतीतले पुरहराभावे समुन्मीलति ।*
गङ्गा सागरमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनम् ॥ २० ॥

१०४) त्यागैः कल्पद्रुम इव भुवि त्रासिताशेषदौस्थ्यः
साक्षाद्वाचस्पतिरिव जनान्दृब्धनानाप्रबन्धः ।
राधावेधेऽर्जुन इव चिरात्तस्य कीर्त्त्योत्कचित्तै-
राहूतो द्रागमरनिकरैः स्वर्ययौ भोजराजः ॥ ३ ॥

इति श्रीमेरुतुङ्गाचार्यविरचिते प्रबन्धचिन्तामणौ श्रीभोजभीम-
भूपयोर्नानावदातवर्णनो नाम द्वितीयः प्रकाशः ॥

शुचिद्वयपुटे भोज यशोऽब्धौ तव रोदसी ।
मन्ये तदुद्भवं मुक्ताफलं शीतांशुमण्डलम् ॥ २१ ॥
अमृत्प्राची पिङ्गा रसपतिरिव प्राप्य कनकं
गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपरा
न राजन्ते दीपा द्रविणरहितानामिव गृहाः ॥ २२ ॥
समुन्नतघनस्तनस्तबकचुम्बितुम्बीफल—
क्वणन्मधुरवीणया विबुधलोकलोलभ्रुवा ।
त्वदीयमुपगीयते हरकिरीटकोटिस्फुर—
त्तुषारकरकन्दलीकिरणपूरगौरं यशः ॥ २३ ॥
बल्लालक्षोणीपाल त्वदहितनगरे संचरन्ती किराती
कीर्णान्यादाय रत्नान्युरुतरखदिराङ्गारशङ्काकुलाङ्गी ।
क्षिप्त्वा श्रीखण्डखण्डं तदुपरि मुकुलीभूतनेत्रा धमन्ती
श्वासामोदानुयातैर्मधुकरनिकरैर्धूमशङ्कां बिभर्ति ॥ २४ ॥
स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु—
र्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य तु ।
इत्यन्तःपुरसुन्दरीजनगणे न्यायाधिकं ध्यायता
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थिता नाडिकाः ॥ २५ ॥
वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोनिधिरादरा—
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ २६ ॥
दृष्टे श्रीभोजराजेन्द्रे गलन्ति त्रीणि तत्क्षणात् ।
शत्रोः शस्त्रं कवेः कष्टं नीविबन्धो मृगीदृशाम् ॥ २७ ॥

श्रीः

प्रबन्धचिन्तामणिः

तृतीयः प्रकाशः

सिद्धराजप्रबन्धः

१ अथ कदाचिद्गूर्जरदेशे अवग्रहनिगृहीतायां वृष्टौ राजदेयविभाग-निर्वाहाक्षमो देशलोकः तन्नियुक्तैर्व्यापारिभिः श्रीपत्तने समानीय भीमभूपाय न्यवेद्यत । ततः कदाचिदहर्मुखे श्रीमूलराजकुमारस्तत्र चङ्क्रममाणो नृपपत्तिभिः सस्यनिदानीभूतदानीसंबन्धे व्याकुलीक्रियमाणं सकललोकमालोक्य पारिपार्श्विकेभ्योऽधिगतवृत्तान्त कृपया किञ्चिदश्रुमिश्रलोचनो वाहवाल्यां तदतुल्यया कलया नृपं परितोष्य वरं वृणीष्वेति नृपादेशमासाद्य भाण्डागार एव वरोऽयमस्तु इति विज्ञपयामास । राज्ञा किमिति न याचसे इत्युक्तः प्राप्तिप्रमाणाभावादित्युदीरयन् भृशं निर्बन्धपराद्धराधिपात्तेषां कुटुम्बिकानां दानीमोचनवरं ययाचे । ततो हर्षबाष्पाविललोचनेन राज्ञा तथेति प्रतिपद्य भूयोऽप्यर्थयेत्यभिहितः ।

१) क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुःपूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥

इति काव्यार्थबलेन निगृहीतप्रभूतलोभस्ततो भूय किमप्यनभ्यर्थ्यमानोऽपि मानोन्नततया स्वस्थानमगमत् । तैश्च कौटुम्बिकलोकैः स्तूयमान-

१ निगृहीतवर्षेण विशोपकदण्डादिदेशग्रामकौटुम्बिकेषु राजदेयविभागनिर्वाहाक्षमेषु तन्नियुक्तैर्व्यापारिभिः सकलोऽपि स ज्ञातवित्तो देशलोकः L H C आदर्शेष्वेवं पाठः २ वाहाल्यां a ३ अतुलया L ४ इत्युदीर्य H L ५ विक्रमचरिते, शार्ङ्गधरपद्धत्या (७७१) सुभाषितावल्यां (२८५) च पद्यमिदं दृश्यते ६ सुकार्थं H d

स्तृतीयेऽहनि स श्रीमूलराजः[1] स्वर्लोकं जगाम । तच्छोकाम्बुधौ स राजलोको राजा स च पूर्वमोचितलोकश्च निमग्नश्चिरेण चतुरैर्विविधबोधबलादपकृष्टशोकशङ्कुश्चक्रे ।

२ अथ द्वितीयवर्षे कर्पुकलोकैर्वर्षाबलान्निष्पन्नेषु समस्तसस्येषु व्यतीततद्वर्षयो राजदेयविभागे[2] प्रदिश्यमाने[3] राज्ञि चानाददाने सति तैरुत्तरसभा मेलिता । तत्र सभ्यानां लक्षणमेवं—

२) *न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मं स नो यत्र न चास्ति सत्यं
सत्यं न तद्यत्कृतकानुविद्धम् ॥

इति निर्णयात्सभ्यैर्गतवर्षतद्वर्षयोर्दानीं राजा ग्राहितः । ततस्तेन द्रव्येण कोशद्रव्येण च श्रीमूलराजकुमारश्रेयसे नव्यस्त्रिपुरुषप्रासादः श्रीभीमेन कारितः[4] ।

३ अनेन श्रीपत्तने श्रीभीमेश्वरदेवभट्टारिकाभीरुआणीप्रासादौ कारितौ सं० १०७८[5] पूर्व वर्ष ४२ श्रीभीमेन राज्यमकारि । श्रीउदयमतिनाम्न्या तद्राज्ञ्या श्रीपत्तने सहस्रलिङ्गसरोवरादप्यतिशायिनी नव्या वापी कारिता । अथ सं. ११२०[6] वर्षे श्रीकर्णस्यं महाशृंगारिणः राज्याभिषेकः संजातः ॥[7]

१ प्रार्थयमानो मानोनततया स्वसौधमध्यास्य बन्धमोचितैस्तैर्लोकै. सदैव भावादुपास्यमान स्वसौधगतैश्च स्तूयमानस्तृतीयेऽहनि तदीयसन्तोषदशा श्रीमूलराज. B H L २ राजदेयभागविभागे a P L ३ प्रविश्यमाने a H K L

* महाभारते, हितोपदेशे, शार्ङ्गधरपद्धत्यां (१२४४) च दृश्यते पद्यमिदम्

४ दानीं नृपतेः पार्श्वाद्ग्राहयित्वा आपूर्यमाणकोश d H ५ अथ सं. १०७८ पूर्वं श्रीभीमेन वर्षं ५२ H सं. १०७७ प्रारभ्य वर्ष ४२ मास १० दिन ९ राज्यं कृत a P ६ सं. ११२८ वर्षे H स. ११२० चैत्र वदि ७ सोमे हस्तनक्षत्रे मीनलग्ने a P ७ श्रीकर्णदेवस्य a P

४ इतश्च शुभकेशिनामा कर्णाटराट् तुरगापहृतोऽटव्यां नीतः कुत्रापि पत्रलवृक्षच्छायां सेवमानः प्रत्यासन्नदावपावके कृतज्ञतया विश्रामोपकारकारिणं तमेव तरुमजिहासुस्तेनैव सह तस्मिन्दहने प्राणानाहुतीचकार । ततस्तत्सूनुर्जयकेशिनामा तद्राज्ये सचिवैरभिषिक्तः क्रमेण तत्सुता मयणल्लदेवी समजनि सा च शिवभक्तेः सेमेश्वरनामनि गृहीतमात्र एवेति पूर्वभवमस्मार्षीत् । यदहं प्राग्भवे ब्राह्मणी द्वादशमासोपवासान्कृत्वा प्रत्येकं द्वादशवस्तूनि तदुद्यापने दत्वा श्रीसोमेश्वरनमस्याकृते मस्थिता बाहुलोडनगरमागतो तत्करं दातुमक्षमाग्रतो गन्तुमलभमाना तन्निर्वेदादहमागामिनि जन्मनि अस्य करस्य मोचयित्री भूयासमिति कृतनिदाना कृतानशना च विपद्यात्र कुले जातेति पूर्वभवस्मृतिः । अथ बाहुलोडकरमोचनाय सा गूर्जरेश्वरं प्रवरं वरं कामयमाना तं वृत्तान्तं पित्रे[3] निवेदयामास । अथ जयकेशिराज्ञा तं व्यतिकरं ज्ञापितः श्रीकर्णः स्वप्रधानैः स्वसुताया मयणल्लदेव्या अङ्गीकारं याच्यते स्म । अथ श्रीकर्णे तस्याः कुरूपताश्रवणादुदासीने[4] सति तस्मिन्नेव राज्ञि निर्बन्धपरां तां मयणल्लदेवीं पिता स्वयंवरां प्राहिणोत् । अथ श्रीकर्णनृपो गुप्तवृत्त्या स्वयमेव तां कुत्सितरूपां निरूप्य सर्वथा निरादर एव जातः । ततोऽष्टभिः सहचरीभिः सह नृपतिहत्याकृते मयणल्लदेवीं प्राणान्पारिजिहीर्षुं मत्वा श्रीकर्णजनन्या उदयमतिराज्ञ्या तासां विपदं द्रष्टुमक्षमया ताभिः सह प्राणसंकल्पश्चक्रे ॥ यतः—

३) ×स्वापदि तथा महान्तो न यान्ति खेदं यथा परापत्सु ।
अचला निजोपहतिषु प्रकम्पते भूः परव्यसने ॥

---

* अयं प्रबन्ध. जिनमण्डनगणीयकुमारपालप्रबन्धे वर्तते

१ प्रान्तरप्रान्तभूमौ H L २ मुपागता H ३ मातरं निवेदितवती B H L ४ श्रीकर्णः प्रधानपुरुषैर्मयणल्लदेव्याः कुरूपतां निशम्य मन्दादरे b H ५ विलोक्य H D ६ दिव्यन्याभिरिव मूर्तिमतीभिः H B L

× अयं श्लोकः जिनमण्डनगणीयकुमारपालप्रबन्धेऽपि वर्तते ।

इति महोपप्लवमुपस्थितमवगम्य मातृभक्त्या तां परिणीय श्रीकर्णः पश्चाद्दृष्टिमात्रेणापि न संभावयामास ॥[1]

५ अन्यदा कस्यामप्यधमयोषिति साभिलाषं नृपं मुञ्जालमन्त्री कञ्चुकिना विज्ञाय तद्वेषधारिणीं कृत्वा मयणल्लदेवीमृतुस्नातां रहसि प्राहिणोत् । तामेव स्त्रियं जानता नृपतिना सप्रेममुज्यमानायास्तस्या आधानं समजनि तदा च तया संकेतज्ञापनाय नृपकरान्नामाङ्कितमङ्गुलीयकं निजाङ्गुल्यां न्यधायि । अथ प्रातस्तद्दुर्विलसितात्प्राणपरित्यागोद्यतो नृपतिः स्मार्तांस्तत्प्रायश्चित्तं पप्रच्छ । तैस्तप्तताम्रमयपुत्तलिकालिङ्गनमिति[2] निवेदिते प्रायश्चि[3]त्त तथैव चिकीर्षवे स मन्त्री यथावदवदत् ॥

६ ×सुलग्ने तस्य जातस्य सूनो नृपतिर्जयसिंह इति नाम निर्ममे । स बालस्त्रिवार्षिक कुमारैः सवयोभिः सह रममाणः सिंहासनमलञ्चक्रे । नैमित्तिकैस्तस्मिनेवाभ्युदयिके[4] लग्ने निवेदिते राजा तदैव तस्य सूनो राज्याभिषेकं चकार ॥ सं० ११५० वर्षे पौषवद ३ शनौ श्रवणनक्षत्रे वृषलग्ने श्रीसिद्धराजस्य पट्टाभिषेक ।

७ स्वयं तु आशापल्लीनिवासिनमाशाभिधानं भिल्लमभिषेणयन् भैरवदेव्या शकुने जाते तत्र कोछरबाभिधानदेव्याः प्रासाद च कारयित्वा षट् लक्षाधिपं भिल्लं विजित्य तत्र जयन्तीं देवीं प्रासादे स्थापयित्वा तथा कर्णेश्वरदवतायतन कर्णसागरतडागालङ्कृतं चकार । कर्णावतीपुर निवेश्य स्वयं तत्र राज्यं चक्रे ।

---

१ इति न्यायात्तदामहादेवानिच्छुनापि सर्वथा श्रीकर्णेन सा परिणिन्ये । तदनन्तर (दृग्मात्रेण) सर्वथा तामसभावयन् कस्या C B H

– अयं प्रबन्ध· जिनमण्डनगणीयकुमारपालप्रबन्धे तथा चारित्रसुन्दरगणीयकुमारपालचरितेऽपि वर्तते ।

२ उद्यताय नृपतये स्मार्तैस्तप्तताम्रमयपुत्तलिकालिङ्गनमिति प्रायश्चित्ते c B H
३ प्रायश्चित्ताय a L P

× ६,७ प्रबन्धौ जि. कु. प्रबन्धे चा. कु. चरितेऽपि

४ तद्व्यवहारविरुद्धं विमृशता नृपेण पृष्टैर्नैमित्तिकैस्तस्मिन्नेवाभ्युदयिके B H D

८ श्रीपत्तने तेन राज्ञा श्रीकर्णमेरुप्रासादः कारितः ॥ सं० ११२० चैत्रसुदि ७ प्रारभ्य सं० ११५० पौषवदि २ यावत् वर्ष २९ मास ८ दिन २१ अनेन राज्ञा राज्यं कृतं ।

९ अथ दिवं गते श्रीकर्णे श्रीमदुदयमतिदेव्या भ्राता मदनपालोऽसमञ्जसवृत्त्याऽवर्तत । तेन लीलाभिधानो राजवैद्यो दैवतवरलब्धप्रसादः सकलनागरिकैस्तत्कलाचमत्कृतचित्तैः[1] काञ्चनदानपूजयाऽभ्यर्च्यमानः कदाचिन्निजसौधे समानीतः कृतके[2] शरीरामये नाडीदर्शनात्पथ्यसज्जतां निवेदयन्निदमूचे । तदेव नास्तीति । ततस्त्वं मया रोगप्रतीकाराय नाकारितः किंतु पथ्यदानेन बुभुक्षाप्रतीकारार्थमेव । ततो द्वात्रिंशत्सहस्राण्युपनयेत्युक्त्वा तेन बन्दीकृतस्तत्तथेति[3] निर्मायेत्यभिग्रहमग्रहीत् । यदतः परं प्रतीकारनिमित्तं नृपतेः सौधमपहाय नान्यत्र गन्तव्यमिति ।

१० ततः परमातुराणां प्रस्रवणालोकनान्निदानचिकित्सितं कुर्वाणः केनापि मायाविना कृतकामयचिकित्सितकौशलं बुभुत्सुना वृषभप्रस्रवणे दर्शिते सम्यक् तदवगम्य शिरोधूननपूर्वकं वृषभ' स बहुखादनेन गोडिर्ते इत्यस्मै सत्वरमेव तैलनाली दीयतां नो चेद्विपत्स्यते इति तच्चित्ते चमत्कारमारोपयामास ।

११ अन्यदा राज्ञा निजग्रीवाबाधाप्रतीकारं पृष्ट । पलद्वयप्रमाणमृगमदपङ्कलेपेन शिरोऽर्त्तिरुपशाम्यतीति व्याहृते तथाकृते ग्रीवा सज्जीभूता ततो नृपसुखासनवाहिना पामरेण नरेण शिरोबाधाप्रतीकारं पृष्ट· । करीरमूलरसेन तन्मृत्तिकासहितेन लेपं विधेहीत्यभिदधे । ततो राज्ञा किमेतदिति पृष्टे देशकालौ बलं शरीरप्रकृतिं च विमृश्यायुर्वेदविदा चिकित्सा क्रियते इति विज्ञपयतिस्मै ॥

---

१ तत्कलाहतहृदयैः c B H २ समानीय कृत्रिमे L B ३ इत्यादिष्टस्तत्तथेति b D H ४ मोडित B H ५ वृद्धकरीर B ६ भूयो राज्ञा विप्रलब्धः b D उपालब्धः B H ७ विज्ञप्य गृहं गत B

१२ अन्यदा धूर्तै कैश्चिदेकमत्या पृथक् पृथक् युगलीभूय तन्मध्ये युगलिकया विपणिमार्गे किमद्य नृप वपुष्यपटुत्वम् इति पृष्टे द्वितीययुगलिकया श्रीमुञ्जालस्वामिप्रासादसोपाने पृष्टे तृतीययुगलिकया तु राजद्वारे चतुर्थयुगलिकया द्वारतोरणे तथैव, ततो नृपो भय पृच्छोत्पन्नेन शङ्कादूषणेन तत्कालोत्पन्नमहेन्द्रचरणयोरन्यदिने निपेदे स वेद्य ॥ इति वैद्यलीलाप्रबन्धः ॥

१३ अथ सान्तूमन्त्रिण उपायाद्राजपाटिकाव्याजेन श्रीकर्णाङ्गजेनान्यायकारी मदनपालो व्यापादितः ॥

१४ अथ कश्चिन्मरुमण्डलवास्तव्य श्रीमालवर्ग्य उदाभिधानो वणिक् प्रावृट्काले प्राज्याज्यक्रयाय निशीथे नगरे कर्मकरैकस्मात्केदारादपरस्मिन् जले पूर्यमाणे तान्के यूयमिति पप्रच्छ । तैर्वयमनुकस्य कार्मुका इत्युक्ते ममापि क्वापि सन्तीति पृच्छन्, ते कर्णावत्या सन्तीत्यभिहिते स सकुटुम्बस्तत्र गत वायटीयजिनायतने विधिवद्देवान्नमस्कुर्वन्कयापि लाछिनाम्न्या छिम्पिकया श्राविकया साधर्मिकत्वाद्ववन्दे । तया भवान् कस्यातिथिरित्युदीरित, वैदेशिकोऽहमिति भवत्या एवातिथिरिति वदन् तया सह नीत्वा कस्यापि वणिजो गृहे कारितान्नपाकेन भोजयित्वा निज तल्के क्वापि गृहे निवासित ।

१५ कालक्रमेण सपत्नसपादिष्टिकाचित गृह चिकीर्षु खातावसरे निरवधि शेवधिमधिगम्य तामेव स्त्रियमाहूय समर्पयन् तया निषिद्ध । तत्प्रभावेण तत प्रभृति स उदयनमन्त्रीति नाम्ना पप्रथे* । तेन

१ प्रणामपूर्वक आकस्मिक वपुरपाटव पृष्ट B H २ श्रीमुञ्जालस्वामिप्रासाद चाट्यमान शङ्काविषदोपणैव मृत H D ३ अथ सान्तूनाम्ना मन्त्री अन्यायकारिण त मदनपाल कालमिव जिघांसु कदाचित्कर्णाङ्गज जयसिंहराज्य राजपाटिकाव्याजेन तद्गृह नीत्वा पत्तिभिस्त व्यापादयामास B L M ४ श्रीमालदरय P ५ पोषमाणे B C ६ अपरस्मिन्पूर्यमाणस्माभि के यूयमिति B ७ निशापितकायमान निजतल्क H L * यत—

कृतप्रयत्नानपि नैव काश्चन स्वयं शयानानपि सेवते परान् ।
द्वये ऽपि नास्ति द्वितयेऽपि विद्यते श्रिय प्रचारो न विचारगोचर ॥ इत्यधिक पद्य D B

कर्णावत्यामतीतानागतवर्तमानचतुर्विंशतिजिनसमलंकृतः श्रीउदयनविहार कारितः । तस्यापरमातृकाश्चत्वारः सुताः चाहडदेवआम्बडबाहडसोलाकनामानोऽभूवन् ।

१६ *अथान्यस्मिन्नवसरे सान्तूनामा महामात्य करेणुस्कन्धारूढो* राजपाटिकाया व्रजन् व्यावृत्त स्वकारितसान्तूवसहिकायां देवनमश्चिकीर्षया तत्र प्रविशन् वारवेश्यास्कन्धन्यस्तहस्तं कमपि चैत्यवासिन सितवसनं ददर्श । ततो गजादवरुह्य कृतोत्तरासङ्ग पञ्चाङ्गप्रणामेन तं नमश्चकार । तत्र क्षणं स्थित्वा भूयस्तं प्रणम्य प्रतस्थे । ततः स लज्जयाऽधोवदनः पातालं प्रविविक्षुरिव तत्कालं सर्वमेव परिहृत्य मलधारिश्रीहेमसूरीणां समीपे उपसम्पदमादाय संवेगरससम्पूर्णः श्रीशत्रुञ्जये गत्वा द्वादशवर्षाणि तपस्तेपे । किञ्च तेनान्ये समाना प्रतिबोधिताः मुनिश्चिन्तयति ।

४) रे रे चित्त कथं भ्रात प्रधावसि पिशाचवत् ।
अभिन्नं पश्य चात्मानं रागत्यागात्सुखी भव ॥ १ ॥

५) संसारमृगतृष्णासु मनो धावसि किं वृथा ।
सुधामयमिदं ब्रह्मसर किं नावगाहसे ॥ २ ॥*

१७ कदाचित्स मन्त्री श्रीशत्रुञ्जये देवपादाना नमस्करणायोपगतो दृष्टपूर्वमिव मुनिं तं प्रणम्य तच्चरित्रविचित्रितमनास्तं गुरुकुलादि पप्रच्छ । तत्त्वतो भवानेव गुरुरिति तेनोक्ते कर्णौ पिधाय पाणिभ्यामेवं मादिशेत्यज्ञातवृत्त्यैवं विज्ञपयंस्तेन मन्त्र्यूचे ॥

---

१ आस्थडदेवआम्बडदेवबाहडसोल. c सोलदेवभट d H सोल. K L M
२ गौतममिव नमश्चक्रे L D M * द्वितारकान्तर्गतः पाठ a L K M आदर्शेषु नोपलभ्यते ३ इति ध्यायन्स मुनि. कायोत्सर्गे तस्थौ B ४ तद्गृह b c

६) जो जेण शुद्धधम्मम्मि ठाविउ संजएण गिहिणा वा ।
सो चेव तस्स जायइ धम्मगुरू धम्मदाणाउ ॥
इति तस्मै मूलवृत्तान्तं निवेद्य तस्य दृढधर्मतां निर्ममे ॥
इति मन्त्रिसान्तूदृढधर्मताप्रबन्धः ॥

१८ अथानन्तरं श्रीमयणल्लदेव्या जातिस्मरणात्पूर्वभववृत्तान्ते श्रीसिद्धराजस्य निवेदिते श्रीमयणल्लदेवी श्रीसोमनाथयोग्यां सपादकोटिमूल्यां हेममयीं पूजामादाय यात्रायां प्रस्थिता । बाहुलोडनगरं प्राप्ता पञ्चकुलेन कदर्थ्यमानेषु कार्पटिकेषु राजदेयविभागस्याप्राप्त्या सबाष्पं पश्चान्निवृत्त्यमानेषु मयणल्लदेवी हृदयादर्शसङ्क्रान्ततद्बाधां स्वयमेव पश्चाद्व्याघुटन्ती अन्तरान्तरायभूतेन श्रीसिद्धराजेन विज्ञप्ता स्वामिन्यमुना सम्भ्रमेण कुतो हेतो· पश्चान्निवर्त्त्यते इति राज्ञोक्ते यदैव सर्वथाऽयं करमोक्षो भवति तदैवाहं श्रीसोमेश्वरं प्रणमामि अशनं गृह्णामि नान्यथेति[3] श्रुत्वा राज्ञा पञ्चकुलमाकार्य तत्पट्टकस्याङ्के द्वासप्ततिलक्षानुत्पद्यमानान्विमृश्य तं पट्टकं विदार्य मातुः श्रेयसे करं मुक्त्वा करे जलचुलुकं मुञ्चति स्म ।

१९ तत· श्रीसोमेश्वरं गत्वा तया सुवर्णपूजया देवमभ्यर्च्य तुलापुरुषगजदानादीनि महादानानि दत्त्वा ।

७) *संग्रहैकपरः प्राप समुद्रोऽपि रसातलम् ।
दाता तु जलदः पश्य भुवनोपरि गर्जति ॥ १ ॥
८) सेनाङ्गपरिवाराद्यं सर्वमेव विनश्यति ।
दानेन जनितानन्दे कीर्तिरेकैव तिष्ठति ॥ २ ॥

---

१ तद्बाष्पधारा d २ अन्तरायीभूतेन H

३ नान्यथा किं चातः परमशननीरयोर्नियमश्च D M * सुभाषितार्णवेऽपि पद्यमिदम् । ७, ८, ९ पद्यत्रितयं a H L M आदर्शेषु नोपलभ्यते B आदर्शे P मुद्रित पुस्तके चोपलभ्यते

९) दातुर्नार्थिसमो बन्धुर्भारमादाय यः परात् ।
लक्ष्मीरूपादविगमं निस्तारयति तं खलु ॥ २ ॥

अतो महादानैर्मत्सदृशी कापि नाभून्न भवितेति दर्पाध्माता निशि निर्भरं सुप्ता । तपस्विवेषधारिणा तेनैव देवेन जगदे । इहैव मदीयदेवकुलमध्ये काचित्कार्पटिकनितम्बिनी यात्रायै आयातास्ति तस्याः सुकृतं याचनीयं त्वयेत्थमादिश्य तिरोहिते तस्मिन्राजपुरुषैरालोक्य समानीता । तस्मिन्पुण्ये याचितेऽप्यददाना कथमपि यात्रायां किं व्ययीकृतमिति पृष्टा सती सा प्राह । अहं भिक्षावृत्त्या योजनशतान्तरमतिक्रम्य ह्यस्तनदिवसे कृततीर्थोपवासा पारणकदिने कस्यापि सुकृतिनः पिण्याकमासाद्य तत्खण्डेन श्रीसोमेश्वरमभ्यर्च्य तद्दशमतिथये दत्वा स्वयं पारणकमकार्षं । भवती पुण्यवती यस्याः पितृभ्रातरौ पतिसुतौ च राजानः । या त्वं बाहुलोडकरं मोचयित्वा सपादकोटिमूल्यया पूजया श्रीसोमेश्वरं पूजितवती सा कथं मदीयपुण्यं लब्धेच्छासि यदि न कुप्यसि तदा किंचिद्व्रच्मि । तत्त्वतस्तवपुण्यान्मदीयं पुण्यं महीतले महीयः । यतः—

१०) संपत्तौ नियमः शक्तौ सहनं यौवने व्रतम् ।
दारिद्र्ये दानमत्यल्पमपि लाभाय भूयसे ॥

२० इति युक्तेन वाक्येन तस्या गर्वं निराचकार ॥ सिद्धराजस्तु समुद्रोपकण्ठवर्ती एकेन चारणेन—

११) को जाणइ तुहँ नाह चीत तु हालेइँ चक्कवइलउ ।
लंकँहले वाहमग्गु निहालई करणउत्तु ॥

इत्यादि स्तूयमानोऽभूत् ॥

१ देवायतने H L २ यात्राया c D ३ अगण्यपुण्यमर्जयन्ती कृशोऽपि पुण्ये कथं लुब्धासि C L ४ सा गर्वं विससर्ज b c D सर्वकथं गर्वं विससर्ज B L H ५ कौ ६ हालंतु H ७ काले ८ मग्ग Bh ९ अधोलिखितमधिकं B L M आदर्शेषु इति स्तूयमाने द्वितीयेनैवमूचे— धाइधोय पाय जलनिहि जेसल ताडिलाइ । जीता व्रवि राय इक्कि विभूषण मेल्हिमू ॥

२१ एवं तत्र यात्रायां व्यावृत्ते राज्ञि छलान्वेषिणा यशोवर्मणा मालवकभूपेन गूर्जरदेशे उपद्रूयमाणे सान्तूसचिवेन त्वं कथं निवर्तसे इति प्रोक्तः स राजाह। यदि त्वं स्वस्वामिन सोमेश्वरदेवयात्राया पुण्यं ददासीत्युदीरितस्तच्चरणौ प्रक्षाल्य तत्करतले तत्पुण्यदाननिदानं जलचुलुकं निक्षिप्य तं राजानं निवर्तयामास। ततः श्रीसिद्धराजस्तद्वृत्तान्तोपगमनेन क्रुद्धस्तं मन्त्र्येवमवादीत्। स्वामिन् यन्मया दत्तं तव सुकृतं याति ततस्तस्य सुकृतमन्येषामपि पुण्यवतां सुकृतं मया भवते प्रदत्तमेव। येन केनाप्युपायेन परचक्रं स्वदेशे प्रविशन्निवारणीयमेवेति वदता तेन नृपतिरनुनीतः।

२२ ततस्तेनैवामर्षेण मालवमण्डलं प्रतिष्ठासुः सचिवान् शिल्पिनश्च सहस्रलिङ्गधर्मस्थानकर्मस्थाये नियोज्य त्वरितगत्या तस्मिन्निष्पद्यमाने नृपति प्रयाणकमकरोत्। तत्र स्वजयकारपूर्वकं द्वादशवार्षिके विग्रहे संजायमानेऽद्य मया धाराभङ्गानन्तरं भोक्तव्यमिति कृतप्रतिज्ञो सचिवैः पञ्चभिः परमारराजपुत्रैः पञ्चशतीभिर्विपद्यमानै राज्ञ प्रतिज्ञां दिनान्तेऽपि पूरयितुमक्षमे कथञ्चित्तस्यां कणिकामयधाराभङ्गेन पूरितायां राजा पश्चाद्व्याघुटितुमिच्छुर्मुञ्जालसचिवं ज्ञापयामास। तेनापि त्रिकचतुष्कचत्वरप्रासादेषु निजपुरुषान्नियोज्य धारादुर्गभङ्गवार्तायां क्रियमाणायां तद्वासिना केनापि पुरुषेण दक्षिणप्रतोल्यां यदि परबलं ढौकते तदैव दुर्गभङ्गो नान्यथेति तद्वाचमाकर्ण्य स विज्ञप्त सचिवस्तं व्यतिकरं राज्ञे गुप्तविज्ञप्तिकया निवेदयामास। राज्ञापि तद्वृत्तान्तवेदिना तत्र सैन्ये ढौकिते दुर्गमं दुर्गमन्तर्विमृश्यँ यशःपटहनाम्नि बलवद्दन्तावलेऽधिरूढसामलनाम्नारोहकेण

१ अनिदान D २ क्रुद्धो नृप पराङ्मुखोऽजनि। एकदा राजान D श्रीसिद्धराज श्रीपत्तनमुपेत्य सातूमाल्वकनृपयोस्तं वृत्तान्तमवगम्य H B L M श्रीपत्तनागत श्रीसिद्धराजं तद्वृत्तान्तावगमनेन क्रुद्धं a ३ रक्षणीयं P ४ प्रति यियासु B ५ कथंचिद्धारादुर्गभङ्ग कर्तुमप्रभूष्णुरद्य B H L ६ प्रतोल्या a P ७ दुर्गम न्नर्दुर्गम विमृश्य P

पश्चाद्भागेन त्रिपोलिकपाटद्वये आहन्यमाने लोहमयार्गलायां भज्यमानायां बलाधिकतयान्तस्त्रुटिताद्गजात्कर्णाङ्गजमुत्तार्य स्वयं यावदवरोहति तावत्स गज पृथिव्यां पपात । स गज. सुभटतया विपद्य वडसरग्रामे स्वयशोधवल एव यशोधवलनामा[1] विनायकरूपेणावततार[2] ॥

१२) सिद्धेः स्तनशैलतटीपरिणतिदलितद्वितीयदन्त इव ।
विभ्राणो रदमेकं गजवदनः सृजतु वः श्रेय· ॥

इति तदीया स्तुतिः ॥

२३ इत्थं दुर्गभङ्गे सूत्रिते सति समराधिरूढं यशोवर्माणं षड्भिर्गुणैराबध्य तत्र निजामाज्ञां जगन्मान्यां दापयित्वा यशोवर्मरूपया प्रत्यक्षयश पताकया रोचिष्णु श्रीपत्तनं प्राप ।

२४ प्रतिदिनं सर्वदर्शनेभ्याशीर्वाददानायाहूतेषु यथावसरमाकारिता जैनाचार्या श्रीहेमचन्द्रमुख्या· श्रीसिद्धराजमासाद्य नृपेण दुकूलदानादिभिरावर्जितास्तै· सर्वैरप्यप्रतिमप्रतिभाभिरामैर्द्विधापि पुरस्कृतो नृपायेत्याशिषं श्रीहेमचन्द्रः पपाठ—

१३) भूमिं कामगवि स्वगोमयरसैरासिञ्च रत्नाकरा
मुक्तास्वस्तिकमातनुध्वमुडुप त्वं पूर्णकुम्भी[3] भव ।
धृत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा–
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिप. ॥

२५ अस्मिन्काव्ये नि प्रपञ्चे प्रपञ्च्यमाने तद्वचनचातुरीचमत्कृतचेता नृपस्तं प्रशंसन्, कैश्चिदसहिष्णुभिरस्मच्छास्त्राध्ययनबलादेतेषां

१ यशोधलो नाम c यशोदेवोनाम M २ यश· पस्द्दो मृत्वा व्यन्तरोऽभूदिति जिनमंडनेनोक्तं (जि. कु प्रबन्धे)
* सिद्धहमप्रशस्त्या (श्लो २६)
३ कुम्भो c

विद्वचेत्यभिहिते राज्ञा पृष्टा श्रीहेमचन्द्राचार्या – *पुरा श्रीजिनेन श्रीमन्महावीरेणेन्द्रस्य पुरत शैशवे यद्व्याख्यात तज्जैनव्याकरणमधीयामहे वयमिति तद्वाक्यानन्तरमिमा पुराणवार्त्तामपहायास्माकमेव सन्निहित व्याकरणकर्तार कमपि ब्रूतेति तत्पिशुनवाक्यादनु ते प्राहु । यदि श्रीसिद्धराज सहायीभवति तदा कतिपयैरेव दिनै पञ्चाङ्गमपि नूतन

B D आदर्शयोरत्र निम्नावतारितो वृत्तान्तोऽधिक उपलभ्यते—
केश्चिदसहिष्णुभिर्न मेने ॥ हेमचन्द्रनामा शिष्य कदाचिनवलुञ्चितशिरा जलविहरणाय व्रजन् गजभयात्सौधभित्तिस्थितो गवाक्षस्थेनालिगपुरोहितेन सारिणा पराभूत गुरवो विज्ञप्तास्तैरुक्तो मिथ्या दु कृत देहि । तद्दु खेन नि सृतोऽन्यगच्छीयदेवचन्द्रपद्माकराभ्या सह श्रीकाश्मीर प्रति । मार्गे नडोलाग्रामे सप्तमोपवासे श्रीसरस्वती प्रसना जाता निजमूर्त्तिर्दर्शिता मित्रयोर्निवेदिते । श्लोकसप्तशत्या ग्रामो वर्णित मित्रद्वयस्य कार्यसिद्धिहेतो स्तम्भतीर्थे प्रविशन्त केनापि देशान्तरिणाकार्यविद्या समर्पिता । इत्युक्त च । मम मरणसमये मम शवोपरि निभिर्नाभिमण्डले मन्त्र स्मरणीय शवो वर दास्यति। एव कृते स्मशाने मध्यरात्रौ शवेनोत्थाप्य वरो दत्त । श्रीहेमचन्द्रेण राजप्रबोधो याचित । देवचन्द्रेण हस्तसिद्धेराकृष्टिविद्या । पद्माकरेण पाण्डित्य । अनान्तरे कृतकृत्यहेमचन्द्रो वलित । कालभैरवीयमध्ये चण्डिकाप्रासादे विश्रान्तस्तत्र लघुभैरवानन्द शिष्यपञ्चशतीवृत समेत्य, रेरे चण्डे चण्डे प्रचण्डे मह्य मोदकान् देहीति भणित्वा सुवर्णमयकर्परमग्रे मुक्त देव्या मोदकैर्भृत । तेन सर्वेषा तेऽर्पिता । हेमचन्द्रस्यापि हे शिष्य त्वमपि गृहाणेत्युक्तो तेन तस्यापि करौ स्तम्भयित्वोक्त । यद्यस्ति सत्त्व तदा त्व भक्षयेथा एवमुक्ते चरणयो पतित । तत पत्तने आयात श्रीजयसिंहदेव,सन्मुखमेत्य समानीय हेमचन्द्रं गजाधिरूढ प्रवेश्य च पुरोहिततिरस्कृत सूरि, राज्ञा गुरव उपरोध्य हेमचन्द्रस्य पदस्थापना कारिता ॥ श्रीहेमचद्रसूरयोऽष्टम्या चतुर्दश्या च श्रीनयदेवभुवन प्रयान्ति। पौषधागारे श्रीस्थूलिभद्रचरित वाचयन्त पुरोहितेन राज्ञोऽग्रे उपहसिता , महाराज को यमसत्प्रलाप सर्वरसभोजने पूर्वपरिचितवेश्यागृहे कामनिग्रह । पर किं क्रियते भवद्वल्लभा । राज्ञोक्त । आचार्या अत्र समेष्यन्ति तदा वक्तव्य परोक्षे न । सूरिष्वागतेषु राज्ञोक्त । किं २ वाचयन्तो वर्तध्वे यूय । सूरिभि समग्रमपि सक्षेपत स्थूलिभद्रचरित कथित। आलिगेनोक्त । महाराज, *विश्वामित्रपराशरप्रभृतयो इत्यादि, गुरुभिरुक्त- -सिंहो बलीयो द्विरद इत्यादि॰ आलिगेनोक्त । अस्माकमेव शास्त्राणि पठित्वास्माकमेव पतय सजाता । गुरुभिरुक्त । जैनेन्द्रव्याकरण किं भवदीय यत्पुरा ५ नृप व्याकरणकर्तारं P

* अयमग्रे सपूर्णो वर्तते

व्याकरणं रचयामः ॥ अथ नृपेण प्रतिपन्नमिदं निर्वहणीयमित्यभिधाय तद्विसृष्टा सूरयः स्वं स्थानं ययुः।

२६ ततो यशोवर्मराज्ञः करे निःप्रतीकारां क्षुरीं समर्प्य तदग्रासने वयं गजाधिरूढा पुरमध्ये प्रवेशं करिष्याम इति राज्ञ प्रतिश्रवमाकर्ण्य मुञ्जालमन्त्रिणा प्रधानवृत्तिं मुञ्चता किमिति राज्ञा निर्बन्धपृष्टेन—

१४) मा स्म सन्धिं विजानन्तु मा स्म जानन्तु विग्रहम्।
आख्यातं यदि शृण्वन्ति भूपास्तेनैव पण्डिताः॥

इति नीतिशास्त्रोपदेशात्स्वबुद्धयैव स्वामिना प्रतिज्ञातोऽयमर्थः सर्वथा यतो न हित इत्युक्तं। ततो वरमसून्परिहरामि न तु विश्वविदितं प्रतिश्रवमिति नृपेणोक्ते मन्त्री दारुमयीं क्षुरिकां पाण्डुवर्णसर्जरसेन पिहितां पृष्ठासनस्थस्य यशोवर्मणः करे समर्प्य तदग्रासनस्थो नृपतिः श्रीसिद्धराजः परमोत्सवेन श्रीमदणहिल्लपुरं प्रविवेश।

२७ प्रावेशिकमङ्गलानन्तरं नृपेण स्मारिते व्याकरणवृत्तान्ते बहुभ्यो देशेभ्यस्तद्विद्भिः पण्डितैः सह सर्वाणि व्याकरणानि समानीय श्रीहेमाचार्यैः श्रीसिद्धहेमाभिधानं पञ्चाङ्गमपि व्याकरणं सपादलक्षग्रन्थप्रमाणं संवत्सरेण रचयाञ्चक्रे। राजवाह्यकुम्भिकुम्भे तत्पुस्तकमारोप्य सितातपवारणे ध्रियमाणे चामरग्राहिणीचामरयुग्मवीज्यमानं नृपमन्दिरमानीय प्राज्यवर्यपूजापूर्वं कोशागारे न्यधीयत। ततो राजाज्ञयान्यानि व्याकरणान्यपहाय तस्मिन्नेव व्याकरणे सर्वत्राधीयमाने केनापि मत्सरिणा भवदन्वयवर्णनाविरहितं व्याकरणमित्युक्ते श्रीहेमाचार्यैः क्रुद्धं राजानं राजमानुपादवगम्य द्वात्रिंशच्छ्लोकान्नूतनान्निर्माय द्वात्रिंशत्सूत्रितपादेषु तान्सम्बन्धं दधानानेव लेखयित्वा प्रातर्नृपसभायां वाच्यमाने व्याकरणे चौलुक्यवंशोपश्लोककेन श्लोकान्वाचयन्नृपं संतोषयामास। यथा—

१–२ नृपस्तु प्रतिज्ञाभङ्गभीरुर्वरमसून्परिहरामि ननु विश्वविश्रुतं प्रतिश्रुतमिति नृपवचनात् H L M ३ छुरिका c D ४ व्याकुलानन्तरं c ५ सबद्धान् D

१५) हरिरिवबलिबन्धकरस्त्रिशक्तियुक्त॰ पिनाकपाणिरिव ।
कमलाश्रयश्च विधिरिव जयति श्रीमूलराजनृप॰ ॥

इत्यादि । तथा च श्रीसिद्धराजदिग्विजयवर्णने द्व्याश्रयनामा ग्रन्थ कृत ।

१६) भ्रात संवृणु पाणिनिप्रलपितं कातन्त्रकन्था वृथा
मा कार्षीः कटु शाकटायनवच क्षुद्रेण चान्द्रेण किम् ।
क॰ कण्ठाभरणादिभिर्बठरयत्यात्मानमन्यैरपि
श्रूयन्ते यदि तावदर्थमधुरा॰ श्रीहेमचन्द्रोक्तय. ॥

२८ अथ श्रीसिद्धराजेन पत्तने यशोवर्मराज्ञस्त्रिपुरुपप्रभृतीन्सर्वानपि राजप्रासादान्सहस्रलिङ्गप्रभृतीनि च धर्मस्थानानि दर्शयित्वा प्रतिवर्षं देवदायपदे कोटिद्रव्यव्ययं निवेद्यैतत्सुन्दरमसुन्दरं वेति यशोवर्मा पृष्ट इत्यवादीत्। अहं ह्यष्टादशलक्षप्रमाणमालवदेशाधिपस्त्वत्त॰ पराभवपात्रं कथं भवेयं, परं महाकालदेवस्य दत्तपूर्वत्वाद्देवद्रव्यं मालवक । तद्भुञ्जानास्तत्प्रभावादुदितास्तमिता वर्तामहे । भवदीयान्वयराजानोऽप्येतावद्देवद्रव्यव्ययनिर्वाहाक्षमा लुप्तसर्वदेवदायपदा विपदां पदं भविष्यन्ति ।

२९ अथ सिद्धराज. कदापि सिद्धपुरे रुद्रमहाकालप्रासादं कारयितुकामः कमपि स्थपतिं स्वसन्निधौ स्थापयित्वा प्रासादप्रारम्भलग्ने तदीयकलासिकां लक्षद्रव्येणोत्तमर्णगृहीता मोचयामास । तां वंशशलाकामयीमालोक्य किमेतदिति राजा पप्रच्छ । ततो मया प्रभोरौदार्यपरीक्षानिमित्तमेतत्कृतमिति स्थपतिरुक्तवान् । ततस्तद्द्रव्यमनिच्छतेऽपि नृपतिनार्पितं । ततः क्रमेण त्रयोविंशतिहस्तप्रमाणे परिपूर्णे प्रासादेऽश्वपतिगजपतिनरप

१ चौलुक्यवंशोपश्लोकान् द्वात्रिंशत्सुत्रपादान्तेषु द्वात्रिंशत् श्लोकानवलोक्य प्रमुदितो राजा व्याकरण विस्तारयामास B H L M २ कथा H L ३ वर्द्धापयित्वा C ४ मूल्नाशं विनंक्ष्यन्ति H L M ५ तस्मिन्नप्यवसरे H L ६ तद्द्रव्यप्रत्यर्पणापूर्वं त्रयोविंशति H L

तिप्रभृतीनामुत्तमभूपतीनां मूर्तीः कारयित्वा तत्पुरो योजिताञ्जलिं स्वां मूर्तिं निर्माप्य देशभङ्गेऽपि प्रासादस्याभङ्गं याचितवान् । तस्य प्रासादस्य ध्वजारोपप्रस्तावे सर्वेषामपि जैनप्रासादानां पताकावरोहं कारितवान् । यथा मालवकदेशे महाकालवैजयन्त्यां सत्यां जैनप्रासादेषु न ध्वजारोप इति ।

३० अन्यदा सिद्धराजस्य मालवकमण्डलं प्रति यियासतः केनापि व्यवहारिणा सहस्रलिङ्गकर्मस्थाये याच्यमाने विभागे तत्सर्वथाऽदत्त्वैव कृतप्रयाणस्य कतिपयदिनानन्तरं कोशाभावात्कर्मस्थायस्य विलम्बमवगम्य तेन व्यवहारिणा सुतस्य पार्श्वात्कस्यापि धनाधिपस्य वध्वास्ताडङ्कमपहार्य तद्दण्डपदे द्रव्यलक्षत्रयं दत्त । तेन कर्मस्थायः स जात इति वार्तां शृण्वतो मालवके वर्षाकाल तस्थुषो राज्ञो वचनगोचरातीत प्रमोद संजात. । अथ प्रावृषेण्ये घने प्रगल्भवृष्ट्या क्षोणीमेकार्णवां कुर्वति वर्द्धापनिकाहेतो प्रधानपुरुषै प्रहित मरुदेशीयपुरुषो नृपतिपुरतः सविस्तरं वर्षास्वरूपं व्यज्ञपयत् । तदा त्वागतेन गूर्जरधूर्त्तेण नरेण सहस्रलिङ्गसरो भृतमिति स्वामिन् वर्द्धाप्यसे इति तद्वाक्यानन्तरमेव सिक्कपतितमार्जारस्येव मरुवृद्धस्य पश्यत सर्वाङ्गलग्नमाभरणं नृपतिर्गूर्जराय ददौ ।

३१ अथ वर्षानन्तरं प्रत्यावृत्त क्षितिपति श्रीनगरमहास्थाने दत्तावासो नगरप्रासादेषु ध्वजस्यालोके क एते प्रासादा इति ब्राह्मणान्पप्रच्छ । तैर्जिनब्रह्मादीनां प्रासादस्वरूपे निवेदिते सामर्षो राजा मया गूर्जरमण्डले जैनप्रासादाना पताकासु निषिद्धासु किं भवतामिह नगरे पताकावज्जिनायतनमित्यादिशस्तैर्विज्ञपयांचक्रे । अवधार्यता श्रीमन्महादेवेन कृतयुगप्रारम्भे महास्थानमिदं स्थापयता श्रीऋषभदेवनाथश्रीब्रह्मप्रा-

१ सहस्रलिङ्गकर्मस्थायविभाग याचितो राज्ञा तददत्त्वैव मालवकप्रति प्रयाणम करोत् a २ ताडङ्केऽन्यहारिते D ३ कर्मस्थाय परिपूर्ण शृण्वतो H ४ वर्द्धापयसे b c ५ मञ्चरचनाकृतसर्वावमरस्तत्र b H M ६ ध्वजव्रजमालोक्य c M श्रीब्रह्मप्रासादयो मुक्तिभि P

३५ अन्यदा श्रीसिद्धराजो नवघणाभिधानमाभीरराणकं निगृहीतुकामः पुरैकादशवारं निजसैन्ये पराजिते सति श्रीवर्धमानादिषु पुरेषु प्राकारं निर्माप्य स्वयमेव प्रयाणकमकरोत् । तद्भागिनेयदत्ते सङ्केते सति वप्रपरावर्तकालेऽयं द्रव्यव्यापादित एव करणीयो नवघनो न पुनरस्त्रादिभिरिति परिग्रहदत्तान्तरस्थः स विशालाच्छालाद्बहिराकृष्यं द्रव्यवासणैरेव ताडयित्वा व्यापादितः । अथ द्रव्यव्यापादित एव कृत इति वचनविज्ञापनात् परिग्रहो बोधितः ।

अथ तद्राज्ञ्याः शोकपतिताया वाक्यानि—

२३) सइरू नहीं स राणई कुलाईउ नकुलाइ इ ।
सइ सउ पङ्गारिहिं माणकइ वइसानारि होमीइँ ॥ १ ॥

२४) राणा सव्वे वाणिया जेसलु वड्डउ सेठि ।
काहूं वणिजडु माण्डीयउ अम्मीणा गढहेठि ॥ २ ॥

२५) पइं गरुआ गिरनार काहूं मणि मत्छरु धरिउ ।
मारीतां पङ्गार एकसिहरु न ढालिउं ॥ ३ ॥

२६) जेसल मोडि मवाह वलिवलि विरूपं भावयिइ ।
नइ जिम नवा प्रवाह नवघण विणु आवइ नेहि ॥ ४ ॥

---

१ प्राकारप्रकारं निरूप्य D H २ इति याचिते राज्ञा जयसिंहदेवेन सः शालात् a ३ बहिराकृष्टो H L ४ तं व्यापादयामास L H ५ इति वचनबलात्तद्भागिनेयपरिग्रह C ६ सयरू नहि स राण B न कुलाई न कुलाई H B ७ सई सउ पंगारिहि पाण विन वइसारि होमिया H B ८ वरुण c ९ नवयणविणआवै नही c

वलीं गरुआ गिरिनार दीहू बोलावउहूयउ ।
लहसि न बीजीवार एहासज्जणभारखम ॥
अम्हइ एतलइ संतो जडपभुवाअ पवावा ।
नकुराणि मन कुरोसु बेउ खगारिहि सउगिया ॥
मणतंबोलि म मागि झाखि मउघाल्इ मुहिं ।
देवलवाड उसागि खंगारिहि सउते गिया ॥
इत्यधिकानि वाक्यानि B आदर्शे

२७) वाढी तो वढवाणं वीसारतां न वीसरइ ।
सोनासमा पराण भोगावह पइं भोगवीइं ॥ ९ ॥

इत्यादीनि बहूनि वाक्यानि यथावसरं मन्तव्यानि ॥

३६ ततो महं० जाम्बान्वयस्य सज्जनदण्डाधिपते श्रीसिद्धराजेन योग्यतया सुराष्ट्रविषये व्यापारो नियुक्तः । तेन स्वामिनमविज्ञाप्य वर्षत्रयोद्ग्राहितेन श्रीमदुज्जयन्ते श्रीनेमीश्वरस्य काष्टमयं प्रासादमपनीय नूतनः शैलमयः प्रासादः कारितः । चतुर्थे वर्षे सामन्तचतुष्टयं प्रस्थाप्य सज्जनदण्डाधिपतिं श्रीपत्तने समानीय राज्ञा वर्षत्रयोद्ग्राहितद्रव्यं याचितः । तद्देशव्यवहारिणां पार्श्वात्तावद्द्रव्यमुपढौक्योज्जयन्तप्रासादजीर्णोद्धारपुण्यमुद्ग्राहितद्रव्यं वा द्वयोरेकमवधारयतु देव । इति तेनोक्ते श्रीसिद्धराजस्तद्बुद्धिकौशल्यचमत्कृतस्तीर्थोद्धारपुण्यमेवोररीचकार । स पुनस्तस्य देशस्याधिकारमधिगम्य शत्रुञ्जयोज्जयन्ततीर्थयोर्द्वादशयोजनयोर्यावद्दुकूलमयं महाध्वजं ददौ । इति रैवतकोद्धारप्रबन्धः* ॥

३७ अथ भूयः सोमेश्वरयात्रायाः प्रत्यावृत्त श्रीसिद्धाधिपो रैवतोपत्यकायां दत्तावासस्तत्रैव तत्कीर्तनं दिदृक्षु मत्सरोत्सेकपरैर्द्विजन्मभिः सजलाधारलिङ्गाकारोऽयं गिरिरित्यत्र पादस्पर्शं नार्हतीति कृतकवचनैर्निषिद्धस्तत्र पूजां प्रस्थाप्य स्वयं शत्रुञ्जयमहातीर्थसन्निधौ स्कन्धावारं न्यधात् । तत्र पूर्वोक्तैर्जातिपिशुनैः कृपाणिकापाणिभिरङ्कैस्तीर्थमार्गे निरुद्धे सति श्रीसिद्धाधिपो रजनीमुखे कृतकार्पटिकवेषः स्कन्धनिहितविहङ्गिकोभयपक्षन्यस्तगङ्गोदकस्तन्मध्येभूत्वाऽपरिज्ञातस्वरूप एव गिरिमधिरुह्य गङ्गोदकेन श्रीयुगादिदेवं स्नपयन् पर्वतसमीपवर्तिग्रामद्वादशकशासनं श्रीदेवार्चायै

१ वाढी तवडं वढमाण c २ सुना c ३ भोगावह पइ भोगिव्या c ४ सघनदण्ड D दण्डाधिपति a ५ सुराष्ट्रा B ६ द्वादशयोजनायाम b a K H

* *रैवतकोद्धारप्रबन्धो प्रभावकचरिते हे-सू. प्रबन्धे (श्लो. ३२७–३३७)* जिनमंडनगणीयकुमारपालप्रबन्धेऽपि वर्तते

७ स्व B ८ शकृतवेष D

विश्राणयामास । तर्थिदर्शनाचोन्मुद्रितलोचन इवामृताभिषिक्त इव जातः । अत्र पर्वते सल्लकीवनसरित्पूरसंकुले इहैव विन्ध्यं करिष्यामीत्यवन्ध्यप्रतिज्ञो, हस्तियूथनिष्पत्तये विहस्तमनसं मनोरथेनापि तीर्थविध्वंसपातकिनं धिग्मामिति श्रीदेवपादानां पुरतो राजलोकविदितं स्वं निनिन्द । सानन्दो गिरेरवततार ।

३८ अथ श्रीदेवसूरिचरितं व्याख्यास्यामः । तस्मिन्नवसरे कुमुदचन्द्रनामा दिगम्बरस्तेषु देशेषु चतुरशीतिवादैर्वादिनो निर्जित्य कर्णाटदेशाद् दुर्जरदेशं जेतुकामः कर्णावतीं प्राप । तत्र भट्टारकश्रीदेवसूरीणां चातुर्मासके स्थितानां श्रीअरिष्टनेमिप्रासादे धर्मशास्त्रव्याख्याक्षणे वचनचातुरीमनुच्छिष्टामाकर्ण्य तत्पण्डितैस्तद्वृत्तान्ते निवेदिते कुमुदचन्द्रस्तेषामुपाश्रये सतृणमुदकं प्रक्षेपितवान् । अथ तैर्महर्षिभिः पण्डितैः खण्डनतर्कादिप्रमाणप्रवीणैस्तस्मिन्नर्थेऽनाकर्णिततयाऽवज्ञाते सति श्रीदेवाचार्यजामिं तपोधनां चेटकैरधिष्ठितां विधाय नृत्यजलानयनादिभिर्विविधाभिर्विडम्बनाभिर्विडम्ब्य तेषु चेटकेष्वपहृतेषु तान् भृशं पराभवान्निर्भर्त्सनपरानपवार्य श्रीदेवसूरिभिरुक्तं वादविद्याविनोदाय भवता पत्तने गन्तव्यं । तत्र राजसभायां भवता सह वादं करिष्याम इत्यादिष्टे कृतकृत्यमनाः स आशावसनः श्रीपत्तनपरिसरं प्राप्तः । श्रीसिद्धराजेन मातामह गुरुरिति प्रत्युद्गमादिना सत्कृतस्तत्रावासान्दत्वा तस्थौ । श्रीसिद्धराजेन वादनिष्णाततां पृष्टाः श्रीहेमाचार्याश्चतसृषु विद्यासु परं प्रावीण्यं बिभ्राणं जैनमुनिगजयूथाधिपं सिताम्बरशासनवज्रप्राकारं नृपसभाशृङ्गारहारं कर्णावतीस्थितं श्रीदेवाचार्यT वादविद्याविदं वादीभकण्ठीरवं प्राहुः । अथ राज्ञा तदाह्वानाय प्रेषितविज्ञप्तिकायां श्रीसंघलेखेन सममागतायां श्रीदेवसूरयः पत्तनं प्राप्य नृपोपरोधाद्वाग्देवीमाराधयामासुः । तया तु वादिवेतालीय-

१ विन्ध्यवनं रचयिष्यामीति. ८ २ शान्त्याचार्यकृतोत्तराध्ययनवृत्तौ । ३ उपाहृतेषु C ३ T अतः T पर्यन्तो भाग a आदर्शे नास्ति

श्रीशान्तिसूरिविरचितोत्तराध्ययनबृहद्वृत्तौ दिगम्बरवादस्थले चतुरशीतिविकल्पजालोपन्यासे भवद्भि प्रतन्यमाने दिग्वाससो मुखे मुद्रा पतिष्यतीत्यादेशानन्तर गुप्तवृत्त्या कुमुदचन्द्रसन्निधौ पण्डितान्प्रस्थाप्य कस्मिन् शास्त्रे विशेषकौशलमिति ज्ञापिते ।

२८) देवादेशयं किं करोमि सहसा लङ्कामिहैवानये
जम्बूद्वीपमितो नयेयमथवा वारानिधिं शोषये ।
हेलोत्पाटिततुङ्गपर्वतशिरोग्रावत्रिनेत्राचल–
क्षेपक्षोभविवर्धमानसलिलं बध्नामि वा वारिधिम् ॥

इति तदुक्तिश्रवणात्सिद्धान्तकुशलता तस्याल्पीयसीमवगम्य जित मन्यमानाभ्या श्रीदेवाचार्यश्रीहेमचन्द्राभ्या प्रमुदितT । अथ देवसूरिप्रभो रत्नप्रभाभिधान प्रथमशिष्य क्षपामुखे गुप्तवेषतया कुमुदचन्द्रस्य गुरूदरे गत । तेन कस्त्वमित्यभिहिते अह देव । देव क । अह । अहं क । त्व । त्व क । श्वा । श्वा क । त्व । क अह देव इति तयोरुक्तिप्रत्युक्तिबन्धे चक्रभ्रम भ्रमति, आत्मान देव दिगम्बर श्वान च सस्थाप्य यथागत जगाम । तेन चक्रदोषप्रादुष्करणेन विषादनिषादसम्पर्कात् ।

२९) *हहो श्वेतपटा किमेष विकटाटोपोक्तिसटङ्कितै
ससारावटकोटरेऽतिविकटे मुग्धो जन पात्यते ।

---

१ शान्तिसूरिकृतोत्तराध्ययनसूत्रवृत्तौ (३–९) वर्ततेऽयमुपन्यास । २ देवा ज्ञापय D ३ अथानये किं C ४ वारानिधिं D

T अत्र निम्नावतारितो भाग H आदर्शेऽधिक –

अथ वाहडनामा महोपासक श्रीदेवसूरिं व्यजिज्ञपत् प्रभो प्रकटकपन्नेन दिक्पन्नेन गागिलाद्या प्रधानपुरुषा द्रव्यव्यय विधाय भेदिता सन्ति। यदि पूज्या आदिशन्ति तदा अहमपि तथा करोमीति श्रुत्वा देवसूरय प्राहु यदि ब्राह्मीप्रसादतो न जयस्तत्किमुत्कोचै शङ्कोचै सत्यसविदो ततोऽलमनेन प्रयासेन ।

५ विषादसम्पर्कात् B * पद्यमिदं मुद्रितकुमुदचन्द्रनाटकादुद्धृतम् (अ १ श्लो. ११)

तत्त्वातत्त्वविचारणासु यदि वो हेवाकलेशस्तदा
सत्यं कौमुदचन्द्रमङ्घ्रियुगलं रात्रिंदिवं ध्यायत ॥

इमां तदुचितां कवितां निर्माप्य[1] समादाय कुमुदचन्द्रः श्रीदेवसूरीन्प्रति प्राहिणोत्।

तदनु तच्चरणपरमाणुर्बुद्धिवैभवावगणितचाणाक्य. पण्डितमाणिक्यः।

३०) *कः कण्ठीरवकण्ठकेसरसटाभारं स्पृशत्यङ्घ्रिणा
कः कुन्तेन शितेन नेत्रकुहरे कण्डूयनं कांक्षति।
कः सन्नह्यति पन्नगेश्वरशिरोरत्नावतंसश्रिये
यः श्वेताम्बरशासनस्य कुरुते वन्द्यस्य निन्दामिमाम् ॥

अथ रत्नाकरपण्डितः—

३१) ᵀनग्नैर्निरुद्धा युवतीजनस्य
यन्मुक्तिरत्र प्रकटं हि तत्त्वम्।
तत्किं वृथा कर्कशतर्ककेलौ
तवाभिलाषोऽयमनर्थमूलः ॥

इति कुमुदचन्द्रं प्रति सोपहासं प्राहिणोत् ॥

अथ श्रीमयणल्लदेवी कुमुदचन्द्रपक्षपातिनी, अभ्यासवर्त्तिनः सभ्यांस्तज्जयाय नित्यमुपरोधयन्तीति श्रुत्वा श्रीहेमचन्द्राचार्येण वादस्थले दिगम्बराः स्त्रीकृतं सुकृतमप्रमाणीकरिष्यन्ति, सिताम्बरास्तं स्थापयिष्यन्तीति तेषामेव पार्श्वात्तद्वृत्तान्ते निवेदिते राज्ञी व्यवहाराद्बहिर्मुखे दिगम्बरे पक्षपातमुज्झांचकार। अथ भाषोत्तरलेखनाय सुखासनसमासीनः कुमुदचन्द्रः पण्डितरत्नप्रभश्चरणचारेणाऽक्षपटले[2] समागतौ। तदधिकृतैः—

१ निर्माय समये a * पद्यमिदं मुद्रितकुमुदचन्द्रनाटकादुद्धृतम् (अं.१ श्लो.२२ T पद्यं मुद्रितकुमुदचन्द्रनाटकादुद्धृतम् (अं. १ श्लो. २४) तत्र माणिक्येनोक्तम्।
२ भक्षिपटले C M

३२) केवलिहूउं न भुञ्जइ चीवरसहिअस्स नत्थि निव्वाणं
इत्थी हूया न सिज्झइ ई मयमेयं कुमुदचन्दस्स ॥

कुमुदचन्द्र इति भाषां लेखयामास । अथ सिताम्बराणामुत्तरम्—

३३) केवलि हूउविभुञ्जइ चीवरसहिअस्स अत्थि निव्वाणं
इत्थी हूयावि सिज्झइ मयमेयं देवसूरीणं ॥

इति भाषोत्तरलेखनानन्तरं निर्णीतवादस्थलवासरे श्रीसिद्धराजे समाजमागतवति, षड्दर्शनप्रमाणवेदिषु सभ्येषु समुपस्थितेषु कुमुदचन्द्रवादी पुरो वाद्यमानजयडिण्डिमो ध्रियमाणसितातपत्रः सुखासनसमासीनः पुरो वंशाग्रलम्बमानपत्रावलम्बः सिद्धराजसभायां नृपप्रसादीकृतसिंहासने निषसाद । प्रभुश्रीदेवसूरयश्च श्रीहेमचन्द्रमुनीन्द्रसहिताः समासिंहासनमेकमेवालंचक्रुः । अथ कुमुदचन्द्रवादी स्वयं ज्यायान् किञ्चिद्व्यतिक्रान्तशैशवं श्रीहेमचन्द्रं प्रति पीतं तक्र भवतेत्यभिहिते श्रीहेमचन्द्रस्त प्रति जरातरलितमते किमेवमसमञ्जस ब्रूषे श्वेतं तक्र पीता हरिद्रेति वाक्येनाध.कृत । युवयोः को वादीति पृच्छन्, श्रीदेवसूरिभिस्तन्निराकरणायायं भवतः प्रतिवादीत्यभिहिते कुमुदचन्द्र. प्राह । मम वृद्धस्यानेन शिशुना सह को वाद इति तदुक्तिमाकर्ण्याहमेव ज्यायान् भवानेव शिशुः योऽद्यापि कटीदवरकमपि नादत्से निवसनं च । इत्थं राज्ञा तयोर्वितण्डायां निषिद्धायामित्थं पणबन्धो मिथः समजनि पराजिते श्वेताम्बरैर्दिगम्बरत्वमङ्गीकार्यं । दिगम्बरैस्तु देशत्याग इति निर्णीते पणबन्धादनु स्वदेशकलङ्कभीरुभिर्देवाचार्यैः सर्वानुवादपरिहारपरैर्देशानुवादपरायणैः कुमुदचन्द्रं प्रति प्रथम भवान्कक्षीकरोतु पक्षमित्यभिहिते—

३४) *खद्योतद्युतिमातनोति सविता जीर्णोर्णनाभालय-
च्छायामाश्रयते शशी मशकतामायान्ति यत्राद्रय ।

---

१ तत्तिरस्करणाय D H २ दोरकं A o M

* पद्यमिदं मुद्रितकुमुदचन्द्रनाटकादुद्धृतम् (अं.५ श्लो.६) ३ र्णनाभालयच्छायां P

इत्थं वर्णयतो नभस्तव यशो जातं स्मृतेर्गोचरं ।
तद्यस्मिन्भ्रमरायते नरपते वाचस्ततो मुद्रिताः ॥

इति नृप प्रत्याशिषं ददौ । वाचस्ततो मुद्रिता इति तदीयापशब्देन सभ्यास्त स्वहस्तबन्धनमिति विमृशन्तो मुमुदिरे । अथ देवाचार्यः—

३५) नारीणा विदधाति निर्वृतिपदं श्वेताम्बरप्रोल्लस-
त्कीर्तिस्फातिमनोहरं नयपथप्रस्तारभङ्गीगृहम् ।
यस्मिन्केवलिनो न निर्जितपरोत्सेकाः सदा दन्तिनो
राज्यं तज्जिनशासन च भवतश्चौलुक्य जीयाच्चिरम्† ॥ १ ॥

नृप प्रतीमामाशिषं ददौ ॥ अथ वादी कुमुदचन्द्रः केवलिभुक्तिस्त्रीनिर्वाणचीरनिराकरणपक्षोपन्यासं पारावतविहङ्गमसदृशया स्खलितगिरा प्रारभमाण' सभ्यैरन्तर्विहसद्भि' प्रत्यक्षप्रशंसापरैः पुरस्क्रियमाणः । कियदुपन्यासप्रान्ते उच्यतामित्युक्तो देवाचार्य । प्रलयकालोन्मीलितप्रचण्डपवनक्षुभिताम्भोधिनिचितवीचीसमीचीभिर्वाग्भिर्वृहदुत्तराध्ययनवृत्तेश्चतुरशीतिविकल्पजालोपन्यासे प्रक्रान्ते भास्वत्प्रतिभाप्रसरपरिम्लानायमानकुमुदः कुमुदचन्द्र' सम्भ्रमभ्रान्तचेतास्तद्वचनान्यवधारयितुमक्षमो भूयस्तमेवोपन्यासं समभ्यर्थितवान् । सिद्धराजसभ्येषु निषेधपरेष्वपि अप्रमेयप्रमेयलहरीभिस्तं प्रमाणाम्भोधौ मज्जयितुं प्रारब्धे षोडशे दिने आकस्मिके देवाचार्यस्य कण्ठावग्रहे मान्त्रिकैः श्रीयशोभद्रसूरिभिरतुल्यकुरुकुल्लादेवीप्रसादलब्धवरैस्तत्कण्ठपीठारक्षणरक्षपणकक्रुतकार्मणानुभावात्क्लेशचण्डुक पातयांचक्रे । तच्चित्रनिरीक्षणाचतुरै' श्रीयशोभद्रसूरि श्लाघ्यमान , कुमुदचन्द्रश्चामन्दं निन्द्यमान , प्रमोदविषादौ दधाते । अथ श्रीदेवसूरिभिरुपन्या-

१ यस्मिन् H c २ विनिर्जित. H a c ३ भवतो A b † पद्यमिद मुद्रितकुमुदचन्द्रादुद्धृतम् (अ ५ श्लो ५) ४ उपमया सस्खलितस्खलितगिरा c ५ पुरस्क्रियमाणैः A ६ उपन्यासप्रक्रमे प्रस्तुत A ७ श्रीसूरिभिश्च c ८ यशोभद्रसूरिभिः P

सोपक्रमे कोटाकोटिरिति शब्दे प्रोच्यमाने, तच्छब्दव्युत्पत्तिं कुमुदचन्द्रे पृच्छति, कण्ठपीठे लुठिताष्टव्याकरण पण्डित काकल टापटीपसूत्रनिष्पन्नं शाकटायनव्याकरणोदित कोटाकोटि कोटीकोटि कोटिकोटिरिति सिद्ध शब्दत्रयनिर्णय प्राह। अथ प्रथममेव वाचस्ततो मुद्रिता इति स्वय पठितमिति स्वयमपशब्दप्रभावात्तदा तु प्रादुर्भूतमुखमुद्र श्रीदेवाचार्येण निर्जितोऽहमिति स्वयमुच्चरन् श्रीसिद्धराजेन पराजितव्यवहारादपद्वारेणापसार्यमाण सभवत्पराभवविर्भावाद्धृदिस्फोट[1] माप्य विपेदे ॥

३९ अनन्तर तु श्रीसिद्धराज प्रमोदमेदुरमना देवाचार्यप्रभावप्रभाव नाचिकीर्मूर्ध्नि[2] धारितसितातपत्रचतुष्टय प्रकीर्णकप्रकरवीज्यमान स्वय दत्तहस्तावलम्ब पूर्यमाणेषु[3] यमलशङ्खेषु रोद कुक्षिंभरिविभ्रम बिभ्रति नि स्वाननिस्वने स्फूर्जद्वर्यतूर्य[4]पूर्यमाणदिगन्तराले थाहड[5]नाम्नोपासकेन लक्षत्रयप्रमितद्रव्यव्ययकृतार्थीकृतार्थिसार्थे वादिचक्रवर्तिन पादावधार्यतामिति स्तुतिव्रातैरमन्दानन्दकन्दकन्दलनकारिणि मङ्गले मुहुर्मुहुरुच्यमाने श्रीदेवाचार्यान्थाहडेन[6] तेनैव कारितप्रासादे श्रीमन्महावीरनमस्करणपूर्व वसतौ प्रावेशयत्[7]। तत्पारितोषिके नृपति सूरिभ्योऽनिच्छद्भ्योऽपि छालाभ भृतिग्रामद्वादशक ददौ। तदुपश्लोकेन श्लोका एव—

३६) वस्त्रप्रतिष्ठाचार्याय नम श्रीदेवसूरये।
यत्प्रसादमिवाख्याति सुखप्रश्नेषु दर्शनम् ॥

इति श्रीप्रद्युम्नाचार्य ।

३७) यदि नाम कुमुदचन्द्र नाजेष्यद्देवसूरिरहिमरुचि ।
कटिपरिधानमधास्यत्कतम श्वेताम्बरो जगति* ॥

इति हेमाचार्य ।

---

१ कम्बस्फोटं H D २ प्रभावना चिकीर्षु C ३ पूर्यमाणेषु दिगन्तरालेषु D ४ ऊर्जतूर्य D ५ चाहड A ६ वाहडेन A D ७ प्रावेशयन् A b

* पद्यमिदं प्रभावकचरिते देवसूरिप्रबन्धेऽपि वर्तते (२५१)

३८) भेजेऽवकीर्णितां नग्न कीर्तिकन्थामुपार्जयन्[1]।
ता देवसूरिराच्छिद्य त निर्ग्रन्थ[2] पुनर्व्यधात्॥

इति श्रीउदयप्रभदेवः।

३९) वादविद्यावतोऽद्यापि लेखशालामनुज्झतो[4]।
देवसूरिप्रभो साम्य कथ स्याद्देवसूरिणा॥

इति श्रीमुनिदेवाचार्य·।

४०) नग्नो यत्प्रतिभाधर्मार्तकीर्तियोगपट्टं त्यजन्।
ह्रियेवात्याजि भारत्या देवसूरिर्मुदेऽस्तु व ॥ १ ॥

४१) सत्रागारमशेषकेवलभृतां भुक्ति तथा स्थापय-
न्नारीणामपि मोक्षतीर्थमभवत्तद्युक्तियुक्तोच्चैरे।
यः श्वेताम्बरशासनस्य विजिते नग्ने प्रतिष्ठागुरु-
स्तेद्वादुरुतोऽप्यमेयमहिमा श्रीदेवसूरिप्रभुः[7] ॥ २ ॥

इति मेरुतुङ्गसूरिणा द्वयमिति देवसूरीणां प्रबन्धः×।

४० ॥ अथ श्रीपत्तनवास्तव्य उच्छिन्नवंशक· आभडनामा वणिक् पुत्र कांस्यकारकहट्टे घर्घरकघर्षण कुर्वस्तत्र पञ्च विंपोपकानर्जयित्वा दिनव्ययं कुर्वाणो द्विसन्ध्यमपि श्रीहेमसूरीणां चरणमूले प्रतिक्रमणं प्रकृतिचतुरतयाऽधीतागस्त्यबौद्धमतादिरत्नपरीक्षाग्रन्थो रत्नपरीक्षकाणा सान्निध्यात्परीक्षादक्ष कदाचिच्छ्रीहेमचन्द्रसन्निधौ धनाभावात्परिग्रहप्रमाणानियमान्संकुचितान् गृह्णन् सामुद्रिकवेदिभि प्रभुभिरायतौ तद्भाग्यवैभवमसरं विमृशद्भिस्तस्य लक्षत्रयद्रम्माणां परिग्रहमानं कारयद्भिः सह संतुष्टतया व्यवहरन्, कस्मिन्नप्यवसरे क्वापि ग्रामे यियासुरन्तरालेऽजाव्रजं

१ कण्ठामुपार्ज्यं य A २ निग्रन्थ Pa ३ विद A ४ अमुञ्चता H ५ धर्मात A ६ स्पर्द्धावान् गुरुतो c लग्नप्रतिष्ठागुरुश्रीदेवाद्गुरुत D ७ श्रीदेवसूरि प्रभु D
– मुनिदेवसूरिकृते शान्तिनाथचरित्रे श्लोकबद्धेऽप्ययं श्लोक १२
× अयं देवसूरिप्रबन्धो प्रभावकचरितेप्यस्ति, मुद्रितकुमुदचन्द्रनाटकेऽपि प्रबन्धस्यास्य वस्तु गुम्फितम् ८ श्रीमालज्ञातीय D ९ पञ्च लोष्टिकान् (राजशेखरकृत प्रबन्धकोश पाठ) १० प्रतिकामन् D

अजन्तमालोऽस्यैकस्या अजाया कण्ठे पाषाणखण्ड रत्नपरीक्षकतया रत्नजातीय परीक्ष्य तल्लोभाचा मूल्येन क्रीत्वा मणिकारपार्श्वात्तमुत्तेजित निर्माप्य सिद्धराजमुकुटघटनाप्रस्तावे लक्षमूल्यद्रव्येण त नृपायैव ददौ । तेन नीवीधनेन मञ्जिष्ठास्थानकानि कदाचिदागतानि क्रीत्वा तद्विक्रयावसरे सायात्रिकैर्जलचोरभयाचदन्तानर्हिता काञ्चनरम्भिका पश्यन् सवम्य स्थानकेभ्यस्ता सजग्राह । तदनन्तर सर्वनगरमुख्य श्रीसिद्धराजमान्यो जिनशासनप्रभावक श्रावक प्रतिदिन प्रतिवर्ष यदृच्छया जेनमुनिभ्योऽन्नवस्त्रादि ददानो गुप्तवृत्त्या नव्यानि धर्मस्थानानि जीर्णानि च प्रशस्तिरहितानि स्वदेशेषु च समुद्धार ॥

४२) वल्लीछन्नद्रुम इव मत्स्नाच्छादितसमस्तबीजमिव ।
प्राय प्रच्छन्नकृत सुकृत शतशाखतामेति ॥

इति साह आभडप्रबन्धः[२] ॥

४१ अथान्यस्मिन्नवसरे श्रीसिद्धराज ससारसागर तितीर्षु प्रत्येक सर्वदेशेषु सर्वदर्शनेषु देवतत्त्वधर्मतत्त्वपात्रतत्त्वजिज्ञासया पृच्छ्यमानेषु निजस्तुतिपरनिन्दापरेषु सन्देहदोलाधिरूढमानस श्रीहेमाचार्यमाकार्य विचार्यकार्य पप्रच्छ। आचार्यैस्तु चतुर्दशविद्यास्थानरहस्य विमृश्येति पौराणिकनिर्णयो वक्तुमारेभे । यत्पुरा कश्चिद्व्यवहारी पूर्वपरिणीता पत्नीं परित्यज्य सगृहिणीसात्कृतसवस्व सदैव पूर्वपत्न्या पतिवशीकरणाय तद्वेदिभ्य कार्मणकर्माणि पृच्छ्यमाने कश्चिद्गौडदेशीयो रश्मिनियन्त्रित तव पतिं करोमीत्युक्त्वा किञ्चिदचिन्त्यवीर्य भेषजमुपानीय भोजनान्तर्देयमिति भाषमाण स गत । कियद्दिनान्ते समागते क्षयाहनि तस्मिंस्तथा कृते स प्रत्यक्षवृषभता प्राप । सा च तत्प्रतीकारमनवबुध्यमाना विश्वविश्वाक्रोशान्सहमाना निज दुश्चरित शोचन्ती कदाचिन्मध्यदिने दिनेश्वरक

१ छलीछन्न A c २ वसाह A अय साहआभडप्रबन्ध (आभडोत्पत्ति प्रबध) प्राचीनऽन्यस्मिन्पुस्तके नास्तीति डा भाउदाजीना स्वकीयादर्शप्रान्तभागे लिखितम् । किन्तुचतुर्विंशतिप्रबन्धे वर्तते ।

ठोरतरकरनिकरप्रसरतप्यमानापि शाडलभूमिषु तं पतिं वृषभरूपं चारयन्ती कस्यापि तरोर्मूले विश्रान्ता निर्भरं विलपन्ती, आलापं नभस्यकस्माच्छुश्राव। तदा तत्रागतो विमानाधिरूढः पशुपतिर्भवान्या तद्दुःखकारणं पृष्टो यथावस्थितं निवेद्य तस्यैव तरोश्छायायां पुंस्त्वनिबन्धनमौषधं तन्निर्बन्धादादिश्य तिरोदधे। सा तदनु तदीयां छायां रेखाङ्कितां निर्माय तन्मध्यवर्तिन औषधाङ्कुरानुच्छेद्य वृषभवदने क्षिपन्ती तेनाप्यज्ञातस्वरूपेणौषधाङ्कुरेण वदनन्यस्तेन स वृषभो मनुष्यतां प्राप। यथा तदज्ञातस्वरूपोऽपि भेषजाङ्कुरः समीहितकार्यसिद्धिं चकार तथा कलियुगे मोहात्तदपि तिरोहितं पात्रपरिज्ञानं सभक्तिकं सर्वदर्शनाराधनेनाऽविदितस्वरूपमपि मुक्तिप्रदं भवतीति निर्णयः। इति हेमचन्द्राचार्यैः सर्वदर्शनसन्माने[1] निवेदिते सति श्रीसिद्धराजः सर्वधर्माराधनां चकार। इति सर्वदर्शनमान्यताप्रबन्धः॥

४२॥ अथान्यदा निशि कर्णमेरुप्रासादे नृपतिर्नाटकं विलोकयन् केनापि चणकविक्रयकारिणा वणिग्मात्रेण स्कन्धन्यस्तहस्तेन[2] तल्लीलायितेन चित्रीयमाणमानसः स भूयो भूयस्तद्दीयमानं सकर्पूरवीटकं परितोषितो[3] गृह्णन् नाटकविसर्जनावसरेऽनुचरैस्तद्गेहादि सम्यगवगम्य सौधमासाद्य सुष्वाप। प्रत्यूषे भूपः कृतप्राभातिककृत्यः सर्वावसरेऽलङ्कृतसभामण्डपस्तं चणकविक्रयकारिणं विपणिनमाकार्य निशि स्कन्धन्यस्तहस्तभारेण ग्रीवा बाधते इत्यभिहिते तत्कालोत्पन्नमतिर्विज्ञपयामास। देव आसमुद्रान्तभूभारे स्कन्धाधिरूढे यदि स्वामिनो न बाधते स्कन्धस्तदा तृणमात्रस्य निर्जीवस्य मम पण्याजीवस्य भारेण[4] स्वामिनः को स्कन्धबाधेति तदीयौचित्यविज्ञपनेन प्रमोदान्[5] नृपः पारितोषिकं ददौ॥

इति चणकविक्रयिवणिजः प्रबन्धः॥

४३ अथान्यस्यां निशि नृपः कर्णमेरुप्रासादात्प्रेक्षणं प्रेक्ष्य प्रत्यावृत्तः

---

१ संमते A b H २ स्कन्धेन स्कन्धन्यस्तहस्तेन P a स्कन्धन्यस्तहस्तः H ३ परितोषिते P ४ भारेण का. D ५ प्रमोदवान् H P

कस्यापि व्यवहारिणो हर्म्ये बहून्दीपानालोक्य किमेतदिति पृष्ट स लक्षदीपास्तान्विज्ञपयामास। असौ धन्य इति । स्वसौधमध्यमध्यास्य व्यतीतक्षणदाक्षण स धन्यमानिन त सद समानीयेत्यादिदेश । एतेषा सदा प्रदीपाना प्रज्वालनेन भवत सदा प्रदीपन, तद्भवदीयवित्तस्य कियन्तो लक्षा इत्यभिहित स विद्यमानाश्चतुरशीतिलक्षान्निवेदयामास । तदनुकम्पाक्रम्पमानमानस स्वकोशात्षोडशलक्षान्प्रसादीकृत्य तत्सौधे कोटिध्वजमध्यारोपयामास । इति षोडशलक्षप्रबन्धः ॥

४४ अथान्यस्मिन्नवसरे राज्ञा कदाचिद्वालाकदेशे दुर्गभूमौ सिंहपुरमिति ब्राह्मणानामग्रहार स्थापितस्तच्छासने षड्डुत्तरशत ग्रामा । अथ श्रीसिद्धराज कदाचित्सिंहनादैर्भार्तविप्रैर्देशमध्यनिवास याचित साभ्रमतीतीरवर्तिनमाशाम्बिलीग्राम तेभ्यो ददौ । तेषा च सिंहपुराद्धान्यान्यादाय गच्छतामागच्छता च दानमोक्ष चकार ।

४५ अथ राज्ञा सिद्धराजेन मालवक प्रति कृतप्रयाणेन वाराहीग्रामपरिसरमाश्रित्य तदीयान् पट्टकिलानाहूय तच्चातुर्यपरीक्षाकृते निजा प्रधाना राजवाहनसेजवाली स्थपनिकार्थं समर्पिता । अथ नृपतौ पुरत प्रयाते ते सर्वैरपि सभूय तदङ्गानि प्रत्येक विदार्य यथावाञ्छित स्वस्वसौधे निदधिरे। अथ यदा प्रत्यावृत्तो नृपस्ता स्थपनिका तेभ्यो याचमानस्तद्भौन्तिभिन्नानि तदङ्गानि पश्यन् सविस्मय किमेतदित्यादिशस्तैर्विज्ञपयाचक्रे । स्वामिनेक कोऽप्यस्य वस्तुनो गोपनविधौ न प्रभूष्णुर्मलिम्लुचादिभ्य - कदाचिदपाये सजायमाने सति क प्रभोरुत्तरकतति विमृश्यैनदस्माभि-

१ स धन्यमानी A धन्यमानी P २ आशाम्बली A b ३दाण b ४ पट्टि c M ५ यानविशेष ६ स्थापनिकार्थं c ७ समार्पयत P ८ यथोचित c ९ स्थापनिकां (न्यास थापण इति भाषायां) P a १० मलिम्लुचानलादीनां कदाचिदपाये D

र्व्यवसितं। तदा राजा सविस्मयस्मेरमनास्तेषां वूंच इति बिरुदं ददौ। **इति वाराहीयावूंचप्रबन्धः ।**

४६ अथ कदाचिच्छ्रीजयसिंहदेवो नृपतिर्मालवकं विजित्य प्रत्यावृत्तः। उञ्झाग्रामे निवेशितस्कन्धावारस्तैर्ग्रामीणैः प्रतिपन्नमातुलैर्दुग्धपरिपूर्णाहारादिभिरुचितैः परितोप्यमाणस्तस्यामेव निशि गुप्तवृत्त्या तद्दुःखसुखजिज्ञासु कस्यापि ग्रामीणस्य गृहे गतः। गोदोहादिव्याकुलतायामपि तेन कस्त्वमिति पृष्टः, श्रीसोमेश्वरस्य कार्पटिकोऽहं महाराष्ट्रदेशवास्तव्य इति तस्मै न्यवेदयत्। तेन च नृपतेः पार्श्वे महाराष्ट्रदेशस्य तन्महाराजस्य च गुणदोषवृत्तान्ते पृच्छमाने स नृपतेस्तस्य पण्णवतिराजगुणान्प्रशंसंस्तत्क्षणं गूर्जराधीश्वरगुणदोषान्पृच्छन्। श्रीसिद्धराजस्य प्रजापालनपाण्डित्यं सेवकेष्वतुल्यवात्सल्यं चेत्यादीन्गुणान्वर्णयंस्तेन कृत्रिमदोषे उत्पाद्यमाने सोऽस्माकं मन्दभाग्यतया नृपतेरपुत्रतालक्षण एव दोष इत्यश्रूणि मुञ्चन्नृपतिं निःकैतववृत्त्या परितोपयामास। अथ प्रभातकाले संभूय सर्वेऽपि मिलिता नृपदर्शनोत्कण्ठिताः सौधमध्यास्य प्रभोः प्रणामानन्तरं तद्तुल्यपल्यङ्के निविष्टाः, आसनदाननियोगिभिः प्रदत्तेऽपि पृथगासने तत्सौकुमार्यं करस्पर्शेन विचिन्त्य वयमिह सुखसुखेन निषण्णास्तिष्ठाम इति नृपे स्मितमुखाम्भोजे तस्थुः। **इति उञ्झावास्तव्यग्रामीणानां प्रबन्धः×।**

४७ अथ कदाचिज्झोलाज्ञातीयमांगूनामा क्षत्रियः श्रीसिद्धराजसेवार्थं सभां गच्छन् प्रत्यहं पाराचीद्वयं भूमौ निहत्योपविशति। उद्ध-

---

१ व्रूच P ॰ अयं वाराहीयावूचप्रबंध. पुस्तकान्तरे नोपलभ्यते इति डा. भाउ दाजीना स्वपुस्तके लिखितमस्ति २ कुण्डा C झञ्झा D ३ आवाहादिभिः A b प्रवाहाद्दिभि. P ४ कुण्डा C × अयं उञ्झा (कुंडा) वास्तव्यग्रामीणानां प्रबन्धः पुस्तकान्तरे नोपलभ्यते इति डा. भाउ दाजीना स्वपुस्तके लिखितमस्ति ५ गाला b ६ पाषाणभेदक. शस्त्रविशेष (पराई भाषाया)

रन्ध्रयमुत्तिष्ठति। तस्य च भोजने घृतपरिपूर्ण कुतुपं एक एव व्यये याति तस्य तु घृताभ्यक्तदाढिकानिर्माजने घृतषोडशांशोऽवशिष्यते। कदाचिद्वपुरपाटवे पथ्यावसरे पञ्चमानकप्रमितयवागूपथ्यप्रान्ते आयुर्वेदविदामृतोदकमर्घाहारे किमिति न पीतमित्युपालब्धः। यतः—

४३) पिबेद्घटसहस्रं तु यावन्नाभ्युदितो रविः।
उदिते तु सहस्रांशौ बिन्दुरेको घटायते॥

रजन्याः पाश्चात्यघटिकाचतुष्टये सूर्यस्यानुदयावधि यत्पयः पीयते —जलयोग क्रियते तद्वज्रोदकं तदमृतोदकं, सूर्योदये समुत्पन्ने निरन्ने प्रातर्यदुदकं पीयते तद्विष, तत बिन्दुरेको घटशतायते। भोजनार्धे यज्जलं पीयते तदमृतं, भोजनान्ते तत्कालपीतं पय छत्रं छत्रोदकमिति भण्यते। तेन प्रोक्तं पुनः, पूर्वभुक्तमर्घाहार परिकल्प्य सम्प्रति पय पीत्वा पुनरर्घाहारं करिष्यामीत्युपक्रममाणस्तेनैव वैद्येन निषिद्ध। नृपतिना निरायुधकारणं पृष्ट, समयोचितं मे प्रहरणमिति विज्ञपयन्नन्यदा मज्जनावसरे हस्तिपप्रेर्यमाण हस्तिनमालोक्य सन्निहितश्वानेन शुण्डादण्डे निहत्य मर्मस्थाननिपीडितस्य गजस्य पुच्छभाग स गृह्णन् तदीयातुलेन बलेनान्तस्त्रुटितस्य करटिन उत्तारिते हस्तिपके भूपतितः सोऽसुभिर्न्ययुज्यत। स तु गूर्जरदेशभूपाले पलायिते समायातम्लेछान्समरे म्लेच्छयोच्छेदयन् यत्र दिवं प्राप्तस्तत्र श्रीपत्तने मांगूश्षण्टिलमिति प्रसिद्धि।

इति मांगूझालाप्रबन्धः।

४८ *अन्यदा म्लेच्छप्रधानेषु समायातेषु मध्यदेशागतान्वेषकारकानाहूय रहस्य किञ्चिदादिश्य विससर्ज नृपः। अथापरस्मिन्सायाह्ने च*

१ उत्तिष्ठस्तद्द्वयमुद्धरति c २ कुम्भ A D ३ व्याप्यवसरे A ४ अस्तमित c ५ अस्तं याते C ६ बिन्दुर्घटशतायते C D ७ छत्र छत्रोदकं c ८ तनोऽसौ c ९ पूर्वार्ध A १० उत्तरिते भूपतौ H C M उत्तारिते नृपतौ D ११ म्लेच्छेशेषु a १२ रहः स किंचिदाहूय D

समागते प्रलयकालप्रचण्डपवनप्रादुर्भावे नृप सुधर्मसधर्माणमास्थानीमास्थाय यावदवलोकते तावदन्तरिक्षादवतरन्तं मस्तकन्यस्तकाञ्चनेष्टिकायुगेन काञ्चनशोभां बिभ्राणं पलादयुगलमालोक्य भयभ्रान्ते समाजलोके नृपचरणपीठे तदुपायनं विमुच्य भूपीठलुठनात्पूर्वं प्रणिपत्येति विज्ञपयामास । यदद्य देवार्चनावसरे लङ्कानगर्यां महाराजाधिराज श्रीविभीषणो राजस्थापनाचार्यस्य रघुकुलतिलकस्य श्रीरामस्याभिरामगुणग्रामाभिरामस्य स्मरन् ज्ञानमयेन चक्षुषा सम्प्रति चालुक्यकुलतिलकं श्रीसिद्धराजावतारेऽवतीर्णं स्वयं स्वीयं स्वामिनमवधार्योत्कण्ठोत्कटायमानमनसोऽहं तत्र प्रणामकरणायागच्छामीति किंवा प्रभुर्मामत्रागमनेनानुमहीप्यतीति विज्ञपयन्तौ प्रहितवान् । तन्निर्णयं श्रीमुखेन समादिशतु देव । ताभ्यामित्यभिहिते नृपति किञ्चिदन्तर्विचिन्त्य स तावेवं समादिशत् । यद्वयमेव प्रफुल्लायलककलहरीप्रेर्यमाणाः स्वसमये स्वयमेव विभीषणमिलनाय समेष्याम इत्युदीर्य निजकण्ठशृङ्गारिणमेकावलीहारं प्रतिप्राभृतं प्रसादीकृतं । प्रभुणाहमयमपि प्रेष्यप्रेषणावसरे न विस्मरणीय इति विशेषविज्ञप्तिं विधायान्तरिक्षमार्गेण तद्राक्षसद्वन्द्वं तिरोधत्ते । तदैव ते म्लेच्छप्रधानपुरुषा भयभ्रान्ताः स्वपौरुषमुत्सृज्य नृपपुरत आहूता भक्तिभारभासुराणि वचांसि ब्रुवाणास्तद्राजाय समुचितमुपायनमुपनीय श्रीसिद्धराजेन व्यसृज्यन्त । इति म्लेच्छागमनिषेधप्रबन्धः ॥

४९ अथानन्तरं कोल्लापुरनगरराजस्य सभायां बन्दिनः श्रीसिद्धराजस्य कीर्तिं वितन्वन्तः, तदा तथ्यं सिद्धराजं वय मन्यामहे यदा प्रत्यक्षमप्यस्माकं कमपि चमत्कारं सिद्धराजो दर्शयतीत्येतद्ब्रुवाणेन तेन राज्ञा

---

१ अवसरे b H c D २ इन्द्रसभा. ३ अकुण्ठोत्कण्ठाघटमान HD ४ नमः A C ५ प्रसादीकृत्य a H ६ आपृच्छनावसरे प्रभुणाहमन्यस्मिन्नपि. a H ७ व्यजृम्भन्त D * अथ म्लेच्छागमनिषेधप्रबन्धः पुस्तकान्तरे नास्तीति डा. भाउदाजीना लिखितं ८ कौल्लाकपुर D

ते पराकृतास्तत्स्वरूपं नृपतेर्विज्ञपयामासुः । अथ स्वामिनि सभां निभालयति तच्चित्तवेदिना केनापि नियोगिनाञ्जलिविन्धपूर्वकं निजाभिप्राये प्रादुःक्रियमाणे राज्ञा स रहसि तत्कारणं पृष्टो नृपतेराशयं विज्ञपयन् द्रव्यलक्षत्रयसाध्योऽयमर्थ इति वाक्यविशेषमाह । तदैव दैवज्ञनिर्दिष्टे मुहूर्ते स नृपाल्लक्षत्रयमुपलभ्य वणिगाकारो भूत्वा सर्वभाण्डानि सगृह्य सिद्धसङ्केतं रत्नखचितं सुवर्णपादुकायुगलमतुलं योगदण्डं च मणिमयकुण्डलयुगलं च तद्विधयोगपिशुनं योगपट्टं च चण्डांशुरोचिश्चण्डातकं सह नीत्वा पथानमुल्लङ्घ्य कतिपयैरहोभिस्तत्पुरे दत्तावासः । आसन्नायां दीपोत्सवनिशि तन्नगरराज्ञोऽवरोधे महालक्ष्मीदेव्याः पूजार्थं तत्प्रासादमुपेयुषि स कृतकसिद्धरूपस्तेन वेषेणालङ्कृतः, केनापि सदभ्यस्तोत्पतनेन बर्बरेणानुगम्यमानो देव्याः पीठेऽकस्मात्प्रादुरासीत् । देव्या रत्नमयसुवर्णकर्पूरमयीं सपर्यां विरचय्य तदवरोधाय तद्विधानि वीटकानि ददानः श्रीसिद्धराजनामाङ्कितं सिद्धवेषं पूजाव्याजात्तत्र नियोज्योत्पतनवशाद्बर्बरस्कन्धमधिरुह्य यथागतमगात् । निशावसाने समयेऽवरोधैस्तु विरोधीनृपवृत्तान्तं ज्ञापितः सन् भयभ्रान्तो नृपः स्वप्रधानपुरुषैस्तत्प्राभृतं सिद्धाधिपतये प्राहिणोत् । अथ तेन नियोगिना भाण्डादिक्रयविक्रयं संक्षिप्य । समागमनावधि नैतेषां प्रधानानां दर्शनं देयमिति वेगवता पुरुषेण विज्ञपयामास । तदनु झटिति कतिपयैर्दिनैस्तत्र समुपेतः । तत्स्वरूपं विज्ञप्तो नृपतिस्तेषां प्रधानानां तदुचितामावर्जनां चकार । इति

कोल्लापुरराजप्रबन्धः* ॥

८० श्रीसिद्धराजेन मालवमण्डलाद्यशोवर्मा नृपतिर्निनध्यानीतः । अवसरे क्रियमाणे सीलणाभिधानकौतुकिना "बेडाया समुद्रो मग्न इति" तत्पृष्टगायनेनापशब्दं ब्रूपे इति तर्जितो बेडासमानाया गूर्जरधरित्र्या

१ ततत्त्व P २ सिद्धराड्वेव P ३ चन्द्रातप P

* अयं कोल्लापुरराजप्रबन्ध पुस्तकेऽन्यस्मिन्नास्तीति डा. भाउदाजीना लिखितं

मालवकसमुद्रो मग्न इति विरोधालङ्कारमर्थापत्त्या परिहरन्प्रभोर्हेममयीं जिव्हां प्राप । इति **कौतुकीसीलणप्रबन्धः** ॥

५१ कदाचित्सिद्धराजस्य *वाग्मी कश्चित्सान्धिविग्रहिको जयचन्द्र*-नाम्ना काशीपुरीश्वरेण श्रीमदणहिल्लपुरस्य प्रासादप्रपानिपानादिस्वरूपाणि पृच्छ्येतेति दूषणमुक्तः । यत्सहस्रलिङ्गसरोवरवारि शिवनिर्माल्यं तदस्पृश्यतया तत्सेवमानो लोकद्वयविरोधेन तत्रत्यलोकः कथमुदितोदितप्रभावः स्यादिति । सिद्धाधिपेन सहस्रलिङ्गसरः कारयताऽनुचितमिदमाचरितमिति तस्य नृपतेर्वचसान्तः कुपितः स नृपं पप्रच्छ । अस्यां वाराणस्यां कुतस्त्यं पयः पीयते ? नृपेण त्रिपथगाजलमित्यभिहिते किं नाम सुरसरिन्नीरं शिवनिर्माल्यं न यतः शिवोत्तमाङ्गमेव गङ्गानिवासभूमिः । इति **जयचन्द्रराजेन गूर्जरप्रधानस्योक्तिप्रबन्धः** ॥

५२ कस्मिन्नप्यवसरे कर्णाटविषयादागतेन सान्धिविग्रहिकेण श्रीमयणल्लदेव्या पितुर्जयकेशिराजस्य कुशलोदन्ते पृष्टेऽश्रुमिश्रलोचनेनेति सा विज्ञपयामास । स्वामिनि सुगृहीतनामा जयकेशिमहीन्द्रोऽशनावसरे पञ्जरात्क्रीडाशुकमाकारयन्, तेन मार्जार इत्युच्चरिते नृपः परितो विलोक्य निजभोजनान्धोऽधोभागवर्तिनमोतुमपश्यन् यदि तव बिडालेन विनाशः स्यात्तदाहं त्वया सह गमनं करवाणीति प्रतिज्ञाते स यावत्पञ्जरादुड्डीय तस्मिन्काञ्चनभाजने निषीदति तावदकस्मात्तेन वृकदंशेन तं विनाशितमालोक्य परित्यक्ताशनकवलः । उक्तियुक्तिवेदिना राजवर्गेण निषिध्यमानोऽपि—

४४) राज्यं यातु श्रियो यान्तु यान्तु प्राणा अपि क्षणात् ।
या मया स्वयमेवोक्ता वाचा मा यातु शाश्वती ॥

इतीष्टदैवतमिव तामेव गिरं जपंस्तेनैव शुकेन सह दारुनिचितां

१ निजभोजनभाजनाधोभागवर्तिन C D H M २ याचनया D ३ देवता C

चिता विवेश । इति वाक्याकर्णनाच्छोकाम्भोधिमग्ना श्रीमयणल्लदेवी विशेषधर्मोपदेशहस्तावलम्बनेन विद्वज्जन समभ्युद्धार ।

९३ अथ सा पितु श्रेयसे श्रीसोमेश्वरपत्तने यात्रा गता सती त्रिवेदिन कमपि ब्राह्मणमाकार्य तदञ्जलौ जलन्यासावसरे यदि भवत्रयपातक लासि तदा ददामि नान्यथेति तद्वचनविशेषपरितोषभाक् गजाश्व काञ्चनादिभिर्युत पापघटमाददौ । स च तत्सर्वं विप्रेभ्यो ददान किमिति देव्या पृष्ट प्राह । प्राक्तनपुण्यादस्मिन् जन्मनि नृपप्रिया नृपतिजननी भूत्वा लोकोत्तरैरेभिर्दाने सुकृतैर्भावी भवोऽपि श्रेयस्कर इति विमृश्य भवत्रयपातक मया जगृहे । भवत्या पापघटदाने उपक्रान्ते कश्चिदधमद्विजोऽपि पापघट नीत्वा स्व भवती च भवाम्भोधा मज्जयिष्यतीति मया तु सन्यस्तसमस्तविचेन वित्तमेतदादाय पुनर्ददता लब्धादिष्ट गुण पुण्य लब्धमिति श्रेय स जगृहे । इति पापघटस्य प्रबन्धः ॥

९४ ॥ अथ कदाचिन्मालवकमण्डल विगृह्य स्वदेशनिवेश प्रति चालित श्रीसिद्धाधिपोऽन्तरालेऽप्रतिमल्लैर्भिल्लै रुद्धमध्वानमवधार्य तस्मिन्वृत्तान्ते ज्ञाते सति मन्त्री सान्तूनामा प्रतिग्राम प्रतिनगर घोटकमुद्ग्राह्य प्रतिवृष पर्याणानि विन्यस्य मेलितातिदलबलेन मिल्लान्वित्रास्य श्रीसिद्धराज सुखेन समानीतवान् ॥ इति सान्तूमन्त्रिप्रबन्धो बुद्धिवैभवप्रबन्धो वा ॥×

९५ अथ कस्याचिन्निशि द्वावकुण्ठावेव वण्ठौ श्रीसिद्धराजस्य चरण सवाहनव्यापृतौ त निद्रामुद्रितलोचन विचिन्त्य तदाद्यो निग्रहानुग्रहसमर्थ श्रीसिद्धराज सेवकजनकल्पवृक्ष सर्वराजगुणनिलय प्रशशस । अपरस्त्व स्यापि भूपते प्राज्यराज्यप्रद प्राक्तन कर्मैव श्लाघितवानेवमाकर्णिते तेन राज्ञा तस्मिन्वृत्तान्ते तत्कर्मण प्रशसा विफलीकर्तु स्वप्रशसाकारिण

१ त्रिवदीवद्नि A २ तदा ददासि a ३ दानैयुत D ४ लब्धादिष्टगुण P
* अय पापघटप्रबन्ध पुस्तकान्तरे नास्तीति डा भाउदाजीना लिखित ५ बलस्तद्बलेन c दलस्तद्बल्न K × अय सान्तूमन्त्रीप्रबन्धोऽन्यस्मिन्नास्ति पुस्तके इति डा भाउदाजीना लिखितम् ६ सवाहना D ७ आकर्णितेन P

प्रेष्यस्यापरस्मिन्नहन्यऽनिवेदिततत्त्वस्य प्रसादलेखमार्पयत्[1] । यदस्मै वण्ठाय तुरङ्गमशतस्य सामन्तता देयेत्यालिख्यं तं महामात्य-श्रीसान्तूपार्श्वे प्राहिणोत् । अथ स यावच्चन्द्रशालाया निःश्रेण्यामवरोहति तावत्प्रस्खलितपदः पृथिव्यां पतदीषदङ्गभङ्गमङ्गीकृतवान् । तत्पृष्ठानुगामिनाऽपरेण वण्ठेन किमेतदिति पृष्टे तेन स्वस्वरूपे निवेदिते स मञ्चकन्यस्तो गृहं गत्वा तमपरस्मै[2] समर्पितवान् । तत्प्रमाणेन महामात्यस्तस्मै शततुरङ्गमसामन्ततां ददौ । अथ तयोर्यथावद्वृत्तान्तेऽवधारिते नृपतिः कर्मैव बलीय इति तत्प्रभृति मेने यथा—

४९) *नैवाकृति फलति नैव कुलं न शीलं
विद्या न चापि मनुजेषु कृता न सेवा[3] ।
पुण्यानि[4] पूर्वतपसा किल सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ १ ॥ इति वण्ठकर्मप्राधान्यप्रबन्धः ॥

४६) सो जयउ कूडच्छरडो[5] तिहुयणमज्झम्मि[6] जेसलनरिन्दो ।
छित्तूण रायवंस[7] इकं छत्त कयं जेण ॥ १ ॥

४७) महालयो महायात्रा--०(इत्यादिपृ. १०२*टिप्पण्यां संपूर्णः)

४८) मात्रयाप्यधिकं किञ्चिन्न सहन्ते जिगीषव ।
इतीव त्वं धरानाथ धारानाथमपाकृथाः ॥ २ ॥+

---

१ आलेख्य C २ प्रसादलेख a

* वल्लभदेवकृतसुभाषितावल्यां श्लो. ३१०० अश्वघोषस्येति प्रदत्तस्तत्रः—
विद्या सहस्रगुणिता न च वाग्विशुद्धिः ।
कर्माणि पूर्वशुभसंचयसञ्चितानीति पाठभेदः ॥
भर्तृहरिकृतनीतिशतकेऽपि वर्तते (९६) पद्यमिदम्

३ तपोऽपि न च यत्नकृतापि सेवा a D ४ भाग्यानि b D ५ नरडो b ६ मज्झम्मि b ७ रायवंसे b + सिद्धहैमप्रशस्त्यां पद्यमिदम् (श्लो. २१)

४९) मानं मुञ्च सरस्वति त्रिपथगे सौभाग्यभङ्गीस्त्यज
रे कालिन्दि तवाफला कुटिलता रेवे रयस्त्यज्यताम् ।
श्रीसिद्धेशकृपाणिपाटितरिपुस्कन्धोच्छलच्छोणित–
स्रोतोजातनदीनवीनवनिनारक्तोऽम्बुधिर्वर्तते ॥ ३ ॥

५०) *श्रीमज्जैत्रमृगारिदेवनृपते सत्यं प्रयाणोत्सवे
पानीयाशयशोषणै करटतो वीरव्रणाकाङ्क्षया ।
स्वीयस्वीयपतेर्विनाशसमयं सञ्चिन्त्य चिन्तातुरा
मत्सी रोदिति मक्षिका च हसति ध्यायन्ति वामं स्त्रियः॥ ४॥

५१) सपादलक्षः सह भूरिलक्षै—
रानाकभूपाय नताय दत्त ।
हृते यशोवर्मणि मालवोऽपि
त्वया न सेहे द्विषि सिद्धराज ॥ ५ ॥

इत्योद्या बहुशः स्तुतयः प्रबन्धाश्च तदीयाः ॥
संवंत् ११९० पूर्वं श्रीसिद्धराजश्रीजयसिंहदेवेन वर्षाणि ४९ राज्यं कृतं॥

इति मेरुतुङ्गाचार्यकृते प्रबन्धचिन्तामणौ श्रीकर्णश्रीसिद्धराजयोर्विविधचरित्रनानावदातवर्णनो नाम तृतीयः प्रकाशः ॥

१ कृपाण C २ वीरव्रन b ३ वामभुज b ४ तुरि D * ५०,५१ श्लोकौ M आदर्शेन दृश्येते ५ इत्याद्या बहवस्तदीया स्तुतय प्रबन्धाश्च ॥ D ६ संवत् ११५० वर्षे उपविष्टो जयसिंहदेवस्तथानेन वर्षे ४९ राज्यं कृतं P प्रद्युम्नसूरिकृत विचारसारस्योल्लेख प्रथमसंपादकेनात्रकृतः ।

श्रीः

प्रबन्धचिन्तामणिः

चतुर्थः प्रकाशः

कुमारपालप्रबन्धः

१ अथ परमार्हतश्रीकुमारपालप्रबन्धः प्रारभ्यते। श्रीमदणहिलपुरपत्तने बृहति श्रीभीमदेवे साम्राज्यं पालयति श्रीभीमेश्वरस्य पुरे चउलादेवीनाम्नी¹ पण्याङ्गना पत्तने प्रसिद्धं गुणपात्रं रूपपात्रं च² तस्याः कुलयोपितोऽप्यतिशायिनीं प्राज्यमर्यादां नृपतिर्विमृश्य तस्यास्तद्वृत्तपरीक्षानिमित्तं सपादलक्षमूल्यां क्षुरिकां निजानुचरैस्तस्यै ग्रहणके दापयामास। औत्सुक्यात्तस्यामेव निशि बहिरावासे प्रस्थानलग्नमसाधयत्। नृपो वर्षद्वयं यावन्मालवकमण्डले विग्रहाग्रहात्तस्थौ³। सा चउलदेवी⁴ तद्वित्तग्रहणकप्रामाण्येन तद्वर्षद्वयं परिहृतसर्वपुरुषा शीललीलयैव तस्थौ। निस्सीमपराक्रमो भीम. कृती स्वस्थानमागतो जनपरंपरया तस्यास्तां प्रवृत्तिमवगम्य तामन्त.पुरे न्यधात्। तदङ्गजो हरिपालस्तत्सुतस्त्रिभुवनपालस्तत्पुत्र. कुमारपालदेवः। स त्वविदितधर्मोऽपि⁶ कृपापर. परनारीसहोदरश्च। स तु सामुद्रिकवेदिभिर्भवदनन्तरमयं नृपो भविष्यतीति सिद्धनृपो विज्ञप्तस्तस्मिन्हीनजातावित्यसहिष्णुस्तस्य विनाशावसरमन्वेषयामास सततं। कुमारपालस्तं वृत्तान्तमीषद्विज्ञाय तस्मान्नृपते. शङ्कमानमानस तापसवेषेण निर्मितनानाविधदेशान्तरभ्रमणः कियन्त्यपि वर्षाण्यतिवाह्य पुनः पत्तनमागतः क्वापि मठे⁷ तस्थौ। अथ श्रीकर्णदेवस्य श्राद्धावसरे श्रद्धालुतया निमन्त्रितेषु सर्वेष्वपि तपस्विषु श्रीसिद्धराज. प्रत्येकं तेषां तपस्विनां स्वयं पादौ प्रक्षा-

१ चउलादेवीनामा C बकुलादेवी M बउलादेवी b H २ चातीव तस्या. c ३ विग्रहाय D ४ सा तु बउला b H ५ तृतीयवर्षे M H a ६ तु विदित धर्मोऽपि a P ७ श्रीमदादिभूपतेरशठो मठे c

लयन् कुमारपालनाम्नस्तपस्विनः कमलकोमलौ चरणौ करतलेन संस्पृश्य तदूर्ध्वरेखादिभिर्लक्षणै राज्यार्होऽयमिति निश्चलया दृशापश्यत् । तदिङ्गितैस्तं विरुद्धं विबुध्यमानस्तदैव वेषपरावर्त्तेन काकनाशं नष्टः । आलिङ्गनाम्नः कुलालस्यालये मृत्पात्राणां पाके रच्यमाने तदन्तर्निधाय तदानुपदिकेभ्यो रक्षितः स क्रमात्ततः सञ्चरन् तद्विलोकनाकुलितेन राजलोकेन त्रासितः सन्निहितां दुर्गमां भूमिमनवलोक्य क्वापि क्षेत्रे क्षेत्ररक्षकैः क्रियमाणछिन्नकण्टकिशाखिशाखानिचये समुपचीयमाने तं तदन्तर्निधाय तेषु स्वस्थानमागतेषु, पदिकेन पदे तत्रानीते सर्वथा तत्रासम्भावनया कुन्ताग्रेण भिद्यमानेऽपि तस्मिंस्तमनासाद्य व्यावृत्ते राजसैन्ये द्वितीयेऽह्नि क्षेत्राधिकृतैस्ततः स्थानादुद्धृतः पुरतः क्वापि प्रान्तरान्तर्व्रजन् क्वापि तरुच्छायायां विश्रान्तः सन् बिलान्मूषकं मुखेन रूप्यनाणकमाकर्षन्तं निभृतया दृशा विलोक्य यावदेकविंशतिसंख्यानि दृष्ट्वा पुनस्तेभ्य एकं गृहीत्वा बिलं प्रविष्टे पाश्चात्यानि तु सर्वाणि स गृहीत्वा यावन्निभृतीभवति तावत्स तान्यनवलोक्य तदर्त्त्या विपेदे । स तच्छोकव्याकुलितमानसश्चिरं परितप्य पुरतो व्रजन्, कयापीभ्यवध्वा श्वशुरगृहात्पितृगृहं व्रजन्त्या, पथि पाथेयाभावाद्दिनत्रयं क्षुत्क्षामकुक्षिर्भ्रातृवात्सल्यात्कर्पूरपरिमलशालिशालिकरम्बेण सुहितीचक्रे । तदनु स विविधानि देशान्तराणि परिभ्रमन्स्तम्भतीर्थे मह॰ श्रीउदयनपार्श्वे शम्बलं याचितुमागत । तं पौषधशालायामागतमाकर्ण्य तत्रागते तस्मिन्नुदयनेन पृष्टः श्रीहेमचन्द्राचार्य प्राह । लोकोत्तराणि तदङ्गलक्षणानि वीक्ष्य सार्वभौमोऽयं नृपतिर्भावीत्यादिशत् । आजन्म दारिद्र्योपद्रुततया तां वाचं संदिग्धतया मन्यमानेन तेन, क्षत्रिये नौसंभाव्यमेतदिति विज्ञप्ते, सं. ११९९ वर्षे कार्त्तिकवदि२ रवौ हस्तनक्षत्रे यदि भवतःपट्टाभिषेको न भवति तदाऽतःपरं निमित्तावलोकसंन्यास इति पत्रकमालिख्यैकं

१ राजपुरुषेभ्यो रक्षितः M K H २ दुर्गभूमिमवलोक्य a P ३ ध्वाक्षरक्षकैः M H ४ प्रातरान्तर्व्रजन् M P ५ पश्चादन्यानि H ६ यथार्थममन्यमानेन H ७ क्षत्रियेणासंभाव्य M a K

६ महं० उदयनदेवस्य पुत्रो वाहडनामा कुमारः श्रीसिद्धराजस्य प्रतिपन्नपुत्रः श्रीकुमारपालदेवस्यावज्ञामेव मन्यमानः सपादलक्षीयभूपतेः पत्तिभावं बभार। तेन श्रीकुमारपालभूपालेन सह विग्रहं चिकीर्षुणा तत्रत्यं सकलमपि सामन्तलोकं लञ्चोपचारदानैः स्वायत्तीकृत्य दुर्वारस्कन्धावारोपेत सपादलक्षक्षोणीपतिं सहादाय देशसीमान्तमागतः। अथ चौलुक्यचक्रवर्ती अभ्यमित्रीणतया स्कन्धावारसमीपे निजं चमूसमूहं निवेशयामास। निर्णीते समरवासरे, निष्कण्टके क्रियमाणे सीमनि, सज्जीक्रियमाणायां चतुरङ्गसेनायां चउलिङ्गनामा पट्टहस्तिनो हस्तिपकः कस्मिन्नप्यागसि नृपेणाक्रुश्यमाणः क्रोधादङ्कुशं तत्याज। अथ सामलनामाऽमात्रगुणपात्रं महामात्रं पुष्कलवसुदानपूर्वकं तत्पदे नियोजितः सन् राज्ञा स्वकलहपञ्चानननामानमनेकपं प्रक्षरितं कृत्वा तदुपरि नृपासनं निवेश्य तत्र षट्त्रिंशदायुधानि नियोजयन्सकलकलाकलापसंपूर्णः कलापके चरणौ नियोज्य स्वयमारूढवान्। तदासनस्थश्चौलुक्यभूपालोऽपि संग्रामाधिकृतपुरुषैरुत्थापनिकां कार्यमाणेषु वाहडकुमारभेदादाज्ञाभङ्गकारिषु, इति सैन्यविप्लवमाकलय्य तं निषादिनमादिदेश पुरो गन्तुं, सन्मुखसेनायां सपादलक्षक्षितिपतिमतङ्गजं छत्रचामरसङ्केतादुपलक्ष्य विघटिते कटकबन्धे मयैवैकाकिना योद्धव्यमिति निर्णीय तेनाधोरणेन स्वसिन्धुरं तत्सन्निधौ नेतुमादिशन्नपि तमपि तथाऽकुर्वाणं विलोक्य त्वमपि विघटितोऽसीत्यादिशंस्तेन विज्ञपयांचक्रे। स्वामिन्कलहपञ्चाननो हस्ती सामलनामा हस्तिपकश्च द्वयं युगान्तेऽपि न विघटते परं परस्मिन्कुम्भिकुम्भे वाहडनामा कुमारस्तारघ्वनिरधिरूढोऽस्ति यस्य हक्कया हस्तिनोऽपि भज्यन्ते इत्युक्त्वोत्तरीयाञ्चलयुगलेन सिन्धुरश्रवणौ पिधाय स निजं गजं प्रतिगजेन संघट्टयामास। अथ वाहडः पूर्वमात्मसात्कृतं चउलिङ्गनामानमारोहकं जानन् कृपाणपाणिर्निज-

१ चाहडनामा L २ आज्ञामवमन्यमानः c M ३ दानादिना h L ४ दुकूलवस्त्रदानपूर्वकं K H ५ विघटयिष्यते A ६ चाहडनामा L ७ युगलं सिन्धुरश्रवणयोरधिरोप्य L। ८ चाहड L

गजात्कलहपञ्चाननकुम्भे पदं ददानः श्रीकुमारपालविनाशाशया, तेन नियन्त्रा पश्चात्कृते गजे स भूमौ पतितस्तलवर्गीयपदातिभिरधारि । तदनु चौलुक्यभूपतिना श्रीमदानाकनामा सपादलक्षनृप. शस्त्रसज्जो भवेत्यभिहितस्तन्मुखकमलं प्रति औचित्याच्छिलीमुखं व्यापारयन् प्रधानक्षत्रियोऽसीति सोपहासश्लाघया त वञ्चयित्वा नाराचेन निर्भिद्य कुम्भीन्द्रकुम्भे पातयित्वा जितं जितमिति ब्रुवाणः स्वयं पोतं भ्रमयाचकोरेति सर्वेषां सामन्तानां सर्वानपि तुरङ्गमान् स नृपतिराक्रम्य जग्राह । इति वाहडकुमारप्रबन्धः ॥

६ तदनु चौलुक्यराजेन कृतज्ञचक्रवर्तिना आलिङ्गकुलालाय सप्तशतीग्राममिता विचित्रचित्रकूटपट्टिका ददे । ते तु निजान्वयेन लज्जमानाः अद्यापि सगरा इत्युच्यन्ते । यैः छिन्नकण्टकान्तरे प्रक्षिप्य क्षितिपो रक्षितस्तेऽङ्गरक्षपदं प्रतिष्ठिता ।

७ अथ सोलाकनामा गन्धर्वोऽवसरे गीतकलया परितोषिताद्राज्ञः षोडशाधिकं द्रम्माणां शतं प्राप्य तेन सुखभक्षिकां विसाध्य बालकांस्तर्पयन् राज्ञा कुपितेन निर्वासितः । ततो विदेशं गतस्तत्रत्यभूपतेर्गीतकलया रञ्जितात्प्रसादप्राप्तं गजयुगलमानीयोपायनीकुर्वन् चौलुक्यभूपालेन सम्मानितः । कदाचित्कोऽपि वैदेशिकगन्धर्वो मुषितोऽस्मि मुषितोऽस्मीति तारं बुम्बारवं कुर्वाणः, केन मुषितोऽसीति राज्ञाभिहितो मम गीतकलया समीपागतेन, मया कौतुकाद्गलन्यस्तकनकशृङ्खलेन मृगेण त्रस्यता मृगेन्द्रेणेति विज्ञपयामास । स तदनु भूपतिना समादिष्टः सोलाभिधानो गन्धर्वराडटवीमटन् स्फीतगीताकृष्टिविद्यया कनकशृङ्खलाङ्कितगलं मृगं नगरान्तः समानीय तस्य भूपतेर्दर्शयामास । अथ तत्कलाकौशलचमत्कृतमानस. प्रभु. श्रीहे

१ चाहड L २ सागरा A b L ३ तस्य चौलुक्यराज. पट्टाभिषेकानन्तरं स सोलाकनामा M c ४ सकरेणुमारुह्य [illegible] c ५ सामीप्यमुपेयुषा कौतुकार्पितगल शृङ्खलेन b L ६ ऽयस्यता इति विज्ञ-[illegible] a M ७ गले खेलत्कनकशृङ्खलं D

माचार्यो गीतकलाया अवधिं पप्रच्छ। स शुष्कदारुणः पल्लवप्ररोहमवधिं विज्ञप्तवान्। तर्हि तत्कौतुकं दर्शयेत्यादिष्टः अर्बुदाद्रिरेर्विरहकनामानं वृक्षमाक्षेपादानाय्य तच्छुष्कशाखायाः कोद्धं राजाङ्गणे कुमारमृत्तिकया यल्लसालवाले निवेश्य निजया नवगीतकलया सद्यः प्रोल्लसत्पल्लवं तं निवेदयन् सनृपतीन् भट्टारकश्रीहेमचन्द्रसूरीन् परितोषयामास। इति अन्छईकारसोलाकप्रबन्धः॥

८ अथ कदाचित्सर्वावसरे स्थितचौलुक्यचक्रवर्ती कुङ्कुणदेशीयमल्लिकार्जुनाभिधानस्य राज्ञो मागधेन राजपितामह इति विरुदमभिधीयमानमाकर्ण्य तदसहिष्णुतया सभां निभालयन्नृपचित्तविदा मन्त्रिणाऽम्बडेन योजितकरसम्पुटं दर्शयता चमत्कृत, सभाविसर्जनानन्तरमञ्जलिबन्धस्य कारणं पृच्छन्नेवमूचे। यदस्यां सभायां स कोऽपि सुभटो विद्यते यं प्रस्थाप्य मिथ्याभिमानिनं चतुरङ्गनृपवन्नृपाभासं मल्लिकार्जुनं विनाशयाम इत्याशयविदा मया त्वदादेशक्षमेण चाञ्जलिबन्धश्चक्रे इति विज्ञप्तिसमनन्तरमेव त नृपं प्रति प्रयाणाय दलनायैकीकृत्य पञ्चाङ्गप्रसादं दत्त्वा समस्तसामन्तैः सम विससर्ज। स चानवच्छिन्नैः प्रयाणैः कुङ्कुणदेशमधिगम्य दुर्वारवारिपूरां कलविणिनाम्नीं सरितमुत्तरन् परस्मिन्कूले आवासेषु दीयमानेषु तं संग्रामसज्जं विमृश्य स मल्लिकार्जुननृपतिः प्रहरंस्तत्सैन्यं त्रासयामास। अथ तेन पराजितः स सेनापतिः कृष्णवदनः कृष्णवसनः कृष्णच्छत्रालङ्कृतमौलिः कृष्णगुरूदरे निवसन्, चौलुक्यभूभुजा विलोक्य कस्यासौ सेनानिवेश इत्यादिष्टे कुङ्कुणात्प्रत्यावृत्तस्य पराजिताम्बडसेनापतेः सेनानिवेशोऽयमिति विज्ञप्ते तस्य त्रपया चमत्कृतचित्त प्रसत्त्यों दृशा संभावयंस्तदपरैर्बलवद्भिः सामन्तैः समं मल्लिकार्जुनं जेतुं

१ शाखाखण्ड d C २ छइ C ३ दलमेकीकृत्य P ४ प्रसादललितया C

पुनः प्रहित.। स तु कुड्कुणदेशं प्राप्य तां नदीमासाद्य पद्याबन्धे विरचिते तेनैव पथा सैन्यमुत्तार्य सावधानवृत्त्याऽसमसमरारम्भे हस्तिस्कन्धाधिरूढं वीरवृत्त्या मल्लिकार्जुनमेव निश्चलीकुर्वन् स आम्बड सुभटो दन्तमुशलसोपानेन कुम्भिकुम्भस्थलमधिरुह्य माद्यद्दुद्दामरणरसः प्रथमं प्रहर, इष्टदैवतं स्मरेत्युच्चरन् 'करालकरालकरवालप्रहारान्मल्लिकार्जुनं पृथ्वीतले पातयन् सामन्तेषु तन्नगरलुण्टनव्यापृतेषु केसरिकिशोर करिणमिव लीलयैव जघान। तन्मस्तकं स्वर्णेन वेष्टयित्वा तस्मिन्देशे चौलुक्यचक्रवर्तिन आज्ञां दापयन् श्रीमदणहिल्लपुरं प्राप्य समानिषण्णेषु द्वासप्ततिसामन्तेषु स्वामिनः श्रीकुमारपालनृपतेश्चरणौ कुड्कुणदेशीयनृपमल्लिकार्जुनशिरसा समं ववन्दे।

शृङ्गारकोडीसाडी, माणिकउ पछेडउं, पापखउ हारु, संयोगसिद्धिसिप्रा, तथा हेमकुम्भा ३२, तथा मौक्तिकानां सेडउं ६, चतुर्दन्तहस्ति १, पात्राणि १२०, कोडीसार्ध १४ द्रव्यस्य दण्डः*

श्रीआम्बडेनैतैर्वस्तुभिः सह तच्छिर कमलेन पुपूजे राजा। तदवदातप्रीतेन राज्ञा श्रीमुखेन श्रीमदाम्बडाभिधानमहामण्डलेश्वरस्य राजपितामह इति बिरुदं ददे। इति आम्बडप्रबन्धः।

९ अथ कदाचिदणहिलपुरे श्रीहेमचन्द्रसूरयो दत्तव्रतायाः पाहिणीनाम्न्याः स्वमातुः परलोकावसरे कोटिनमस्कारपुण्यं दत्ते व्यापद्येरनु

१ पद्यानुक्रमे A २ पछेवडो M h ३ तडा A ४ मुडा C M ५ कोटि c D

* जिनमण्डनगणिना कुमारपालप्रबन्धे दण्डस्यास्येत्थं वर्णनं कृत–(पृ ३९)

शाटीं शृंगारकोट्याख्यां पट्टं माणिक्यनामकं।
पापक्षयकरं हारं मुक्ताशुक्तिं विषापहाम्॥
हैमान्द्वात्रिंशतं कुम्भान्मनुभारान्प्रमाणत।
षट्मूटकास्तु मुक्तानां स्वर्णकोटीश्चतुर्दश॥
विंशं शतं च पात्राणां चतुर्दन्तं च दन्तिनं।
श्वेतं सेडुकनामानं दत्त्वा नव्यं नवग्रहम्॥

६ प्रेतायां c ७ नवकार M

तत्संस्कारमहोत्सवे क्रियमाणे त्रिपुरुषधर्मस्थानसन्निधौ तत्तपस्विभि सह-जमात्सर्याद्विमानभङ्गापमाने सूत्रिते तदुत्तरक्रिया निर्माय तेनैव मन्युना मालवकसंस्थितस्य कुमारपालनृपते स्कन्धावारमलञ्चक्रु ।

३) आपण पइ प्रभु होईअ कइ प्रभु कीजइं हाथि ।
कज्ज करिवों माणुसह वीजउ मागु न अत्थि ॥

इति वचन तथ्यं विमृशन्तं श्रीमदुदयनमन्त्रिणा नृपतेर्निवेदितागमना कृतज्ञमौलिमणितया परोपरोधात्सौधमानीता । तद्राज्यमाप्तिनिमित्तज्ञान स्मारयन्नृप भवद्भि सदैव देवसार्चनावसरेऽभ्युपेतव्यमित्युपरोधयन्,—

४) भुञ्जीमहि वय भैक्ष्यं जीर्णं वासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरै ॥

इति सूरिभिरभिहिते नृप —

५) एक मित्र भूपतिर्वा यतिर्वा
एका भार्या सुन्दरी वा दरी वा ।
एक शास्त्र वेदमध्यात्मक वा
एको देव केशवो वा जिनो वा ॥

इति महाकविप्रणीततत्त्वात्परलोकसमारचनाय भवद्भि सह मैत्र्यमभिलषामीति व्याहरन्, अथाप्रतिषिद्धमनुमतमिति तस्य महर्षे परी-

---

१ पइहोइय c D २ काजकरे वा मणुसह c ३ मागत आथि a ४ वचस्तार्थं c ५ विमृशत P ६ प्रभावकचरिते श्रीहेमचन्द्रसूरिप्रबन्धे पद्य (३२२) मिदम् भर्तृहरिशतके प्रकीर्णे (श्लो ४) पाठातर यथा —

अश्नीमहि वय भिक्षामाशावासो वसीमहि (अन्यत्समान)

७ भर्तृहरिशतके केशवो वा शिवो वा इति पाठान्तरेण वर्तते पद्यमिदम् (प्रकीर्णे) एक मित्रमिति प्रथममेव पद b M H c D पुस्तकेषु। द्वितीय पद a L पुस्तकयो एका भार्या वशजाता प्रिया वा इत्येवम् तृतीयपदे वेदस्थाने वैद्य K आदर्शे.

क्षितचित्तवृत्तिः श्रीमुखेन स नृपः स्खलनाकारिणां वेत्रिणां सर्वसमर्पकं ददौ ।

१० अथ तत्र गतायाते संजायमाने सूरेर्गुणग्रामस्तवं कुर्वत्युर्वीपतौ पुरोधा विरोधादामिग प्राह—

६) विश्वामित्रपराशरप्रभृतयो ये चाम्बुपत्राशिन-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
आहारं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहः कथमहो दम्भः समालोक्यताम् ॥

इति तद्वचनानन्तरं हेमचन्द्रः—

७)Tसिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण रतमेति किलैकवेलम् ।
पारावतः खरशिलाकणभोजनोऽपि
कामी भवत्यनुदिनं वद कोऽत्र हेतुः ॥

तन्मुखमुद्राकारिणि प्रत्युत्तरेऽभिहिते सति, नृपप्रत्यक्षं केनापि मत्सरिणैते सिताम्बराः सूर्यमपि न मन्यन्त इत्यभिहिते ।

८) अधाम धामधामैकं वयमेव हृदि स्थितम् ।
यस्यास्तव्यसने ज्ञाते त्यजामो भोजनं वयः ॥

इति प्रामाण्यनैपुण्याद्वयमेव सूर्यभक्ता नैते इति तन्मुखबाधे जाते । कदाचिद्देवतावसरक्षणे सौधमागते मोहान्धकारधिक्कारचन्द्रे श्रीहेमचन्द्रे यशश्चन्द्रगणिना रजोहरणेनासनपदं प्रमार्ज्य कम्बले तत्र निहिते, अज्ञात-

---

१ सर्वदायकं दूयकं H L २ भजन्ते c * पद्यमिद प्रभावकचरिते श्रीहेमचन्द्रसूरिप्रबन्धे वर्तते (१७६) T ... ... (१७९) भर्तृहरिशतके प्रकीर्णे (श्लो. ४१) ३ आधाम L C ४ धामधामेदं H L ५ स्फट H ६ तत्वत इति तेन्मुखबन्धे H L

तत्त्वतया किमेतदिति नृपेण पृष्ट प्राह । कदाचिदिह कोऽपि जन्तुर्भवति तदाबाधापरिहारायाऽसौ प्रयत्नः । यदा प्रत्यक्षतया जन्तुर्निरीक्ष्यते तदैवेदं युज्यते नापरथा वृथाप्रयासहेतुत्वादिति युक्तियुक्तां नृपोक्तिमाकर्ण्य तैः सूरिभिरभिदधे । गजतुरगाद्या चमूः किं प्रतिनृपतिरिपावुपस्थिते क्रियते उत पूर्वमेव, यथाय राजन्यवहारस्तथा धर्मव्यवहारोऽपीति तद्गुणरञ्जितहृदा पूर्वप्रतिपन्ने राज्ये दीयमाने सर्वशास्त्रविरोधहेतुत्वात् यदाह—

९) राजप्रतिग्रहदग्धानां ब्राह्मणानां युधिष्ठिर ।
दग्धानामिव बीजानां पुनर्जन्म न विद्यते ॥

इदं पुराणोक्तं । तथा च जैनागमः—

१०) सत्ति ही गिहिमत्ते य रायपिण्डे किमिच्छए ।

इति तत्सबोधाचमत्कृतचित्त श्रीपत्तनं प्राप ॥

११ भूपोऽन्यदा मुनिं पप्रच्छ कयापि युक्त्याऽस्माकमपि यश प्रसर कल्पान्तस्थायी भवतीति तदीयां गिरं श्रुत्वा विक्रमार्क इव विश्वस्यानृण्यकरणात्, यद्वा सोमेश्वरस्य काष्ठमयं प्रासादं वारिधिशीकरनिकरैरासन्नाम्भं शीर्णप्रायं युगान्तस्थायिकीर्तये समुद्धरेति चन्द्रातपनिभया श्रीहेमचन्द्रगिरोल्लसन्मुदम्भोधिर्नृपस्तमेव महर्षिं पितरं गुरुं दैवतं मन्यमानो विजानाति । निरन्तरं द्विजाननिन्दंस्ततः प्रासादोद्धाराय तदैव दैवज्ञनिवेदितसुलग्नस्तत्र पञ्चकुलं प्रस्थाप्य प्रासादप्रारम्भमचीकरत् ।

१२ अन्यदा श्रीहेमचन्द्रस्य लोकोत्तरैर्गुणैः परिहृतहृदयो नृपो मन्त्रिश्रीउदयनमिति पप्रच्छ । एतादृशं पुरुषरत्नं समस्तवंशावतंसं देशे च समस्तगुणाकरे नगरे च कस्मिन्समुत्पन्नमिति नृपादेशादनु स मन्त्री

---

१ सत्तिगिहिमित्तेय A b L २ इदं दशवैकालिकसूत्रस्थ वचनम् ३ अन्त C H
३ समस्तवंशावतंसे वंशे देशे च समस्तपुण्यप्रवेशे निःशेषगुणाकरे नगरे च B K

जन्मप्रभृति तच्चरित्र पवित्रमित्थमाह । अर्धाष्टमनामनि देशे धुन्धुक नगरे श्रीमन्मोढवशे चाचिगनामा व्यवहारी, सतीजनमतल्लिका जिनशासनदेवीव तत्सधर्मचारिणी शरीरिणीव श्री पाहिणीनाम्नी चामुण्डागोत्रजयो राद्याक्षरेणाङ्कितनामा, तयो पुत्रश्चाङ्गदेवोऽभूत् । स चाष्टवर्षदेश्य श्रीदेवचन्द्राचार्येषु श्रीपत्तनाचीर्थयात्राप्रस्थितेषु धुन्धुके श्रीमोढवसहिकाया देवनमस्करणाय प्राप्तेषु सिंहासनस्थिततदीयनिषद्याया उपरि सवयोभि सम रममाण शिशुभि सहसा निषसाद । तदङ्गप्रत्यङ्गाना जगद्विलक्षणानि लक्षणानि प्रेक्ष्य, अय यदि क्षत्रियकुले जातस्तदा सार्वभौम चक्रवर्ती, यदि वणिग्विप्रकुले जातस्तदा महामात्यश्चेद्दर्शन प्रतिपद्यते तदा युगप्रधान इव कलिकालेऽपि कृतयुगमवतारयति स आचार्य इति विचार्य तन्नगरव्यवहारिभि सम तल्लिप्सया चाचिगौक प्राप्य तस्मिश्चाचिगे ग्रामान्तरभाजि तत्पत्न्या विवेकिन्या स्वागतादिभि परितोषिता श्रीमन्तस्त्वत्पुत्र याचितुमिहागता इति व्याहरन्तोऽथ सा हर्षाश्रूणि मुञ्चती स्व रत्नगर्भं मन्यमाना श्रीसघस्तीर्थकृता मान्य स मत्सूनु याचते इति हर्षास्पदेऽपि विषाद , एतस्य पिता नितान्तमिथ्यादृष्टि. । अपर तादृशोऽपि सम्प्रति ग्रामे नास्ति । अथ तैर्व्यवहारिभिस्त्वया दीयतामित्युक्ते स्वदोषोत्तारणाय मात्रा दाक्षिण्यादमात्रगुणपात्र पुत्रस्तेभ्यो गुरुभ्यो ददे । तदनन्तर तया श्रीदेवचन्द्रसूरिरिति तदीयमभिधानमबोधि । तैर्गुरुभि स शिशु शिष्यो भविष्यसीति पृष्ट , ओमित्युच्चरन् प्रतिनिवृत्तैस्तै सम कर्णावत्यामाजगाम । उदयनमन्त्रिगृहे तत्सुतै सम बालधारकै पाल्यमानो यावदास्ते तावता ग्रामान्तरादागतश्चाचिगस्त वृत्तान्त परिज्ञाय पुत्रदर्शनावधिसन्यस्तसमस्ताहारस्तेषा गुरूणा नाम मत्वा कर्णावती प्राप । तद्वसतौ समागत्य कुपित पितेपत्ताम्प्रणनाम । गुरुभि सुतानुसारेणोपलक्ष्य विचक्षणतया विविधाभिरावर्जनाभिराव-

१ चामुण्डानामगोत्रजाया K M २ श्रीसघ. C D K ३ आगत K

र्जित, तत्रानीतेनोदयनमन्त्रिणा धर्मबन्धुबुद्ध्या निजमन्दिरे नीत्वा ज्याय सहोदरभक्त्या भोजयाचक्रे । तदनु चाङ्गदेवसुतं तदुत्सङ्गे निवेश्य पञ्चाङ्गप्रसादसहित दुकूलत्रय प्रत्यक्ष लक्षत्रयं चोपनीय सभक्तिकमावर्जित । त प्रति चाचिग प्राह । क्षत्रियस्य मूल्ये अशीत्यधिकसहस्रं, तुरगस्य मूल्ये पञ्चाशदधिकानि सप्तदशशतानि अकिंचित्करस्यापि वणिजो मूल्ये नवनवतिर्लक्षा. एतावता नवनवतिलक्षा । त्व तु लक्षत्रय समर्पयन्नौदार्यच्छद्मना कार्पण्य प्रादु कुरुषे । मत्सुतस्तावदनर्घ्यो भवदीया च भक्तिरनर्घ्यतमा तस्य मूल्ये सा भक्तिरस्तु शिवनिर्माल्यमिवास्पृश्यो मे द्रव्यसचय । इत्थ चाचिगे सुतस्य स्वरूपमभिदधाने प्रमोदपूरितचित्त स मन्त्री अकुण्ठोत्कण्ठतया त परिरभ्य साधु साध्विति वदन् श्रीमानुदयन प्राह । मम पुत्रतया समर्पितो योगिमर्कट इव सर्वेषा जनाना नमस्कार कुर्वन् केवलमपमानपात्र भविता, गुरूणा दत्तस्तु गुरुपद प्राप्य बालेन्दुरिव त्रिभुवननमस्करणीयो जायतेऽस्तो यथोचित विचार्य व्याहरेत्यादिष्ट स भवद्विचार एव प्रमाणमिति वदन् गुरुपार्श्वे नीत सुत गुरुभ्योऽदीदपत् । तदनु सुतस्य प्रव्रज्याकरणोत्सवश्चाचिगेन चक्रे । अथ कुम्भयोनिरिवाप्रतिमप्रतिभाभिरामतया समस्तवाङ्मयाम्भोधिमुद्धियोऽभ्यस्तसमस्तविद्यास्थानो हेमचन्द्र इति गुरुदत्तनामा प्रतीत । सकलसिद्धान्तोपनिषन्निषण्णधी षट्त्रिंशता सूरिगुणैरलङ्कृततनुर्गुरुभि सूरिपदेऽभिषिक्त । इति मन्त्रिणोदयनेनोदिता हेमाचार्यजन्मप्रवृत्तिमाकर्ण्य नृपो मुमुदेतरा ।

१३ अथ श्रीसोमनाथदेवस्य प्रासादारम्भे खराशिलानिवेशे सजाते सति पञ्चकुलप्रहितवर्धापनिकाविज्ञप्तिका नृप श्रीहेमचन्द्रस्य गुरोर्दर्शयन्, अय प्रासादप्रारम्भ कथ निष्प्रत्यूह प्रमाणभूमिमाधिरोढेति पृथ्वी-

१ शिखरशिलानिवेश P

परिवृढेनानुयुक्तः श्रीमान्किञ्चिदुचितं विचिन्त्य गुरुरूचिवान् । यदस्य धर्मकार्यस्यान्तरायपरिहाराय ध्वजारोपं यावदजिह्मब्रह्मसेवा, अथवा मद्यमांसनिवृत्तिर्वा द्वयोरेकतरं किमप्यङ्गीकरोतु नृप इत्यभिहिते तद्वचनमाकर्ण्य मद्यमांसनियममभिलषन्, श्रीनीलकण्ठोपरि विमुच्योदकं तं चाभिग्रहं जग्राह । संवत्सरद्वयेन तस्मिन्प्रासादे कलशध्वजाधिरोपं यावन्निवृत्ते तं नियमं मुमुक्षुर्गुरूननुज्ञापयंस्तैरूचे । यद्यनेन निजकीर्तनेन सार्धमर्धचन्द्रचूडं प्रेक्षितुमर्हसि, तद्यात्रापर्यन्ते नियममोचनावसर इत्यभिधायोत्थिते श्रीहेमचन्द्रमुनीन्द्रे षट्त्रिंशद्गुणैरुन्मीलल्लीलीरागरक्तहृदयस्तमेकमेव संसदि प्रशशंस स. । निर्निमित्तवैरीपरिजनस्तत्तेजःपुञ्जमसहिष्णुः—

११) उज्ज्वलगुणमभ्युदितं क्षुद्रो द्रष्टुं न कथमपि क्षमते ।
दग्ध्वा तनुमपि शलभो दीप्तं दीपार्चिषं हरति ॥

इति न्यायाद्दृष्टिमांसादनदोषमभ्यङ्गीकृत्य तदपवादानवादीत् । यदयममन्दच्छन्दानुवृत्तिपरः सेवाधर्मकुशल केवलं प्रभोरभिमतमेव भाषते यद्येवं न तदा प्रातरुपेत. श्रीसोमेश्वरयात्रार्थमत्यर्थमभ्यर्थ्यताम् । राज्ञा तथाकृते सूरयः प्रोचुः । यद्बुभुक्षितस्य किं निमन्त्रणाग्रह, उत्कण्ठितस्य किं केकारवश्रावणमिति लोकरूढेस्तपस्विनामधिकृततीर्थाधिकाराणां को नाम नृपतेरत्र निर्बन्धः । इत्थं गुरोरङ्गीकारे किं भवद्योग्यं सुखासनप्रभृति वाहनादि च लभ्यतामितीरिते वयं चरणचारेणैव सञ्चरन्तः पुण्यमुपालभामहे परं वयमिदानीमापृच्छ्य मितैर्मितं प्रयाणकैः श्रीशत्रुंजयोज्जयन्तादिमहातीर्थानि नमस्कृत्य भवतां श्रीपत्तनप्रवेशे मिलिष्याम इत्युदीर्य तत्तथैव कृतवन्त. ।

१ सुभाषितार्णवेऽपि दृश्यते पद्यमिदं २ श्रीसोमेश्वरयात्रायां भवान्महागच्छतु इति गदित स परतीर्थपरिहारात तत्रागमिष्यतीति अस्मन्मतमेवं प्रमाणं नृपस्तद्वाक्यमाकर्ण्य प्रातरागतं श्रीहेमचन्द्राचार्यं II M

१४ नृपते समग्रसामग्र्या कतिपयै प्रयाणकै श्रीपत्तन प्राप्तस्य श्रीहेमचन्द्रमुनीन्द्रमिलनादतिप्रमुदितस्य सन्मुखागतेन गण्ड० श्रीबृहस्पतिनानुगम्यमानस्य महोत्सवेन पुर प्रविश्य श्रीसोमेश्वरप्रासादसोपानेष्वाक्रान्तेषु भूपीठलुण्ठनादरादनन्तर चिरतरातुल्यायल्लकानुमानेन गाढमुपगूढसोमेश्वरलिङ्गस्य, एते जिनादपर न नमस्कुर्वन्तीति मिथ्याहग्वचसा भ्रान्तचित्तस्य श्रीहेमचन्द्र प्रति एव विधा गीराविरासीत् । यदि युज्यते तदेतैरुपहारैर्मनोहारिभि श्रीसोमेश्वरमर्चयन्तु भवन्त । तत्तथेति प्रतिपद्य क्षितिपकोशादागतेन कमनीयेनोद्गमनीयेनालङ्कृततनुर्नृपतिनिर्देशाच्छ्रीबृहस्पतिना दत्तहस्तावलम्ब प्रासाददेहलीमधिरुह्य किञ्चिद्विचिन्त्य प्रकाश । अस्मिन्प्रासादे कैलासनिवासी महादेव साक्षादस्तीति रोमाञ्चकञ्चुकिता तनु बिभ्राणो द्विगुणीक्रियतामुपहार इत्यादिश्य शिवपुराणोक्तदीक्षाविधिनाह्वाननावगुण्ठनमुद्रामन्त्रन्यासविसर्जनोपचारादिभि पञ्चोपचारविधिभि शिवमभ्यर्च्य तदन्ते—

११) *यत्र तत्र समये यथा तथा
योऽसि सोऽस्यभिधया यया तया ।
वीतदोषकलुष स चेद्भवा—
नेक एव भगवन्नमोऽस्तु ते ॥ १ ॥

१२) भवबीजाङ्कुरजनना रागाद्या क्षयमुपागता यस्य ।
ब्रह्मा वा विष्णुर्वा महेश्वरो वा नमस्तस्मै ॥ २ ॥

इत्यादिस्तुतिभि सकलराजलोकान्विते राज्ञि सविस्मयमवलोकमाने दण्डप्रणामपूर्व स्तुत्वा श्रीहेमाचार्य उपरते सति, स नृप श्रीबृहस्पतिना ज्ञापितपूजाविधि समधिकवासनया शिवार्चानन्तर धर्मशिलाया तुला

१ मुपगूढे सोमेश्वरलिङ्गे H मुपगूढसोमेश्वरलिङ्ग B L २ तदैतै P
* प्रभावकचरिते श्रीहेमचन्द्रसूरिप्रबन्धे (३४७) पद्यमिदम्

पुरुषगजदानादीनि महादानानि दत्वा कर्पूरारात्रिकमुत्तार्य समग्रं राजवर्गमपसार्य तद्गर्भगृहान्त प्रविश्य न महादेवसमो देव', न मम तुल्यो नृपतिः, न भवत्सदृशो महर्षिरिति भाग्यवैभववशादत्रं सिद्धे त्रिकसंयोगे बहुदर्शनप्रमाणप्रतिष्ठासदिग्धे देवतत्त्वे मुक्तिप्रदं दैवतमस्मिंस्तीर्थे तथ्यगिरा'ः निवेदयेत्यभिहित श्रीहेमाचार्य किञ्चिद्धिया निध्याय नृप प्राह । अलं पुराणदर्शनोक्तिभि श्रीसोमेश्वरमेव तव प्रत्यक्षीकरोमि, यथा तन्मुखेन मुक्तिमार्गमवैषीति तद्वाक्याकर्णनमेतदपि जाघटीतीति विस्मयापन्नमानसे नृपे निश्चितमत्र तिरोहितमस्त्येव दैवतमावा गूरूक्तयुक्त्या निश्चलावाराधकौ तदित्थं द्वन्द्वसिद्धौ सुकर दैवतप्रादुःकरणं, मया प्रणिधानं क्रियते, भवता कृष्णागुरूत्क्षेपश्च कार्यस्तदा स परिहार्यो यदा त्र्यक्षः प्रत्यक्षीभूय निषेधयति । अथोभाभ्यामपि तथा क्रियमाणे धूपधूमान्धकारिते गर्भगृहे निर्वाणेषु नक्षत्रमालादीपकेषु आकस्मिके प्रकाशे द्वादशारममहसीव प्रसरति, नृपो नयने सम्भ्रमादुन्मृज्य यावदालोकते तावज्जलाधारोपरि जात्यजाम्बूनदद्युतिं चर्मचक्षुषा दुरालोकमप्रतिमरूपमसम्भाव्यस्वरूप तपस्विनमद्राक्षीत् । त पदाङ्गुष्ठात्प्रभृति जटावधि करतलेन सस्पृश्य निश्चितदेवतावतार पचाङ्गचुम्बितावनितलं प्रणिपत्य भक्त्या भूमानिति विज्ञपयामास । जगदीश भवद्दर्शनात्कृतार्थे दृशौ आदेशप्रसादात्कृतार्थय श्रवणयुगलमिति विज्ञप्य तूष्णीं स्थिते मोहनिशादिनमुखाचन्मुखादिति दिव्या गीराविरासीत् । राजन्नयं महर्षि सर्वदेवतावतार । अजिह्मपरब्रह्मावलोक' करतलकलितमुक्ताफलवत्कालत्रयविज्ञातस्वरूप । एतदुपदिष्टएवासदिग्धो मुक्तिमार्ग इत्यादिश्य तिरोभूते भूतपतावुन्मनीभाव भ्जंति भूपतौ, रेचितप्राणायामपवन श्लथीकृतासनबन्ध श्रीहेमचन्द्रो यावद्राजन्निति वाचमुवाच । तावदिष्टदैवतसङ्केतात्त्यक्तराज्याभिमानो जीव पादाववधार्यता-

१ भ्रयत्नसिद्धे a H L २ मेतदिति a P L ३ भजन् भूपति H a L ४ याजन्मिति a P ५ जीवर आदावधार्यतामिति P

मिति व्याहृतिपरो विनयनम्रमौलिर्यत्कृत्यमादिशेति व्याजहार । अथ तत्रैव नृपतेर्यावज्जीव पिशितप्रसन्नानियम दत्वा तत प्रत्यावृत्तौ गुरुक्ष्मापती श्रीमदणहिल्लपुर प्राप्तु ।

१८ श्रीजिनवदननिर्गमपावनीभि शुद्धसिद्धान्तगीर्भि प्रतिबुद्धो नृप परमार्हतबिरुद भेजे । तदभ्यर्थित प्रभु त्रिषष्टिशलाकापुरुषचरित विंशतिवीतरागस्तुतिभिरुपेत पवित्र योगशास्त्र च रचयाचकार । प्रभोरादेशाच्चाज्ञाकारिष्वष्टादशदेशेषु चतुर्दशवत्सरप्रमिता सर्वभूतेषु मारि निवारितवान् । तेषु तेषु च देशेषु चत्वारिंशदधिकानि चतुर्दशशतानि विहाराणा कारयामास । सम्यक्त्वमूलानि द्वादशव्रतान्यङ्गीकुर्वन्नदत्तादानपरिहाररूपे तृतीयव्रते व्याख्यायमाने रुदतीवित्तदोषान् पापैकनिबन्धनान् ज्ञापितो नृपस्तदधिकृत पञ्चकुलमाकार्य द्वासप्ततिलक्षप्रमाण तदीयपट्टक विपाट्य मुमोच । तस्मिन्मुक्ते—

१३) *न यन्मुक्त पूर्वै रघुनहुषनाभागभरत-
प्रभृत्युर्वीनाथै कृतयुगकृतोत्पत्तिभिरपि ।
विमुञ्चन्कारुण्यात्तदपि रुदतीवित्तमधुना
कुमारक्ष्मापाल त्वमसि महता मस्तकमणि ॥

इति विद्वद्भि स्तूयमाने—

१४) अपुत्राणा धन गृह्णन् पुत्रो भवति पार्थिव ।
त्व तु सतोषतो मुञ्चन्सत्य राजपितामह ॥

इति प्रभुरपि नृपतिमनुमोदयाचक्रे ॥

१६ अथ सुराष्ट्रदेशीय सुवरनामान विग्रहीतु श्रीमदुदयनमन्त्रिण दलनायकीकृत्य समस्तकटकबन्धेन सम प्रस्थापयामास । सोऽपि श्रीवर्धमानपुर प्राप्य श्रीयुगादिदेवपादान्निनसु पुर प्रयाणकाय समस्तमण्डलेश्वरानभ्यर्थ्य स्वय विमलगिरिमागल विशुद्धश्रद्धया श्रीदेवपादाना

---

१ व्याहृतिपरे गुरौ P * प्रभावकचरिते श्रीहेमचन्द्रसूरिप्रबन्धे पद्य (६९७) मिदम् । २ सउवर A C D M ३ मभ्यर्च्य P ४ शत्रुंजय

पूजादि विधाय यावत्पुरतो विधिवच्चैत्यवन्दनां विधत्ते तावन्नक्षत्रमालया दीपवर्तिं देदीप्यमानामादाय मूषकः काष्ठमयप्रासादविले प्रविशन्देवाङ्गरक्षैस्त्याजितस्तदनु स मन्त्री समाधिभङ्गात्काष्ठमयदेवप्रासादविध्वंसभयाज्जीर्णोद्धारं चिकीर्षुः श्रीदेवपादानां पुरत एकभक्तादीनभिग्रहान् जग्राह । तदनु कृतप्रयाणः स्कन्धावारमुपेत्य तेन प्रत्यर्थिना समं समरे जायमाने परे पराजिते नृपबले श्रीमदुदयनः समुत्तस्थौ । तदा तत्प्रहारजर्जरितदेह आवासं नीतः सकरुणं क्रन्दन् स्वजनैस्तत्कारणं पृष्टः सन्निहिते मृत्यौ श्रीशत्रुंजयशकुनिकाविहारयोर्जीर्णोद्धारवाञ्छया देवऋणं पृष्ठिलग्नं मन्त्री प्राह । अथ तैर्भवत्तनदनौ वाग्भटाम्रभटनामानौ गृहीताभिग्रहौ तीर्थद्वयमुद्धरिष्यत इत्यर्थे वयं प्रतिभुवः इति तदङ्गीकारात्पुलकिताङ्गः धन्यंमन्यः अन्त्याराधनकृते स मन्त्री कमपि चारित्रिणमन्वेषयामास । तस्मिन्ननुपलभ्यमाने कमपि वण्ठं तद्वेषमानीय निवेदिते मन्त्री तदङ्घ्री ललाटे परिस्पृशन् तत्समक्षं दशधाराधनां विधाय श्रीमानुदयनः परलोकं प्राप । वण्ठस्तु चन्दनतरोरिव तद्वासनापरिमलेन क्षुद्रद्रुमवद्वासितोऽनशनप्रतिपत्तिपूर्वकं रैवतके जीवितान्तं चकार ।

१७ अथाणहिल्लपुरं प्राप्तैस्तै स्वजनैस्तं वृत्तान्तं ज्ञापितौ वाग्भटाम्रभटौ तानेवाभिग्रहान्गृहीत्वा जीर्णोद्धारमारेभाते । वर्षद्वयेन श्रीशत्रुंजये प्रासादे निष्पन्ने उपेत्यागतमानुषेण वर्धापनिकायां वाच्यमानायां पुनरागतेन द्वितीयपुरुषेण प्रासादः स्फुटित इत्यूचे । ततस्तत्त्रपुप्रायां गिरं निशम्य श्रीकुमारपालभूपालमापृच्छ्यमहं० कपर्दिनि श्रीकिरणमुद्रां नियोज्य तुरङ्गमाणां चतुर्भिः सहस्रैः सह श्रीशत्रुंजयोपत्यकां प्राप्य स्वनाम्ना वाग्भटपुरनगरं निवेशयामास । सभ्रमप्रासादे पवनः

१ नीते P २ स्पर्दिने C ३ बाहड La

प्रविष्टो न निर्यातीति स्फुटनहेतुं शिल्पिभिर्निर्णीयोक्ते, भ्रमहीने च प्रासादे निरन्वयतां विमृश्याऽन्वयाभावे धर्मसंतानमेवास्तु पूर्वोद्धारकारिणां श्रीभरतादीना पङ्क्तौ नामास्तु, इति तेन मन्त्रिणा दीर्घदर्शिन्या बुद्ध्या विभाव्य भ्रमभित्त्योरन्तरालं शिलाभिर्निचितं विधाय वर्षत्रयेण निष्पन्ने प्रासादे कलशदण्डप्रतिष्ठायां श्रीपत्तनसंघं निमन्त्रणापूर्वमिहानीय महता महेन ²सं० १२११ वर्षे ध्वजारोपं मन्त्री कारयामास । स शैलमयबिम्बं ³मम्माणीयखनीसत्कपरिकरमानीय निवेशितवान् । श्रीवाग्भटपुरे नृपतिपितुर्नाम्ना त्रिभुवनपालविहारे श्रीपार्श्वनाथं स्थापितवान् । तीर्थपूजाकृते च चतुर्विंशत्यारामान्नगरे परितो वप्र देवलोकस्य ग्रासवासादि दत्वा चैतत्सर्वं कारयामास । अस्य तीर्थोद्धारस्य व्यये—

१५) षष्टिलक्षयुता कोटी व्ययिता यत्र मन्दिरे ।
स श्रीवाग्भटदेवोऽत्र वर्ण्यते विबुधैः कथम् ॥

इति श्रीशत्रुंजयोद्धारप्रबन्धः ॥

१८ अथ विश्वैकसुभटेन श्रीआम्रकभटेन पितुः श्रेयसे भृगुपुरे श्रीशकुनिकाविहारप्रासादप्रारम्भे खन्यमाने गर्तापूरे नर्मदासान्निध्यादकस्मान्मिलितायां भूमौ बाधितेषु कर्मकरेषु कृपापरवशतयात्मानमेवामन्दं निन्दन्सकलत्रपुत्रस्तत्र झम्पामदात् । तत्साहसातिशयाचस्मिन्नत्यूहे निराकृते । शिलान्यासपूर्वं समस्तप्रासादे निष्पन्ने कलशदण्डप्रतिष्ठावसरे नगरसंधान्निमन्त्रणपूर्वं तत्रानीय यथोचितमशनवस्त्राभरणादिसन्मानैः सन्मान्य सामन्तेषु यथागतं प्रहितेषु, आसन्ने लग्ने सजायमाने

---

१ निरवचता P २ सं० ११६५ A b ३ बिम्बस्य a P H L ४ श्री प्रासादि C H ५ सप्तषष्टि a ६ वर्षैरद्वार्कसंख्यै स्वजनकवचसा विक्रमार्कात्प्रयातैर्यातैनाः सिद्धशैले जिनपतिभुवन वाग्भटः प्रोद्दधार ॥ (इति चा. कु. च. स. ७) ७ छादितेषु C H L ८ प्रसंगोऽयं चारित्रसुंदर गणिकृतकुमारपालचरित्रे सप्तमसर्गे सविस्तरं वर्णितः ।

भट्टारकश्रीहेमचन्द्रसूरिपुरस्सरं स नृपतिं श्रीमदणहिल्लपुरसंघं तत्रानीयातुच्छवात्सल्यादिभिर्भूषणादिदानैः सन्तर्प्य ध्वजाधिरोपाय सञ्चरन्नर्थिभिः स्वयं स्वं मन्दिरं मुषितं कारयित्वा श्रीसुव्रतप्रासादे ध्वजं महाध्वजोपेतमध्यारोप्य हर्षोत्कर्षात्तत्रानालस्यं लास्यं विधाय तदन्ते भूपतिनाभ्यर्थित [1]आरात्रिकं गृह्णन् तुरङ्गं द्वारभट्टाय दत्वा राज्ञा स्वयं कृततिलकावसरे ह्रासवत्या सामन्तैश्चामरपुष्पवर्षादिभिः कृतसाहाय्यस्तदाभ्यागताय बन्दिने कृतकङ्कणवितरणो बाहुभ्यां धृत्वा बलात्कारेण नृपेणावतार्यमाणारात्रिकमङ्गलप्रदीपः श्रीसुव्रतस्य च गुरोश्चरणौ प्रणम्य साधर्मिकवन्दनापूर्वं नृपतिं सत्वरारात्रिकहेतुं पप्रच्छ। यथा द्यूतकारो द्यूतरसातिरेकाच्छिरःप्रभृतीन् पदार्थान् पणीकुरुते तथा भवानप्यतः परमर्थितस्त्यागरसातिरेकाच्छिरोऽपि तेभ्यो ददासीति नृपेणादिष्टे, भवत्तोत्तरचरित्रेणापहृतहृदया विस्मृताजन्मनुष्यस्तुतिनियमा. श्रीहेमाचार्या.–

१८) *किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलि. ।
कलौ चेद्भवतो जन्म कलिरस्तु कृतेन किम् ॥
इत्थमाम्रभटमनुमोद्य गुरुक्ष्मापती यथागतं जग्मतुः ॥

१९ अथ तत्रागताना प्रभूणां श्रीमदाम्रभटस्याकस्मिकदेवीदोषात्पर्यन्तदशामागतस्यापृच्छनविज्ञप्तिकायामुपागतायां सत्यां तत्कालमेव तस्य महात्मनः प्रासादशिखरे नृत्यतो मिथ्यादृशां देवीना दोषः संजात इत्यवधार्य प्रदोषकाले यशश्चन्द्रतपोधनेन समं खेचरगत्योत्पत्य निमेषमात्रादलङ्कृतभृगुपुरपरिसरभुवः प्रभव सैन्धवीमनुनेतुं कृतकायोत्सर्गास्तया जिह्वाकर्षणादवगणनास्पदं [3]दीयमानां [4]उदूखले

१ स त्वारात्रिक P २ अधिप्रसर्धितत्याग c * पद्यमिद प्रभावकचरिते श्रीहेमचन्द्रसूरिप्रबन्धे (७६१) ३ नीयमाना H ४ उदूखले c

शालितन्दुलान्प्रक्षिप्य यशश्चन्द्रगणिना मदीयमानेषु मुशलप्रहारेषु प्राक्प्रासादकम्पो, द्वितीये प्रहारे देवीमूर्तिरेव स्वस्थानादुपेत्य वज्रपाणिप्रहारेभ्यो रक्ष रक्षेत्युच्चरन्ती प्रभोश्चरणयोर्निपपात । इत्थमनवद्यविद्याबलाचन्मूलाना मिथ्यादृग्व्यन्तरीणा दोष निगृह्य श्रीसुव्रतप्रासादमाजग्मु ।

१७) ससारार्णवसेतव शिवपथप्रस्थानदीपाङ्कुरा
विश्वालम्बनयष्टय परमतव्यामोहकेतूद्गमाः ।
किं वास्माकमनोमतङ्गजदृढालानैकलीलाजुष-
स्त्रायन्ता नखरश्मयश्चरणयो श्रीसुव्रतस्वामिन ॥

इति स्तुतिभि श्रीमुनिसुव्रतमुपास्य श्रीमदाम्रभटमुल्लाघस्नानेन पट्टकृत्ये यथागतमागु । श्रीमदुदयनचैत्ये शकुनिकाविहारे घटीगृहे राज्ञ कौङ्कणनृपते कलशत्रय स्थानत्रये न्यास्थत् । * इति **श्रीराजपितामहाम्रभटप्रबन्धः** ॥

२० अथान्यस्मिन्नवसरे कुमारपालनामा नृप पाण्डित्यलिप्सया कपर्दिमन्त्रिणोऽनुमतेन भोजनानन्तर क्षण केनापि विदुषा वाच्यमाने कामन्दकीयनीतिशास्त्रे—

१७) पर्जन्य इव भूतानामाधार पृथिवीपति ।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥

वाक्यमिदमाकर्ण्य नृपतेमेघ औपम्या इति कुमारपालेनाभिहिते सर्वेष्वपि सामाजिकेषु न्युञ्छनानि कुर्वाणेषु तदा कपर्दिमन्त्रिणमवाङ्मुख वीक्ष्य, एकान्ते नृपपृष्ठ एवमवादीत् । औपम्याशब्दे स्वामिना स्वयमुच्चरिते सर्वव्याकरणेष्वेतत्प्रयोगापेतेषु छन्दोनुवर्तिभिर्न्युञ्छनानि क्रिय

१ उल्लाघ्य नीरोग कृत्वा c २ एव शकुनिकाविहारोद्धारे कोटिद्वय व्ययितम् a प्रबन्धोय जिनप्रभसूरिकृततीर्थकल्पे तथा च प्रभावरुचरिते श्रीहेमचन्द्रसूरिप्रबन्धेऽपि वर्तते ३ का नी सर्ग १ श्लो १२ हितोपदेशे शार्ङ्गधरपद्धत्या (१२८३) चापि दृश्यते ४ अपप्रयोग A c D

माणे मम द्वेधाऽप्याङ्मुखत्वमुचितं । तथा वरमराजकं विश्वं न तु मूर्खो राजेति प्रतीपभूपालमण्डलेष्वपकीर्तिः प्रसरति । अतोऽस्मिन्नर्थे उपमेयं औपम्यं उपमेत्याद्याः शब्दाः शुद्धाः । तद्वचनानन्तरं राज्ञा शब्दव्युत्पत्तिहेतवे पञ्चाशद्वर्षदेश्येन कस्याप्युपाध्यायस्य समीपे मातृकापाठात्प्रभृति शास्त्राण्यारभ्यैकेन वर्षेण वृत्तिकाव्यत्रयमधीतं विचारचतुर्मुखविरुदमर्जितम् ॥* इति विचारचतुर्मुखश्रीकुमारपालाध्ययनप्रबन्धः ।

२१ कस्मिन्नप्यवसरे विश्वेश्वरनामा कविर्वाराणस्याः श्रीपत्तनमुपागतः श्रीहेमसूरीणां संसदि प्राप्तः । तत्र कुमारपालनृपतौ विद्यमाने सः—

१८) *पातु वो हेमगोपाल कम्बलं दण्डमुद्वहन् ।
इति भणित्वा विलम्बमानो नृपेण सक्रोधं निरैक्ष्यत ।
षड्दर्शनपशुग्रामं चारयन् जैनगोचरे ॥

इत्युत्तरार्धपरितोषितसमाजलोकः श्रीरामचन्द्रादीनां समस्यां समर्पयामास ।

१९) व्यापिद्धा नयने मुखं च रुदती स्वे गर्हिते कन्यका
नैतस्याः प्रसृतिद्वयेन सरले शक्ये पिधातुं दृशौ ।
सर्वत्रापि च लक्ष्यते मुखशशिज्योत्स्नावितानैरियमित्थं मध्यगता सखीभिरभितो दृग्मीलनाकेलिषु ॥

व्यापिद्धा इति श्रीकपर्दिना महामात्येन पूरितायां समस्यायां पश्चात्कवि पञ्चाशत्सहस्रमूल्यं निजं ग्रैवेयकं श्रीकपर्दिनः कण्ठे श्रीभारत्याः पदमित्युच्चरन्निवेशयामास । अथ तद्वैदग्ध्यचमत्कृतेन नृपतिना स्वसन्निधौ स्थाप्यमानः ।

---

१ वृत्तिकाव्यानां Bh C ~ प्रबन्धोऽयं कुमारपालचरितेऽपि वर्तते
२ कथमिति चेज्जिनमण्डनसूरिकृतकुमारपालचरित्रे द्रष्टव्यम्

* पद्यमिदं प्रभावकचरिते श्रीहेमचंद्रसूरिप्रबन्धे (२०४)

३ निरीक्षित b ४ गोपुरे C ५ इदं चतुर्थं चरणं दृश्यते C D आदर्शयोः ।

२०) कथाशेषः कर्णोऽजनि जनकृशा काशिनगरी
सहर्षं हेपन्ते हरिहरिति हम्मीरहरय.।
सरस्वत्याश्लेषप्रवणलवणोदप्रणयिनि
प्रभासस्य क्षेत्रे मम हृदयमुत्कण्ठितमदः॥
इत्युक्त्वापृछ्यमानो नृपसत्कृत. स यथास्थानमगात्।

२२ कदाचिदेव श्रीकुमारपालविहारे नृपाहूताः प्रभवः श्रीकपर्दिना दत्तहस्तावलम्बा यावत्सोपानमारोहन्ति तावन्नर्तक्याः कञ्चुके गुणमाकृष्यमाणं विलोक्य श्रीकपर्दी—

२१) सोहग्गीउ सहि कञ्चुयउ जुत्त उत्ताणु करेइ।
एवमुक्त्वा यावद्विलम्बते।
पुट्ठिहिं पच्छइ तरुणीयणु जसु गुणगहणु करेइ॥
इति श्रीप्रभुपादैरुत्तरार्धमपूरि॥

२३ कदाचित्प्रत्यूषे कपर्दिमन्त्री प्रणामानन्तरं हस्ते, किमेतदिति पृष्टः स प्राकृतभाषया हरडइ इति विज्ञपयामास। प्रभुभिरुक्तं किमद्यापि? आहतप्रतिभतया, तद्वचनच्छलमाकलय्य कपर्दिनोक्ते, इदानीं न कुतोऽन्त्योऽप्याद्योऽभूत् मात्राधिकश्च। हर्षाश्रुपरिपूर्णदृशः प्रभवः श्रीरामचन्द्रप्रभृतिपण्डितानां पुरस्तात्तच्चातुरीं प्रशशंसु.। तैरज्ञाततत्त्वैः किमिति पृष्टो हरडइ इति शब्दच्छलेन हकारो रडइ। किमद्यापीत्यभिहितमात्रेण वचस्तत्त्वविदानेन नेदानीमुक्तं। यतः पुरा मातृकाशास्त्रे हकारः प्रान्ते पठ्यते अत एव ह रडइ साम्प्रतं त्वस्मन्नामनि प्रथमतया मात्राधिकश्च। इति हरडइ प्रबन्धः।

२४ कदाचित् केनापि पण्डितेनोर्वशीशब्दे शकारस्तालव्यो दन्त्यो वेति पृष्टे यावत्प्रभवःकिञ्चित्समादिशन्ति तावत्, उरूंन् अश्नुते

---

१ उरूशेते a b H L M

उर्वशीति पत्रकं लिखित्वा श्रीकपर्दिना प्रभोरुत्सङ्गे मुक्तं । तत्प्रामाण्या-त्तालव्यशकारनिर्णयस्तदग्रे प्रभुभिरभिहितः । इत्युर्वशीशब्दप्रबन्धः ।

२५ अथान्यदा सपादलक्षीयराज्ञः कश्चित्सान्धिविग्रहिकः श्रीकुमारपालनृपतेः सभायामुपेतो राज्ञा भवत्स्वामिनः कुशलमिति पृष्टः । स मिथ्याभिमानी पण्डितमानी च विश्वं लातीति विश्वलस्तस्य च को विजयसन्देहः । राज्ञा प्रेरितेन श्रीमता कपर्दिना मन्त्रिणा श्वलश्वल्ल आशुगतौ इति धातोर्विरिव श्वलति नश्यतीति विश्वलः । इत्येवं प्रधानेन तन्नामदूषणं विज्ञप्त इति स राजा विग्रहराज इति नाम बभार । अपरस्मिन्वर्षे स एव प्रधानपुरुषः श्रीकुमारपालनृपतेः पुरो विग्रहराजनाम विज्ञपयन् मन्त्रिणा श्रीकपर्दिना विग्रो विगतनासिक एवं हराजौ रुद्रनारायणौ कृतौ, इति व्याख्यातं । तदित्यवगम्य तदनन्तरं स नृपः कपर्दिना नामखण्डनभीरुः कविबान्धव इति नाम बभार ॥

२६ अथान्यदा श्रीकुमारपालनृपपुरतः श्रीयोगशास्त्रव्याख्याने संजायमाने पञ्चदशकर्मादानेषु वाच्यमानेषु ।

दन्तकेशनखास्थित्वक्रोम्णां ग्रहणमाकरे ।

इति प्रभुकृते मूलपाठे प० उदयचन्द्रः रोम्णो ग्रहणमिति भूयो भूयो वाचयन् प्रभुभिर्लिपिभेदं पृष्टः स प्राणितूर्याङ्गानामिति व्याकरणसूत्रेण प्राण्यङ्गानां सिद्धमेकत्वमिति लक्षणविशेषं स विज्ञपयन् प्रभुभिः श्लाघितो राजन्यैश्च । इति पं० उदयचन्द्रप्रबन्धः ।

२७ अथ कदाचित्स राजर्षिर्घृतपूरभोजनं कुर्वन् किञ्चिद्विचिन्त्य कृतसर्वाहारपरिहारः इति प्रभुं पप्रच्छ । यदस्माकं घृतपूराहारो युज्यते नवेति प्रभुभिरभिदधे । वणिग्ब्राह्मणयोर्युज्यते कृताभक्ष्यनियमस्य क्षत्रि-

१ विग्रहराज इति पण्डितमुखात्तनाम a b H २ रोम्णा ग्रहणं P
३ न्युंछनेन संभावितः H ४ पवित्रीभूय इति H

यस्य तु न, तेन पिशिताहारस्यानुस्मरणं भवतीत्थमेवेति पृथ्वीपतिरभिधाय पूर्वभक्षितस्याभक्ष्यस्य प्रायश्चित्तं याचितवान्। द्वात्रिंशद्दशनसंख्यया द्वात्रिंशद्विहारान्कारयेति।

राज्ञा तथाकृते, प्रभुदत्ते लग्ने वटपद्रकान्निजप्रासादे मूलनायकप्रतिष्ठां कारयितुं श्रीपत्तनमुपेयुषि कान्हनाम्नि व्यवहारिणि[1] तन्नगरमुख्ये प्रासादे तद्बिम्बं मुक्त्वा यावदुपहारान्गृहीत्वा स पुनरुपैति तावन्नृपतेरङ्गरक्षकैर्निरुद्धे द्वारि अन्तः प्रवेशमलभमानः कियति काले व्यतिक्रान्ते उत्थितैर्द्वारपालकैर्व्यतीते प्रतिष्ठाकाले स तत्र प्रविश्य प्रभोः पादमूले लगित्वा सोपालम्भं रुरोद। प्रभुभिरन्यथा दुरपनेयं तस्य दुःखमिति विमृश्य रङ्गमण्डपाद्बहिर्भूत्वा नक्षत्रचारेण स्वं लग्नमुदितं व्योम्नि विलोक्य घटिकासम्बन्धेन नैमित्तिकेन यस्मिँल्लग्ने बिम्बानि प्रतिष्ठापितानि तेषां वर्षत्रयमायुः सम्प्रतितने लग्ने तु प्रतिष्ठितमिदं चिरायुरिति प्रभुभिरादिष्टं। स तदैव प्रतिष्ठामकारयत्तत्प्रभूक्तं तथैव जज्ञे।

इत्यभक्ष्यभक्षणप्रायश्चित्तप्रबन्धः।

२८ मयापहृते धने पुरा कश्चिन्मूषको मृतस्तत्प्रायश्चित्ते राज्ञा याचिते तच्छ्रेयसे प्रभुभिस्तन्नामाङ्कितो विहारः कारितः। तथा च कयापि व्यवहारिवध्वाऽज्ञातज्ञातिनामग्रामसम्बन्धया पथि दिनत्रयं बुभुक्षितो नृपतिः शालिकरम्बेन सुहितीकृतस्तत्कृतज्ञतया तत्पुण्याभिवृद्धये करम्बविहारं श्रीपत्तनेऽकारयत्।

२९ तथा यूकाविहारश्चैवं। सपादलक्षदेशे कश्चिदविवेकी धनी केशसम्मार्जनावसरे प्रियार्पितां यूकां करतले संगृह्य पीडाकारिणीं तां तर्जयंश्चिरेण मृदित्वा व्यापादयामास। सन्निहितेनामारिकारिपञ्चकुलेन स श्रीमदणहिल्लपुरे समानीय नृपाय निवेदितः। तदनु प्रभूणामादेशा-

१ दन्तसंख्यया एकस्मिन्निबन्धे a b २ प्रतिष्ठोत्सवे a ३ कूटघटिका D

सद्ण्डपदे तस्य सर्वस्वेन तत्रैव यूकाविहारः कारितः । इति यूका-विहारप्रबन्धः ।

३० अथ स्तम्भतीर्थे सामान्ये सालिगवसहिकाप्रासादे यत्र प्रभूणां दीक्षाक्षणो बभूव रत्नमयबिम्बालङ्कृतस्तत्र निरुपमो जीर्णोद्धारः कारितः । इति प्रभुदीक्षावसहिकाया उद्धारप्रबन्धः ।[1]

३१ अथ श्रीसोमेश्वरपत्तने कुमारविहारप्रासादे बृहस्पतिनामा गण्डः कामप्यरतिं[2] कुर्वाणः प्रभोरप्रसादाद्भ्रष्टप्रतिष्ठ. श्रीमदणहिल्लपुरं प्राप्य षोढावश्यके प्रौढिं प्राप्य प्रभून् सिषेवे । कदाचिच्चातुर्मासिकपारणके प्रभूणां पादयोर्द्वादशावर्तवन्दनादनु—

२२) चतुर्मासी[3] यावत्तव पदयुगं नाथ निकषा
कषायप्रध्वंसाद्विकृतिपरिहारव्रतमिदम् ।
इदानीमुद्भिद्यन्निजचरणनिर्लोठितकले-
र्जलक्लिन्नैरन्नैर्मुनितिलकवृत्तिर्भवतु मे ॥

इति विज्ञपयंस्तत्कालागतेन राज्ञा प्रसन्नान्प्रभून्विमृश्य स पुनरेव तत्पददानपात्रीकृतः । इति बृहस्पतिगण्डस्य पुनः पददानप्रबन्धः ।

३२ अथान्यदा सर्वावसरस्थितेन राज्ञालिगनामा वृद्धः प्रधानपुरुष इत्यपृच्छ्यत । यदहं श्रीसिद्धनृपतेर्हीनः समानोऽधिको वा । तेन चाऽच्छलप्रार्थनापूर्वं श्रीसिद्धनृपतेः पण्णवतिर्गुणा द्वौ दोषौ । स्वामिनस्तु द्वौ गुणौ तत्संख्या एव दोषा इति तद्वाक्यादनु दोषमये आत्मनि विरागं दधानो यावच्छुरिकां चक्षुषि[4] क्षिपति तावदाशयविदा तेनेति व्यज्ञपि । श्रीसिद्धनृपते. पण्णवतिगुणाः[5] संग्रामासुभटतास्त्रीलम्पटता-

---

१ इति सालगवसहिउद्धारप्रबन्धः H   २ कामपि रतिं c जैनधर्मे कामप्यरतिं L   ३ चतुर्मासीमासीत् a   ४ कवे c d   ५ अष्टनवतिः H

दोषाभ्यां तिरोहिता । कार्पण्यादयो भवद्दोषा समरशूरतापरनारीसहोदरतागुणाभ्यामपह्नुता इति तद्वचसा स पृथ्वीनाथ स्वस्थावस्थस्तस्थौ । इत्यालिगप्रबन्धः ।

३३ अथ पुरा श्रीसिद्धराजराज्ये पाण्डित्ये स्पर्धमानो वामराशिनामा विप्रः प्रभूणां प्रतिष्ठानिष्ठामसहिष्णु. ।

२३) यूकालक्षशतावलीवलवलल्लोलोल्लसत्कम्बलो
दन्तानां मलमण्डलीपरिचयाद्दुर्गन्धरुद्धानन ।
नासावंशविरोधनाद्गिणिगिणत्पादप्रतिष्ठास्थितिः
सोऽयं हेमडसेवड पिलपिलत्खल्लि समागच्छति ॥

इति तदीयममन्द निन्दास्पदं वचनमाकर्ण्यान्तर्भूतामर्षवत्तर्जनापरं वचः प्रभुभिरभिहित पण्डित विशेषणं पूर्वमिति भवता किं नाधीतमतोऽस्त' परं सेवडहेमड इत्यभिधेयमिति, सेवकै. कुन्तपश्चाद्भागेनाहत्य मुक्त । श्रीकुमारपालनृपते राज्येऽशस्त्रो वध इति तद्वृत्तिच्छेद कारित. । स तत परं कणभिक्षया प्राणाधारं कुर्वाण प्रभूणां पौषधशालाया पुरत स्थित । आनादिभूपतितपस्विभिरधीयमानयोगशास्त्रमाकर्ण्याऽशटत्वेदमपाठीत् —

२४) आतङ्ककारणमकारणदारुणानां
वक्त्रेषु गालिगरल निरगालि येषाम् ।
तेषा जटाधरफटाधरमण्डलानां
श्रीयोगशास्त्रवचनामृतमुज्जिहीते ॥

इति तद्वचसाऽमृतधारासारेण निर्वाणपूर्वोपतापास्तस्मै द्विगुणां वृत्तिं प्रसादीकृतवन्त । इति वामराशिप्रबन्धः ।

३४ अथ कदाचिच्चारणौ द्वौ सुराष्ट्रमण्डलनिलयौ दूहाविद्यया स्प-

१ लिक्षशत. ० २ गिणिगिणी L ३ वक्त्रेण ०

धमानौ श्रीहेमाचार्येण यो व्याख्यायते सोऽपरस्य हीनोपक्षयं ददातीति प्रतिज्ञाय श्रीमदणहिल्लपुरं प्रापतुः तदेकेन प्रभुसमागतेन ।

२५) *लच्छिवाणिमुहकाणि एयई भागी मुह भरेडं ।
हेमसूरिअच्छीणि जे ईसरते ते पण्डिया ॥

इत्युक्तआभ्यर्णे स्थिते तस्मिन् श्रीकुमारपालविहारे आरात्रिकावसरानन्तरं प्रणामपरो नृपः प्रभुणा दत्तपृष्ठिहस्तः क्षणं यावत्तिष्ठति । अत्रान्तरे प्रविश्य द्वितीयश्चारणः ।

२६) *हेम तुहाला कर भरउं जांह अचंभ्मूरिद्दि ।
जेवं पह हिठा मुहा तांह ऊपहुरी सिद्धि ॥

इत्यनुच्छिष्टेन तद्वचसान्तश्चमत्कृतो नृपतिरेतदेव भूयोभूयः पाठयामास । ततस्त्रिःकृत्वः पठिते किं पठिते लक्षं दास्यसीति विज्ञप्तस्तस्मै त्रिलक्षं दापयामास । इति सौराष्ट्रचारणयोः प्रबन्धः ।

३९ कदाचिच्छ्रीकुमारपालनृपतिः श्रीसंघाधिपतीभूय तीर्थयात्रां चिकीर्षुर्महता महेन श्रीदेवालयप्रस्थाने सञ्जाते सति देशान्तरायातयुगलिकया त्वां प्रति डाहलदेशीयकर्णनृपतिरुपैतीति विज्ञप्तः स्वेदबिन्दुतिलकितललाटं दधानो मन्त्रिवाग्भटेन साकं साध्वसध्वस्तसंघाधिपत्यमनोरथः प्रभुपादान्ते स्वं निनिन्द । अथ तस्मिन्नृपते समुपस्थिते महाभये किञ्चिदवधार्य द्वादशे यामे भवतो निवृत्तिर्भविष्यतीत्यादिश्य विसृष्टो नृपः किंकर्तव्यतामूढो यावदास्ते तावन्निर्णीतवेलाया समागतयुगलिकया श्रीकर्णो दिवं गत इति विज्ञप्तो नृपेण ताम्बूलमुत्सृज्य कथमिति पृष्टौ तावूचतुः । कुम्भिकुम्भस्थः श्रीकर्णः प्रयाणं निशि कुर्वन्निद्रामुद्रितलोचनः कण्ठपीठप्रणयिना सुवर्णशृङ्खलेन प्रविष्टन्यग्रोध-

१ पयइ H c　२ भरउ b　३ सुरिआ छाणि c　४ जिह अच्चुपुयरिद्दि c D　५ जे चपहहिहा मुहा तीह उरहरी सिद्दी c D　६ त्रि.पठिते c D

पादपेनोल्लम्बितः पञ्चतामञ्चितवान् । तस्य संस्कारानन्तरमावां प्रचलिताविति ताभ्यां विज्ञप्ते तत्काल पौषधवेश्मनि समागतो नृपः प्रशंसापरः कथं कथमित्यपवार्य द्वासप्ततिमहासामन्तैः समं समस्तसंघेन च प्रभुणा द्विधोपदिश्यमानवर्त्मा धुन्धुकनगरे प्राप्तः प्रभूणां जन्मगृहभूमौ स्वयं कारितसप्तदशहस्तप्रमाणझोलिकाविहारे प्रभावनां विधित्सुर्जातिपिशुनानां द्विजातिनामुपसर्गमुदित वीक्ष्य तान्विषयताडितान्कुर्वन् श्रीशत्रुंजयतीर्थमाराधयन् ।

३६ दुक्खक्खउं कम्मक्खउं इति प्रणिधानदण्डकमुच्चरन् देवस्य पार्श्वे विविधप्रार्थनावसरे ।

२७) इक्कहं फुल्लहं माटि देअइ सामी सिद्धिसुहु ।
तिणिसिंउ केही साटी भोलिम जिणवरह ॥

इति चारणमुच्चरन्त निशम्य नवकृत्वः पठितेन नवसहस्रांस्तस्मै नृपो ददौ । तदनन्तरमुज्जयन्तसन्निधौ गते तस्मिन्नकस्मादेव पर्वतकम्पे सञ्जायमाने श्रीहेमचन्द्राचार्या नृपं प्राहुः । इयं छत्रशिला युगपदुपेतयोर्द्वयो पुण्यवतोरुपरि निपतिष्यतीति वृद्धपरम्परा, तदावां पुण्यवन्तौ यदियं गी·[4] सत्या भवति तदा लोकापवाद , नृपतिरेव देवं नमस्करोतु न वयमित्युक्ते, नृपतिनोपरुध्य प्रभव एव सघेन सह प्रहिताः स्वय छत्रशिलाभागे परिहृत्य परस्मिन्जीर्णप्राकारपक्षे नव्यपद्याकरणाय श्रीवाग्भटदेव आदिष्ट पद्यायाः पक्षद्वये व्ययीकृतात्रिषष्टिलक्षा· । इति तीर्थयात्राप्रबन्धः ।

---

१ देवइ सिद्धि सुदु केहि साटि कटि रेभोतिम c D २ सउ c ३ वृद्धपरपरया P ४ गीरसत्या सत्या P ५ छत्रशिला a ∘ कृष्णर्षीयजयसिंहसूरिविरचिते कुमारपालचरित नवमसर्गे वर्णितोय प्रवध:

३७ कदाचित्पृथिव्यामानृण्याय नृपतिना स्वर्णसिद्धये श्रीहेमचन्द्राणामुपदेशाच्चद्गुरवः श्रीसंघनृपतिविज्ञप्तिकाभ्यामाकारितास्तीव्रव्रतपरायणा महत्संघकार्यं विमृश्य विधिविहारक्रमेण पथि केनाप्यलक्ष्यमाणा निजामेव पौषधशालामागताः । राजा तु प्रत्युद्गमादिसामग्रीं कुर्वन् प्रभुज्ञापितस्तत्राययौ । अथ गुरौ नृपतिप्रमुखैः समस्तश्रावकयुतैः प्रभुभिर्द्वादशावर्तवन्दनावन्दिते वन्दनान्ते तौ श्रुततदुपदेशानन्तरं गुरुभिःपृष्टे संघकार्ये सभां विसृज्य जवनिकान्तरितौ श्रीहेमचन्द्रनृपती तत्पादयोर्निपत्य सुवर्णसिद्धेर्याचनां चक्राते । मम बाल्ये वर्तमानस्य ताम्रखण्डः काष्ठभारवाहिकातो याचितवल्लीरसेनाभ्यक्तो युष्मदादेशाद्वह्निसंयोगात्सुवर्णीबभूव । तस्या वल्लेर्नामसंकेतादिरादिश्यतामिति, श्रीहेमाचार्ये उक्तवति कोपाटोपात् श्रीहेमचन्द्रं दूरतः प्रक्षिप्य न योग्योऽसीति । अग्रे मुद्गरसप्रायदत्तविद्यया त्वमजीर्णभाक् कथमिमां विद्यां मोदकप्रायां तव मन्दाग्नेर्ददामीति तं निषिध्य नृपं प्रति एतद्भाग्यं भवतो नास्ति येन जगदानृण्यकारिणी हेमनिष्पत्तिविद्या तव सिध्यति । अपि च मारिनिवारणजिनमण्डितपृथ्वीकरणादिभिः पुण्यैः सिद्धे लोकद्वये किमधिकमभिलषसीत्यादिश्य तथैव विहारक्रमं कृतवन्तः॥

* [एकदा पृष्टं राज्ञा पूर्वभवस्वरूपं तत्सर्वं कथितं प्रभुभिरिति ।]

३८ अथ कस्मिन्नप्यवसरे सपादलक्षं प्रति सज्जीकृते सैन्ये श्रीवाग्भटस्यानुजन्मा चाहडनामा मन्त्री दानशौण्डतया दूषितोऽपि भृशमनुशिष्य भूपतिना सेनापतिश्चक्रे । तेन प्रयाणद्वितयानन्तरमस्तोकमर्थिलोकं मिलितमालोक्य कोशाधिपालक्षद्रव्ये याचिते, नृपादेशादस्मिन्न ददाने अथ तं कशाप्रहारेणाहत्य स सेनापतिस्तं कटकान्निरवासयत् । स्वयं तु यदृच्छया दानैः प्रीणितार्थिलोकश्चतुर्दशशतसंख्यासु करभीष्वारोपितै-

* कोष्ठकान्तर्गतं वचनमिदं a H L M आदर्शेषु नास्ति परन्तु मुद्रितपुस्तके वर्तते प्रसंगस्तु चतुर्विंशतिप्रबन्धे वर्णित.

द्विगुणैः सुभटैः समं चरन्मितैः प्रयाणैर्बम्बेरानगरे प्राकारं वेष्टयामास । अथ तस्यां निशि सप्तशतीकन्यानां विवाहः प्रारब्धोऽस्तीति नगरलोकात् श्रुत्वा तद्विवाहार्थं तथैव निशि स्थित्वा प्रातः प्राकारपरावर्तं चकार । तत्राधिगतं स्वर्णकोटीसप्तकं तथैकादशसहस्राणि वडवाग्रामिति संपत्तिगर्भितां विज्ञप्तिकां वेगवत्तरैश्वैर्नृपं प्रति प्राहिणोत् । स्वयं तत्र देशे श्रीकुमारपालनृपतेराज्ञां दापयित्वाऽधिकारिणो नियोज्य व्याघुटितः श्रीपत्तनं प्रविश्य राजसौधमधिगम्य नृपं प्रणनाम । नृपस्तदुचितालापावसरे तद्गुणरञ्जितोऽप्येवमवादीत् । तव स्थूललक्ष्यतैव महद्दूषणं । (वाहानीकयो:साधनादौ साधीयान् नेदीयान्प्रयोगनिष्पत्तिरक्षामन्त्रो नो चेच्चक्षुर्दोषेणोर्द्ध एव विदीर्यसे) यं व्ययं भवान्कुरुते तादृशं कर्तुमप्यहं न मभूष्णुः स इति श्रुतनृपादेशान्नृपं प्रति "तथ्यमेव तदादिष्टं देवेन" एवंविधं व्ययं कर्तुं प्रभुर्न प्रभवति । यतः स्वामी परंपरया न नृपतेः सुतः । अहं तु नृपपुत्रोऽतो मयैव द्रव्यव्यय. साधीयान्क्रियते* । तेनेति विज्ञप्ते नृपतिस्तोषं करोतु रोषं वा निकषः निकषा काञ्चनश्रियमासादयतीत्यनर्घ्यतां लभमानो नृपतिविसृष्टः स्वं पदं प्रपेदे । इति **राजघरट्टचाहडप्रबन्धः ॥**

३९ अथ तस्य कनीयान्भ्राता सोलाकनामा मण्डलीकः सत्रागारबिरुदं बभार ।

४० अथ कदाचिदानाकनामा मातृष्वस्रीयस्तत्सेवागुणतुष्टेन राज्ञा दत्तसामन्तपदोऽपि तथैव सेवमानः । कदापि मध्यन्दिनावसरे चन्द्रशालापल्यङ्कस्थितस्य नृपतेः पुरो निविष्टः सहसा कमपि प्रेष्यं तत्र प्राप्तं

१ मत्वा P H २ b c D आदर्शेषु कोष्ठकान्तर्गता पङ्क्तिर्नास्ति ३ कर्तुं क्षमते c

* यतोहं स्वामिबलेन व्ययं करोमि । स्वामी तु कस्य बलेनातो मयैव द्रव्यव्ययः साधीयान् क्रियते इति वदन् प्रमुदितेन राज्ञा सत्कृतो राजसदस्यनर्घ्यतां लभमानो राजघरट्टबिरुदं लब्ध्वा । इति जिनमण्डनोपाध्यायकृतकुमारपालप्रबन्धे प. ९४

४ रोष वा निकषा A ५ वाहड A ६ तथा A

प्रेक्ष्य कोऽयमिति पृष्टे नृपतिना श्रीमदानाकः स्वं कर्मकरमुपलक्ष्य तत्सङ्केतान्निकेतनान्निर्गत्य सकौशलं पृष्टः पुत्रजन्मवर्धापनिकां प्रार्थयामास । ओमिति तया वार्तया तु दिनकरप्रभयेव विकसितवदनारविन्दः तं विसृज्य स्वं पदमुपेत. । राज्ञा किमेतदिति पृष्टस्तेन स्वामिन. पुत्रोत्पत्तिरिति विज्ञप्ते, वसुधाधवः स्वगतं किञ्चिदवधार्य तं प्रति प्रकाशं प्राह । यज्जन्म निवेदयितुमयं कर्मकरो वेत्रिभिरस्खलित एवेमां भुवमाप[1] तावता पुण्योपचयेनायं गूर्जरदेशे नृपो भावी परमस्मिन्पुरे धवलगृहे च न । यतोऽतः स्थानादुत्थापितस्य तवाग्रे सुतोत्पत्तिर्निवेदिता । ततो हेतोर्नास्मिन्नगरेश्वरत्वमिति[2] विचारचतुर्मुखेन श्रीकुमारपालदेवेन निर्णीतम् । इति लवणप्रसादप्रबन्धः ॥

४१)२८) आज्ञावर्तिषु मण्डलेषु विपुलेष्वष्टादशस्वादरा-*
दब्दान्येव चतुर्दश प्रसृमरां मारिं निवार्योजसा ।
कीर्तिस्तम्भनिभांश्चतुर्दशशतीसंख्यान्विहारांस्तथा
कृत्वा निर्मितवान्कुमारनृपतिर्जैनो निजैनोव्ययम् ॥

अथ प्रभोः कदाचित्कच्छराजलक्षराजमातुर्महासत्या शापाच्छ्रीमूलराजान्वयानां[3] लूतारोगः सङ्क्रामतीति[4] सम्बन्धात्तु गृहिधर्मप्रतिपत्त्यवसरे प्रभोरुद्धर्णितराज्यभारे श्रीकुमारपाले तच्छिद्रेण तान्प्रविश्य लूताव्याधिर्बाधामधात् । तद्दुःखदु खिते सराजलोके राज्ञि प्रणिधानान्निजमायुः सबल वीक्ष्याऽष्टाङ्गयोगाभ्यासेन प्रभवस्तं लीलयोन्मूलितवन्तः× ।

१ वायमाप P २ तस्मिन्नगरे नरेश्वरत्वं C

* कर्णाटे १ गूर्जरे २ लाटे ३ सौराष्ट्रे ४ कच्छ ५ सैन्धवे ६ ।
उच्चाया ७ चैव भम्भेर्यां ८ मारवे ९ मालवे १० तथा ॥ १
कौङ्कणे च ११ महाराष्ट्रे १२ कीरे १३ जान्लधरे १४ पुन. ।
सपादलक्षे १५ मेवाडे १६ दीपा १७ भीराख्ययोरपि १८॥२
इति जिनमण्डनोपाध्यायकृतकुमारपालप्रबन्धे पत्र ५७

३ राजन्यानां A C H ४ तीति स व्याधि कुमारपाले बाधामधात् P

× तथातनाबाधितमूर्तिरन्वैः पप्रच्छ सूरिं गदशान्तिहेतुम् ।
आयुर्धनं श्रीकुमरस्य वीक्ष्य ते दक्षमुख्या अवदन्निमृश्य ॥

४२ कदापि कदलीपत्राधिरूढं कमपि योगिनमालोक्य विस्मिताय नृपतये आसनबन्धेन चतुरङ्गुलमूलभूमित्यागाद्ब्रह्मरन्ध्रेण निर्यत्तेजःपुञ्जं प्रभवो दर्शयामासुः।

अथ चतुरशीतिवर्षप्रमाणायुःपर्यन्ते निजमवसानदिनमवधार्यान्त्याराधनक्रियायामनशनपूर्वप्रारब्धायां तदर्तितरलिताय नृपतये षण्मासीशेषमायुरास्ते संतत्यभावाद्विद्यमान एव निजामुत्तरक्रियां कुर्या इत्यनुशिक्ष्य दशमद्वारेण प्राणोत्क्रान्तिमकार्षुः। तदनन्तरं प्रभोः संस्कारादनु तद्भस्म पवित्रमिति राज्ञा तिलकव्याजेन नमश्चक्रे। ततः समस्तसामन्तैस्तदनु नगरलोकैस्तत्रत्यमृत्स्नायां गृह्यमाणायां तत्र हेमखण्ड इत्यद्यापि प्रसिद्धिः।

४३ अथ राजा बाष्पाविललोचनः प्रभुशोकविक्लवमना[1] सचिवैर्विज्ञप्त इदमवादीत्। स्वपुण्यार्जितोत्तमतमलोकान् प्रभून्न शोचामि किं तु निजमेव सप्ताङ्गराज्यं सर्वथा परिहार्यं राजपिण्डदोषदूषितं, यन्मदीयमुद-

निवेश्यतेऽन्यो यदि कोपि राज्ये हित्वामयस्त्वां समयं प्रयाति॥
उवाच चातुर्यनिधिर्नरेशो निहन्म्यहं किं निजजीवितार्थे।
वराकमन्यं परमार्थविज्ञ गिरं सुधासारसमां निपीय॥
दयार्द्रितस्ता अवदद्यतीशः निविश्य राज्ये स्वयमेव तु त्वम्।
ततो हरिष्यामि नरेश्वराहं अवोचदुच्चैश्चकितो नरेशः॥
को देववृक्षं पिचुमन्दहेतोश्चिन्तामणिं काचकृते निहन्ति।
रोगं निहन्तु मम शक्तिरस्ति स्वाङ्गान्तरं योगबलेन राजन्।
ततः कुमारो महता महेन न्यवीविशत्सूरिवरं स्वराज्ये।
हित्वा कुमारं परिमुक्तराज्यं लूतामयः सूरिशरीरमाप॥
रोगं हन्तुं निश्चलाङ्गः स योगी प्राणायामं पूरकाख्यं वितेने।
ऊर्ध्वं नीते, सूर्यबिम्बे समन्ताच्चन्द्रस्तापादद्राग् सुधाभिर्ववर्ष॥
श्लिष्टे ताभिः सर्वरोगापहाभिर्विगदाङ्गं चन्द्रमासीदमुष्य।
इति चारित्रसुन्दरगणिकृतकुमारपालचरितस्य दशमसर्गस्य प्रथमसर्गे प. ३४

1 विप्लवमनाः P

कमपि जगद्गुरोरङ्गे न लग्नं तदेव शोचामीति प्रभुगुणानां स्मारं स्मारं सुचिरं विलप्य प्रभूदिते दिने तदुपदिष्टविधिना समाधिमरणेन नृपः स्वर्लोकमलंचकार ॥ सं० ११९९ पूर्ववर्ष ३१ श्रीकुमारपालदेवेन राज्यं कृतं ।

४४ सं० १२३० वर्षेऽजयदेवोऽभिषिक्तः । अस्मिन्पूर्वजप्रासादान् विध्वंसयति सीलेनामा कौतुकी नृपपुरः प्रारब्धेऽवसरे कृतककामपट्टता मायया निर्माय तत्र स्वकल्पितं देवकुलपञ्चकं पुत्रेभ्यः समर्प्य ममानन्तरं भक्त्यतिशयेनाराधनीयमित्यनुशिक्ष्यान्त्यावस्थायां यावदास्ते तावत्तेन लघुपुत्रेण तत्तूर्णं चूर्णितमाकर्ण्य रे श्रीमदजयदेवेनापि पितुः परलोकानन्तरं तद्धर्मस्थानानि विध्वंसितानि त्वं त्वद्यापि मयि विद्यमानेऽपि चूर्णयन्नधमतमोऽसीति तदालापेन सत्रपस्तस्मादसमञ्जसाद्विरराम ।

४५ तदनु श्रीअजयदेवेन श्रीकपर्दिमन्त्री महामात्यपदं दातुमत्यर्थमभ्यर्थित. प्रातः शकुनान्यवलोक्य तदनुमत्या प्रभोरादेशमाचरिष्यामीत्यभिधाय शकुनगृहं गतस्ततः सप्तविधं दुर्गादेव्या शकुनं याचितमवाप्य तच्छकुनं पुष्पाक्षतादिभिरभ्यर्च्य कृतकृत्यं मन्यमानः पुरगोपुरान्तःप्राप्तो नदन्तं वृषभमैशानदिग्भागे विलोक्यातिशयस्मेरमनाः स्वं निवासमासाद्य भोजनानन्तरं मरुवृद्धेन यामिकेन शकुनस्वरूपं पृष्टः श्रीकपर्दी तदग्रे तत्स्वरूपमादिश्य तांस्तुष्टाव । ततो मरवृद्धः—

२९) नद्युत्तारेऽध्ववैषम्ये तथा सन्निहिते भये ।
नारीकार्ये रणे व्याधौ विपरीतौ प्रशस्यते ॥

इति प्रामाण्याद्भवानासन्नव्यसनतया मतिभ्रंशात्प्रतिकूलमप्यनुकूलमनुते । यस्त्वया वृषभ शुभः परिकल्पित. सोऽपि भवद्व्यापत्त्या शिवस्याभ्युदयं पश्यस्तद्वाहनोक्षो जगर्जेति तदुक्तिमवमन्यमाने तस्मिन्नापृच्छ्य

१ सीलण नामा H २ कृतकृत्यमानी a H ३ विपरीत C ४ मनुषे a H ५ तद्वाहात उक्षा P

तीर्थान्यऽवगाढुं गते, स नृपतिना प्रसादीकृतां मुद्रामासाद्य महता महेन समधिगतनिजसौधे विश्रम्य निशि नृपतिना विधृतः समानप्रतिद्वैरभिभवितुमारब्धः ।

३०) जो करिवराण कुम्भे पायं दाऊण मुत्तिए दलइ ।
सो सीहो विहिवसउ जम्बूयपरिपिल्लणं सहइ ॥

इत्यादि विमृशन्कटाहिकायां प्रक्षेपकाले ।

३१) अर्थिभ्यः कनकस्य दीपकपिशा विश्राणिताः कोटयो
वादेषु प्रतिवादिनां विनिहिताः शास्त्रार्थगर्भा गिरः ।
उत्खातप्रतिरोपितैर्नृपतिभिः शारैरिव क्रीडितं
कर्तव्यं कृतमर्थिता यदि विधेस्तत्रापि सज्जा वयम् ॥

स सुधीरित्यन्त्यकाव्यमधीयंस्तथैव व्यापादयांचक्रे । इति श्री कपर्दिप्रबन्धः ॥

४६ अथ श्रीप्रबन्धशतकर्ता रामचन्द्रस्तु तेन भूपापसदेन तप्तताम्रपट्टिकायां निवेश्यमानः ।

३२) महिवीढह सचराचरह जिण सिरि दिह्नो पाय ।
तसु अत्थमणु दिणेसरहं होउत होई चिरायं ॥

इत्युदीर्य दशनाग्रेण रसनां छिन्दन् विपन्न एव व्यापादयांचक्रे । इति रामचन्द्रप्रबन्धः ।

४७ अथ राजपितामहः श्रीमानाम्रभटस्तत्तेजोऽसहिष्णुभिः सामन्तैस्तैः समं तदालब्धावसरे प्रणामं कारयद्भिराक्षिप्त एवमवादीत् । देवबुद्ध्या श्रीवीतरागस्य, गुरुबुद्ध्या श्रीहेमचन्द्रर्षेः, स्वामिबुद्ध्या कुमारपालस्यैव मे नमस्कारोऽस्मिन् जन्मनीति जैनधर्मवासितसप्तधातुना तेने-

---

१ तद्दर्शन P २ जिणिसिरि दिन्ना a ३ दिणसरसु c d ४ होइतु होदु c d ५ विराउ a b

त्यभिहिते रुष्टो राजा । युद्धसज्जो भवेति तद्गिरमाकर्ण्य श्रीजैनबिम्बं समभ्यर्च्याऽनशनं प्रपद्याङ्गीकृतसंग्रामदीक्षो निजसौधाद्राज्ञः परिग्रहं निजभटवातेन तुषनिकरमिव विकरन् घटिकागृहे प्राप्तस्तेषां मलीमसानां सञ्जनितं कश्मलं धारातीर्थे प्रक्षाल्य तत्कौतुकालोकनागताभिरप्सरोभिरहंपूर्विकया व्रियमाणो देवभूयं जगाम ॥

३३) वरं भट्टैर्भाव्यं वरमपि च खिङ्गैर्धनकृते
वरं वेश्याचार्यैर्वरमपि महाकूटनिपुणैः ।
दिवं याते दैवादुदयनसुते दानजलधौ
न विद्वद्भिर्भाव्यं कथमपि बुधैर्भूमिवलये ॥

३४) त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युग्रपुण्यपापानामिहैव फलमश्नुते* ॥

४८ इति पुराणोक्तप्रामाण्यात्स कुपतिर्वयजलदेवनाम्ना प्रतीहारेण क्षुरिकया हतो धर्मस्थानपातनपातकी कृमिभिर्भक्ष्यमाणः प्रत्यहं नरकमनुभूय परोक्षतां प्रपेदे । सं० १२३० पूर्वमजयदेवेन वर्ष ३ राज्यं कृतम् ॥

४९ सं० १२३३ पूर्ववर्ष २ बालमूलराजेन राज्यं कृतमस्य मात्रा नाइकिदेव्या परमर्दिभूपसुतयोत्सङ्गे शिशुं निधाय गाडरारघट्टनामनि घाटे संग्रामं कुर्वत्या म्लेच्छराजा तत्सत्त्वादकालागतजलदपटलसाहाय्येन विजिग्ये ॥

५० सं० १२३५ पूर्ववर्ष ६३ श्रीभीमदेवेन राज्यं कृतमस्मिन् राज्ञि राज्यं कुर्वाणे श्रीसोहडनामा मालवभूपतिर्गूर्जरदेशविध्वंसनाय सीमान्तमागतस्तत्प्रधानेन सम्मुखं गत्वेत्यवादि—

प्रतापो राजमार्तण्ड पूर्वस्यामेव राजते ।
स एव विलयं याति पश्चिमाशावलम्बिनः ॥

---

* हितोपदेशे दृश्यते पद्यमिदम् १ प्रमाणे ८ १८

इति विरुद्धां तद्गिरमाकर्ण्य स पश्चान्निववृते । तदनु तत्पुत्रेण श्रीमदर्जुनदेवनाम्ना गूर्जरदेशभङ्गोऽप्यकारि ।

८१ श्रीमद्भीमदेवराज्यचिन्ताकारी व्याघ्रपल्लीसङ्केतप्रसिद्धः श्रीमदानाकनन्दनः श्रीलवणसाहप्रसादश्चिरं राज्यं चकार । तत्सुतः साम्राज्यभारधवलः श्रीवीरधवलस्तन्माता मदनराज्ञी देवराजनाम्नो भगिनीपते पट्टकिलस्य भगिन्यां विपन्नायां तस्य बहुतरमनिर्वहमाणमायद्वारं[1] निशम्य तन्निर्वहणाय लवणप्रसादाभिधपतिमापृच्छय शिशुना वीरधवलेन सम तत्र गता सती तेन स्पृहणीयगुणाकृतिरिति गृहिणीचक्रे । श्रीलवणस्तद्वृत्तान्तं सम्यगवगम्य तं व्यापादयितुं निशि तद्गृहे प्रविष्टो निभृतीभूय स यावदवसरं निरीक्षते, तावत्स भोजनायोपविशन् वीरधवलं विना नाश्नामीति भूयो भूयो व्याहृत्य निर्बन्धात्समानीयैकस्मिन्नेव स्थालेऽश्नन्नकस्मादुपतितं शरीरिणं कृतान्तमिव स्वान्तकमालोक्य श्यामलास्यो मा भैषीरिति तेनोचे । यदहं त्वामेव हन्तुमागत. परमस्मिन्मन्नन्दने वीरधवले वात्सल्यं साक्षाच्चक्षुषा निरीक्ष्य तदाग्रहान्निवृत्तोऽस्मीत्युक्त्वा तेन सत्कृतो यथागतं जगाम । वीरधवलस्यापरपितृकाः[2] राष्ट्रकूटान्वयाः साङ्गणचामुण्डराजादयो वीरव्रतत्वेन[4] भुवनतलप्रतीता[3] । अथ स वीरधवलक्षत्रिय उन्मीलितकिञ्चिच्चेतनस्तस्माद्वृत्तान्तात्त्रपमाणस्तद्गृहं त्यक्त्वा निजमेव जनकं सिषेवे ।

८२ सत्त्वौदार्यगाम्भीर्यस्थैर्यनयविनयौचित्यदयादानदाक्षिण्यादिगुणशाली शालीनतया कण्टकग्रस्तां[5] कामपि भुवमाक्रम्य पित्रापि कियत्कृतजनपदप्रसादो द्विजन्मना चाहडनाम्ना सचिवेन चिन्त्यमानराज्यभार. प्राग्वाटवंशमुक्तामणिना पुरा श्रीमत्पत्तनवास्तव्येन तत्कालं तत्रायाततेज पालमन्त्रिणा सह सौहार्दमुत्पेदे ।

१ आयद्वार P २ दपि त P ३ अपरमातृकाः a P ४ वीरव्रतेन H
५ कटकग्रस्ता H

५३ मन्त्रिणस्तु जन्मवार्ता चैवं । कदाचिच्छ्रीमत्पत्तने भट्टारकश्रीहरिभद्रसूरिभिर्व्याख्यानावसरे कुमारदेव्यभिधाना काचिद्विधवातीव रूपवती मुहुर्मुहुर्निरीक्ष्यमाणा तत्र स्थितस्याशराजमन्त्रिणश्चित्तमाचकर्ष । तद्विसर्जनानन्तरं मन्त्रिणानुयुक्ता गुरव इष्टदेवतादेशादमुष्याः कुक्षौ सूर्याचन्द्रमसोर्भाविनमवतारं पश्यामः, तत्सामुद्रिकानि भूयो भूयो विलोकितवन्त इति प्रभोर्विज्ञाततत्त्वः स तामपहृत्य निजां प्रेयसीं कृतवान् । क्रमात्तस्या उदरेऽवतीर्णौ तावेव ज्योतिष्केन्द्राविव वस्तुपालतेजःपालाभिधानौ सचिवावभूतां ।

५४ अथान्यदा श्रीवीरधवलदेवेन निजव्यापारभारायाभ्यर्थ्यमानः प्राक् स्वसौधे तं सपत्नीकं भोजयित्वानुपमा राजपत्न्यै श्रीजयतलदेव्यै निजं कर्पूरमयताडङ्कयुग्मं कर्पूरमयं मुक्ताभिःसुवर्णमयमण्यन्तरिताभिर्निष्पन्नमेकावलीहारं सा प्राभृतीचकार, मन्त्रिण प्राभृतमुपढौकितं निषिध्य निजं व्यापारं समार्पयत्[१] । यत्त्वेदानीं वर्तमानं वित्तं तत्ते कुपितोऽपि प्रतीतिपूर्वं पुनरेवं ददामीति, अक्षरपत्रान्तरस्थबन्धपूर्वकं श्रीतेजःपालाय व्यापारसम्बन्धिनं पञ्चाङ्गप्रसादं ददौ ।

३४) अकरात्कुरुते कोशमवधाद्देशरक्षणम् ।
देशवृद्धिमयुद्धाच्च स मन्त्री बुद्धिमांश्च स ॥

निखिलनीतिशास्त्रोपनिषन्निषण्णधी· स्वस्वामिनं वर्धयन् भानूदये कालपूजया विधिवच्छ्रीजिनमर्चित्वा गुरूणां चन्दनकर्पूरपूजानन्तरं द्वादशावर्त्तवन्दनदानादनु यथावसरप्रत्याख्यानपूर्वमपूर्वमेकैकं श्लोकं गुरोरध्येति । मन्त्रावसरानन्तरं सद्यस्करसवतीपाकभोजनानन्तरं, मुञ्जालनामा महोपासकस्तदङ्गलेखकोऽवसरे रहसि पप्रच्छ । स्वामिनाहर्मुखे शीतान्न-

१ समर्पयन् H C २ यत्तावकादीना b यन्मवेदानीं P ३ पुनरेतावदामि P ४ पात्रान्तरसम्बन्ध P ५ भूमि C ६ वन्दन I'

माहार्यते किं वा सद्यस्कमिति पृच्छन्त ग्रामेय द्वेधा त्रेधाऽवधीर्य कदाचित्क्रोधान्मन्त्रिणा पशुपाल इत्याक्षिप्त । स धृतधैर्य उभयो. कश्चिदेकतर स्यादित्यभिहिते तद्वचश्चातुरीचमत्कृतचित्तोऽनधिगतभवदुपदेशध्वनिरह, तद्विश यथास्थित विज्ञप्यतामित्यादिष्ट स वाग्मी प्रोवाच । या रसवतीमतीव रसप्लुता सद्यस्का प्रभुरभ्यवहरति ता प्रागपुण्यरूपा जन्मान्तरिततयात्यन्तशीतला मन्ये । किं चेद मया गुरो सदेशवचनमावि कृत तत्त्व तु त एवावधारयन्तीति तत्र पादाववधार्यता तेनेति विज्ञप्त श्रीतेज पालनामा मन्त्री कुलगुरुभट्टारकश्रीविजयसेनसूरीणामभ्यर्णमागतो गृहिधर्मं पप्रच्छ । तैरुपासकदशाभिधससमाङ्गाज्जिनोदितदेवपूजावश्यकयतिदानादिके गृहिधर्मे समुपदिष्टे, तत प्रभृति स देवतार्चनविशेषजैनमुनिदानाद्य धर्मकृत्यमारब्धवान् ।

८८ वर्षत्रयदेवतावसराय पदेन पृथक्कृतेन पट्त्रिंशत्सहस्रप्रमाणेन द्रव्येण बाउलाग्रामे श्रीनेमिनाथप्रासाद समजनि ॥ अथ स० १२७७ वर्षे सरस्वतीकण्ठाभरणलघुभोजराजमहाकविमहामात्यश्रीवस्तुपालेन महायात्रा प्रारेभे । गुरूपदिष्टे लग्ने तत्कृतसघाधिपत्याभिषेकेण श्रीदेवालयप्रस्थाने उपक्रम्यमाणे दक्षिणपथे दुर्गादेव्या स्वरमाकर्ण्य स्वय तद्विदा शाकुनिकेन किञ्चिच्चिन्तयति । मरुवृद्ध शकुन भारित विधेहीत्यम्भिदधान शकुनाच्छब्दो बलीयानिति विचार्य पुराद्बहिरावासेषु श्रीदेवालय सस्थाप्य शकुनव्यतिकर पृष्टो मार्गवैषम्ये शकुनाना वैपरीत्य श्लाघ्यते, राज्यविकलताया, तीर्थमार्गाणा वैषम्य तथा, यत्र सा दुर्गा दृष्टिपथ गता तत्र कमपि दक्ष पुरुष प्रस्थाप्य स प्रदेशो दृश्यता । तथाकृते स पुरुष

१ ग्राम्योऽय c २ मन्यते P ३ गृहिधर्मविधि गुरुन् । ४ जैनप्राकृते निबद्धो उवासगदसाहोऽभिधोऽय ग्रन्थ श्री हर्नलमहाशयेन ' बीब्लोथीका इण्डीका' श्रेण्या सशोध्य सानुवाद प्रकाशित ५ तत्कृत्य P ६ दक्षिणपक्षे H ७ पुराद्बहिः P

इति विज्ञपयामास। यतस्मिन् वरण्डके* नवीक्रियमाणे सा त्रयोदशेष्वेरेषु निषण्णा देव्यभूत्। अथ स मरुवृद्धो देवी भवतः सार्धत्रयोदशसंख्या यात्रा अभिहितवती। अन्त्यार्धयात्राहेतुं भूयः पृष्टे स आह। इहातुलमङ्गलावसरे तदुक्तुं न युक्तं, समये सर्वं निवेदयिष्यामीति वाक्यानन्तरं श्रीसंघेन समं मन्त्री पुरतः प्रयाणमकरोत्।

५६ सर्वसंवाहनानामर्धपञ्चमसहस्राणि, एकविंशतिशतानि श्वेताम्बराणां, संघतद्रक्षाधिकारे सहस्रं तुरङ्गमाणां, सप्तशती रक्तकरभीणां, संघरक्षाधिकारिणश्चत्वारो महासामन्ताः। इत्थं समग्रसामग्र्या मार्गमतिक्रम्य श्रीपादलिप्तपुरे स्वयं कारितश्रीमहावीरचैत्यालङ्कृतस्य श्रीललितासरसः परिसरे आवासान्दापयामास। तत्र तीर्थाराधनां विधिवद्विधाय मूलप्रासादे काञ्चनकलशं प्रौढजिनयुगलं, श्रीमोढेरपुरावतारे श्रीमन्महावीरचैत्याराधकमूर्ती, देवकुलिकामण्डपश्रेणेरुभयतश्चतुष्किकाद्वयपङ्क्तिं, शकुनिकाविहारे सत्यपुरावतारे चैत्यपुरतो रजतमूल्यं तोरणं, श्रीसंघयोग्यान्मठान्, जामिसंक्रम्य देवकुलिकाः, नन्दीश्वरावतारे प्रासादान् इन्द्रमण्डपं च, तन्मध्ये गजाधिरूढश्रीलवणप्रसादवीरधवलमूर्ती, तुरङ्गाधिरूढां निजमूर्तिं, तत्र सप्त पूर्वपुरुषमूर्तीः सप्त गुरुमूर्तीश्च, तत्सन्निधौ चतुष्किकायां ज्यायोभ्रात्रोर्मल्ल्हं, मालदेवलूणिगयोराराधकमूर्ती, प्रतोलीः, अनुपमासरः, कपर्दियक्षमण्टपतोरणप्रभृतीनि बहूनि जिनधर्मस्थानानि रचयाचक्रे।

५७ तथा नन्दीश्वरकर्मस्थाये कण्टेलीयापाषाणसत्कजातीयषोडशस्तम्भेषु पर्वतात् जलमार्गेणानीयमानेषु समुद्रोपकण्ठे उत्तार्यमाणेषु, एकः स्तम्भः पङ्के मग्नस्तथा यथा निरीक्ष्यमाणोऽपि न लभ्यते। तत्पदेऽपरपाषाणस्तम्भेन प्रासाद· प्रमाणकोटिं नीत । वर्षान्तरे वारिधिवेलावशात्-

* वरण्डशब्दे P १ अत्राधिकं–त्रिशती दिग्वाससा a M K २ कारिते P ३ श्रीललित P श्रीतडीला C ४ धार्मिकमत्यकस्य P ५ नन्दीश्वरप्रासादा. D a ६ मालवदेव P ७ पावकपर्वतात् H K ८ समुद्रकण्ठोपकण्ठे a P

ङ्कनिमग्न स एव स्तम्भ प्रादुरासीत् । सचिवसमादेशात्तस्मिंस्तत्र सचार्यमाणे प्रासादो विदीर्ण इति निवेदितुमागताय परपभापकाय हैमीं जिव्हा स मन्त्री ददौ । दक्षै किमेतदिति पृष्टेऽस्त पर यथाकथचिद्धर्मस्थानानि दृढानि कारयिष्यन्ते यथा युगान्तेऽपि तेषा नान्तो भवति अत पारितोषिकदान । आमूलात्तृतीयवेलायामय प्रासाद समुद्धृतो विजयते ।

६८ श्रीपालिताणके च पौषधशाला विशाला कारयामास । श्रीम दुज्जयन्ते च श्रीसघेन सह प्राप्तो मन्त्री तत्र च तदुपत्यकाया तेजलपूरे कारित नव्य वप्र, तथा तन्मध्ये श्रीमदाशराजविहार तथा कुमारदेवीस रश्च निरुपम विलोक्य, धवलगृहे पादोऽवधार्यतामिति नियुक्तैरच्यमाने, श्रीमद्गुरुणा योग्य पौषधवेश्मास्ति नास्तीति मन्त्रिणादिष्टे तन्निष्पाद्यमान माकर्ण्य विनयातिक्रमभीरुर्गुरुभि सह बहिर्दापितावासे तस्थौ । प्रातरुज्ज यन्तमारुह्य श्रीशैवेयक्रमकमलयुगलमभ्यर्च्य स्वयकारितश्रीशत्रुजया वतारतीर्थे प्रभूतप्रभावना विधाय कल्याणत्रयचैत्यवर्यसपर्यादिभिस्तदु चितीमाचर्य मन्त्री यावत्तृतीये दिनेऽवरोहति तावदुभाभ्या दिनाभ्या निष्पन्ने पौषधौकसि मन्त्रिणा सम गुरवस्तत्र समानीतास्तत्प्रशशसु पारितोषिकदानेनानुजगृहु ।

६९ श्रीमत्पत्तने प्रभासक्षेत्रे चन्द्रप्रभ प्रभावनया प्रणिपत्य यथोचि त्यादभ्यर्च्य च निजेऽष्टापदप्रासादेऽष्टापदकलशमारोप्य तत्रत्यदेयलोकाय दान ददान श्रीहेमाचार्य श्रीकुमारपालनृपतये जगद्विदित श्रीसोमेश्वर प्रत्यक्षीकृत इति पञ्चदशाधिकवर्षशतदेशीयधार्मिकपूजाकारकमुखादाकर्ण्य तच्चरित्रचित्रितमना व्यावृत्तमानो मार्गे लिङ्गोपजीविनाम सदाचारेणान्नदाने निषिद्धे, तत्पराभव विधाय वायडीयश्रीजिनदत्तसूरिभि

१ उपत्यकान्ते C D २ नल्पूरे P जल्पुरे a L ३ गुजगृहे H

निजोपासकपार्श्वात्तस्मिन्क्षणे पूर्यमाणे सति दर्शनानुनयार्थं[1] तत्र समागताय मन्त्रिणे—

३५) रत्नाकर इव क्षारवारिभिः परिपूरणात् ।
गम्भीरिमाणमाधत्ते शासनं लिङ्गधारिभिः ॥ १ ॥

३६) यान् लिङ्गिनोऽनुवदन्ते[2] संविग्ना अपि साधवः ।
तदर्चा चर्च्यते कस्माद्धार्मिकैर्भवभीरुभिः ॥ २ ॥

३७) प्रतिमाधारिणोऽप्येषां त्यजन्ति विषयं पुर ।
लिङ्गिनां विषयस्थानामनर्चा तु विरोधिनी ॥ ३ ॥

३८) लिङ्गोपजीविनां लोके कुर्वन्ति येऽवधीरणाम् ।
दर्शनोच्छेदपापेन लिप्यन्ते ते दुराशया ॥ ४ ॥

आवश्यकवन्दनानिर्युक्तौ—

३९) तित्थयरगुणा पडिमासु नत्थि निस्संसयं वियाणन्तो ।
तित्थयरोवि[3] नमन्तो सो पावई[4] निज्जरं विउलं १

४०) लिङ्गं जिणपन्नत्तं एव नमंसन्ति[5] निज्जरा विउला ।
जइवि गुणप्पहीणं वन्दइ अज्झप्पसुद्धीए ॥ २ ॥[6]

इति तदुपदेशान्निर्मार्जितसम्यक्त्वदर्पणो विशेषाद्दर्शनपूजापरः स्वस्थानमासदत् ।

६० अथ ज्यायसा सोदरेण मं० लुणिगनाम्ना परलोकप्रयाणावसरेऽर्बुदवसहिकायाँ[7] मम योग्या देवकुलिका कारयितव्येति धर्मव्ययं याचित्वा तस्मिन्विपन्ने तद्गोष्ठिकेभ्यस्तद्भूवमलभमानश्चन्द्रावत्याः स्वामिनः पार्श्वान्नव्यां भूमिं विमलवसहिकासमीपेऽभ्यर्थ्य तत्र श्रीलुणिगवसहिप्रासादं भुवनत्रयचैत्यशलाकारूपं कारयामासिवान् । तत्र श्रीनेमिनाथबिम्बं संस्थाप्य प्रतिष्ठितं तद्गुणदोषविचारणाकोविदं श्रीजावालिपुराच्छ्रीयशो-

१ अनुनयार्थे b २ वन्दन्ति C ३ तित्थयरत्ति C ४ पावइ a ५ नमंसुत्ति C ६ आवश्यकनिर्युक्तौ श्लोकद्वयं वर्तते ७ अर्बुदे विमलवसहिकाया H D

वीरमन्त्रिणं समानीय मन्त्री प्रासादस्वरूप पप्रच्छ । ततस्तेन प्रासादकारकसूत्रधार शोभनदेवोऽभ्यधायि । रङ्गमण्डपे शालभञ्जिकामिथुनस्य विशालघाटस्तीर्थंकरप्रासादे सर्वथानुचितो वास्तुनिषिद्धश्च । तथा गर्भगृहे प्रवेशद्वारे सिंहाभ्यां तोरणमिद देवस्य विशेषपूजाविनाशि । तथा पूर्वपुरुषमूर्तियुतगजाना शाला पश्चाद्भागे प्रासादकारापकस्यायतिविनाशि । अप्रतीकारार्हे दूषणत्रय विज्ञस्यापि सूत्रभृतो यदुत्पद्यते स भाविकर्मणो दोप इति निर्णीय यथागत स च गत । तदुपश्लोकनश्लोका एवम्—

४१) यशोवीर यशोमुक्ताराशेरिन्दुरसो शिखा ।
तद्रक्षणाय रक्षाया श्रीकारो लाञ्छनच्छलात् ॥ १ ॥

४२) बिन्दव श्रीयशोवीर शून्यमध्या निरर्थका
सख्यावन्तो विधीयन्ते त्वयैकेन पुरस्कृता ॥ २ ॥

४३) यशोवीर लिखत्याख्या यावच्चन्द्रे विधिस्तव ।
न माति भुवने तावदाद्यमप्यक्षरद्वयम् ॥ ३ ॥

इति श्रीशत्रुञ्जयादितीर्थानां यात्राप्रबन्धाः ।

६१ अथ श्रीवस्तुपालस्य स्तम्भतीर्थे सइदनाम्ना नौवित्तिकेन सम विग्रहे सजायमाने श्रीभृगुपुरा-महासाधनिक शङ्खनामान श्रीवस्तुपाल प्रति कोलिरूपमानीतवान् । स जलधिकूले दत्तनिवासो नगरप्रवेशमार्गान् शत्रुसकीर्णानालोक्य, व्यवहारिणा चित्तानि यानपात्रप्रणयीनि च वीक्ष्य प्रहितैर्बन्दिभि श्रीवस्तुपालेन सम समरवासर निर्णीय, यावच्चतुरङ्गसैन्य सन्नह्यते तावच्छ्रीवस्तुपालेन पुर कृतो गुडजातीयो लूणपालनामा सुभटो यदि शङ्खमन्तरेणाह प्रहरामि तदा कपिला धेनुमेवेति वारवार्णिकापूर्वं क शङ्ख इति तद्वचनादनु शङ्खोऽहमिति प्रतिसुभटेनोदिते त

१ विलासवान् D H २ पुरत C ३ आयविनाशो D ४ बालकालरूप K
५ भवण a लण D

निपात्य पुनरनयैव रीत्या द्वितीयेऽपि पातिते सति कथं समुद्रसामीप्यान् शङ्खबाहुल्यमित्युच्चरन् महासाधनिकशङ्खेनैव तत्सुभटतां श्लाघमानेनाहूतः कुन्ताग्रेण प्रहरन् सतुरग एकेनैव प्रहारेण व्यापादितः । तदनु श्रीवस्तुपालेन समराङ्गणप्रणयिना केसरिकिशोरेण च शङ्खसैन्यं गजयूथमिव त्रासितं दिशो दिशमनशत् । पश्चान्नोवित्तको मारितः सइयद इति । तदनु लूणपालमृत्युस्थाने लूणपालेश्वरप्रासादो मन्त्रिणा कारित. ।

६२ अथान्यस्मिन्नवसरे श्रीसोमेश्वरस्य कवेः काव्यम्—

४४) हंसैर्लब्धप्रशंसैस्तरलितकमलप्रचरङ्गैस्तरङ्गै—
नीरैरन्तर्गभीरैश्चटुलबककुलप्राससर्लानैश्च मीनैः ।
पालीरूढद्रुमालीतलसुखशयितस्त्रीप्रणीतैश्च गीतै-
र्भाति प्रक्रीडदूर्मिस्तव सचिव चलच्चक्रवाकस्तटाकः ॥
श्रीमन्त्रिणा षोडशसहस्रद्रम्माणां दत्तिः प्रसादीकृता ।

६३ कचिच्चिन्तातुरस्य मन्त्रिणो भूमिं मृगयमाणस्य समागतः सोमेश्वरदेवः समयोचितमिदमपाठीत् । तद्यथा—

४५) एकस्त्वं भुवनोपकारक इति श्रुत्वा सतां जल्पितं
लज्जानम्रशिरा' स्थिरातलमिदं यद्वीक्ष्यसे वेद्मि तत् ॥
वाग्देवीवदनारविन्दतिलक श्रीवस्तुपाल स्वयं
पातालाद्बलिमुद्दिधीर्षुरसकृन्मार्गं भवान् मार्गति ॥

मन्त्रिणास्य काव्यस्य पारितोषिकेऽष्टौ सहस्राणि दत्तानि ।

६४ तथा—

४६) त्वचं कर्णः शिबिर्मांसं जीवं जीमूतवाहन. ।
दर्दौ दधीचिरस्थीनि । इति त्रिषु पदेषु पण्डितेष्वधीयमानेषु पण्डितजयदेव' समस्यापूर्त्तिमिव 'वस्तुपालः पुनर्वसु' । इत्युच्चरन् सहस्रचतुष्टयं लेभे ।

---

१ दाक्षि b H २ सहस्रा दानैः प्रसादीकृता D

६५ तथा सूरीणां दर्शनप्रतिलाभनावसरे केनापि दुर्गतद्विजातिना याचनया तन्नियुक्तेभ्यः कृपया पटीमुपलभ्य मन्त्रिणं प्रति समयोचितमूचे।

क्वचित्तूलं क्वचित्सूत्रं कार्पासास्थि क्वचित्क्वचित्।
देव त्वदरिनारीणां कुटीतुल्या पटी मम ॥

तत्पारितोषिके मन्त्रिणा दत्तानि पञ्चदशशतानि ।

६६ तथा बालचन्द्रनाम्ना पण्डितेन श्रीमन्त्रिणं प्रति—

४७) गौरी रागवती त्वयि, त्वयि वृषो बद्धादरस्त्वं युतो
भूत्या, त्वं च लसद्गुणः शुभगणः किं वा बहु ब्रूमहे ।
श्रीमन्त्रीश्वर नूनमीश्वरकलायुक्तस्य ते युज्यते
बालेन्दुश्रियमुच्चकैः रचयितुं त्वत्तोऽपरः कः प्रभुः ॥

इत्युक्ते तस्याचार्यपदस्थापनायां द्रम्मसहस्रं व्ययीकृतं ॥

६७ कदाचिन्म्लेच्छपतेः सुरत्राणस्य गुरुमालिमः मक्कातीर्थयात्रार्थं इह समागतमवगम्य तज्जिघृक्षुभ्यां श्रीलवणप्रसादवीरधवलाभ्यां श्रीतेजःपालमन्त्री मन्त्रं पृष्टः एवमाख्यातवान् ।

४८) धर्मच्छद्मप्रयोगेण या सिद्धिर्वसुधाभुजाम् ।
स्वमातृदेहपण्येन तदिदं द्रविणार्जनम् ॥

इति नीतिशास्त्रोपदेशेन वृकयोरिव तयोः छागमुन्मोच्य पाथेयादिना सत्कृत्य तं तीर्थं प्रति प्रहितवान् । स च कियद्भिर्वर्षैः[2] पश्चाद्व्यावृत्तः श्रीमन्त्रिणा तदुचितनेपथ्यादिभिः सत्कृतः स स्वस्थानं प्राप्तस्तीर्थगुणानां विस्मरन् श्रीसुरत्राणपुरतः श्रीवस्तुपालमेव वर्णयामास । स सुरत्राणस्त-दनन्तरमस्माकं देशे भवानेवाध्यक्षोऽहं तु भवतः सेलभृत् तत्त्वयाहं यत्कृत्यादेशेनैव सर्वदानुग्राह्य इति प्रतिवर्षं तत्प्रहितयमलकपत्रेणोपरुध्यमानः श्रीमन्त्रीशः श्रीशत्रुञ्जयभूमिगृहयोग्यं श्रीयुगादिजिनबिम्बं धन्यं मन्य-

१ मक्का २ दिनैः b D ३ सर्वथा C

मानस्य सुरत्राणस्यानुज्ञया तद्देशवर्तिन्या मुम्माणीनाम्न्याः खन्याः प्रयत्नशतैरानीतवान् । तस्मिन्नप्यारोहति श्रीमूलनायकस्यामर्षात्पर्वते विद्युत्पात समजनि । ततः प्रभृति श्रीमन्त्रीश्वरस्याजीवितान्त श्रीदेवपादैर्दर्शन न ददे ।

६८ कस्मिंश्चित्पर्वणि श्रीमदनुपमया निरुपमे मुनीनामन्नदाने यदृच्छया दीयमाने कार्यौत्सुक्यात्तदागतः श्रीवीरधवलदेव. सिताम्बरदर्शिनं[2] द्वारप्रदेशे पाणिंधममालोक्य विस्मयस्मेरमानसो मन्त्रिणमभीहितवान् । हे मन्त्रिण ! इत्थ सदैवाभिमतदैवतवत् किममी न सत्क्रियन्ते । तव चेदशक्तिस्तदर्धभागो ममास्तु । मामकमेव सर्व वा दीयतां सदैवेत्यत. कारणान्नोच्यते तथा कृते भवतो वृथायास एव स्यादिति तन्मुखचन्द्रविनिर्गतैर्गोभिर्निर्वाणोपताप स्वामिन क्रियानर्धविभाग' सर्वमेव भवदीयमेवेत्युक्त्वा पटीं न्युञ्छनीचक्रे ।

६९ अन्यदा यतिदानावसरे मिथो मुनिजनसंमर्दात् श्रीमदनुपमाया प्रणमत्याः प्राज्याज्यसंपूर्णं घृतपात्र पृष्टे पतितमालोक्य कुपितं तेजःपालमन्त्रिणमिति सान्त्वितवती, यत्तव स्वामिन प्रसादात्मुनिजनपुण्यपात्रपतितैराज्यैरङ्गाभ्यङ्गो भवतीति तत्पूणदानविधिचमत्कृतो मन्त्री पञ्चाङ्गप्रसादपूर्व—

४९) *दानं प्रियवाक्सहित ज्ञानमगर्वं क्षमान्वित शौर्यम् ।
त्यागसहितं च वित्त दुर्लभमेतच्चतुर्भद्रम् ॥

इति युक्तोक्तिपूर्वं च ता मन्त्री प्रशशास । इत्यनेकधा दानावदातनिकषरेखा प्राप्ता ।

५०) लक्ष्मीश्चला शिवा चण्डी शची सापत्न्यदूषिता ।
गङ्गा न्यग्गामिनी वाणी वाक्साराऽनुपमा ततः ॥

---

१ उम्माणी P　२ दर्शनेन a K　* बौद्धेन विमलाचार्येण कृतोऽय श्लोक प्रश्नोत्तररत्नमालाया वर्तते तस्मान्नारायणेन गृहीत्वा स्वग्रन्थ हितोपदेश स्थापित, तस्मादनेनेति पूर्वसपादक

इत्यादिभि स्तुतिभिर्जैनाचार्ये स्तूयते स्म ॥

७० अथान्यदा पञ्चग्रामसङ्ग्रामाधिरूढयो श्रीवीरधवललवणप्रसादयो श्रीवीरधवलपत्नी राज्ञी जयतलदेवी सन्धिविधानहेतवे जनक प्रति श्रीशोभनदेवमुपागता। किं वैधव्याद्भीरु सन्धिबन्ध कारयसीति तेना भिहिता। वीरचूडामणे पत्यु श्रीवीरधवलस्योन्नतिमारोपयन्ती सा पितृकुलविनाशशङ्कया भूयो भूयोऽहमेव व्याहरामि। तुरगपृष्ठाधिरूढे तस्मिन्वीरधवले स कोऽस्ति सुभटो यस्तत्सम्मुखे स्थास्यतीति व्याहृत्य सामर्षैव प्रतस्थे। अथ तस्मिन्समरसरम्भे प्रहारव्यथाव्याकुले श्रीवीरधवले भुवस्तलमलकुर्वति।

५१) य पञ्चग्रामसङ्ग्रामभूमौ भीमपराक्रम।
घातै पपात सजातैरक्षतो न तु गर्वत ॥

इति किञ्चिदन्तर्भग्ने समरसुभटवर्गे एक एवाय पत्ति पतित इति सकल निजबलमुत्साहयन् श्रीलवणप्रसाद समस्तानपि रिपून् लीलयैव समूलकाष कषितवान्। इत्थमेकविंशतिकृत्व सत्त्वगुणरोचिष्णू रणरसिकतया क्षेत्रे पितुरग्रे पतित ॥

७१ अथ वीरधवलस्यायु पर्यन्ते, प्रति तीर्थं प्रस्थितेन दत्तमेकधा सहस्रगुणमुपलभ्यत इति रूढे श्रीतेजपालेन जन्मसुकृत ददे। तदनु तस्मिन् स्वामिनि विपन्ने तत्सौभाग्यातिशयात्सेवकाना विंशत्यधिकशतेन सहगमन चक्रे। तदनु श्रीतेजपालेन प्रेतवने यामिकान्मुक्त्वा लोकस्य स निर्बन्धो निषिद्ध।

५२) आयान्ति यान्ति च परे ऋतव क्रमेण
सजातमेतदृतुयुग्ममगत्वर तु।
वीरेण वीरधवलेन विना जनाना
वर्षा विलोचनयुगे हृदये निदाघ ॥

१ प्रतिहारश्री a २ प्रस्थितस्य a K C D ३ जनस्य C ४ अशीत्यधिक M

अथ श्रीमन्त्रिणा वीरधवलस्य सुतो वीसलदेवो राज्येऽभिषिक्त ।

७२ श्रीअनुपमादेव्या विपत्तौ तेज पालारूढशोकग्रन्थावनिवर्तमानाया तत्रागते श्रीविजयसेनसूरिभिर्वल्लवत्पुरुषैरुपशमिताया विपदि किञ्चिचेतनया सापत्रप श्रीतेज पाल सूरिणोचे । वयमस्मिन्नप्यवसरे भवत्कैतवमालोकितुमुपेता । श्रीवस्तुपालेन किमेतदिति पृष्ठा गुरव प्राहु । यदस्माभि शिशोस्तेज पालस्योपयामाय धरणिगपार्श्वादनुपमा कन्या याचिता तदा स्थिरता कृता । तदनु तस्या कन्याया एकान्तविरूपतां निशम्य तत्सबन्धभङ्गाय चन्द्रप्रभजिनप्रतिष्ठितक्षेत्राधिपतेरष्टौ द्रम्माणा भोगमुपायनीचक्रे । इदानीं तद्वियोगग्रन्थेरामनस्यमित्युभयोर्वृत्तान्तयो कस्तथ्य इति तन्मूलसकेताच्छ्रीतेज पाल स्वहृदय दृढीचक्रे ॥

७३ अथान्यदावसरे मन्त्री वस्तुपाल पूर्णायु श्रीशत्रुञ्जय यियासुरिति मत्वा पुरोधा सोमेश्वरदेवस्तत्रागतोऽनर्घ्येष्वप्यासनेषु मुच्यमानेष्वऽनुपविशन् हेतु पृष्ट इत्याह—

९३) अन्नदानै पय पानैर्धर्मस्थानैर्धरातलम् ।
यशसा वस्तुपालेन रुद्धमाकाशमण्डलम् ॥

इति स्थानाभावान्नोपविश्यते इति तदुक्तेरुचितपारितोषिकदानपूर्व तमापृच्छ्य मन्त्री पथि प्रस्थित ।

७४ अर्कवालीयाग्रामे देशकुट्या दर्भसस्तरगारूढो गुरुभिराराधना कार्यमाण आहारपरिहारपूर्व पर्यन्ताराधनया प्रध्वसितकलिमलो युगादिदेवमेव जपन् ।

९४) सुकृत न कृत किञ्चित्सतां सस्मरणोचितम् ।
मनोरथैकसाराणामेवमेव गत वय ॥

---

१ ग्रन्थेऽनिवर्तमाने c D H २ आलोकयितु D ३ स्थिरपन्नदानादनु C H ४ चन्द्रप्रभभिडे a K H M ५ भागमपि याचितीचक्रे a L ६ च भूतल a

इति वाक्यप्रान्ते नमोऽर्हद्भ्य इत्यक्षरैः समं परिहृत्यं[1] सप्तधातुबद्धं शरीरं स्वकृतफलमुपभोक्तुं स्वर्लोकमलंचकार । तत्संस्कारस्थानेऽनुजश्रीतेजःपालसुतजैत्रसिंहाभ्यां श्रीयुगादिदेवदीक्षावस्थामूर्तिनालङ्कृतस्वर्गारोहणप्रासादोऽकारि ।

९९) अद्य मे फलवती पितुराशा
मातुराशिषशिखाङ्कुरिताद्य ।
यद्युगादिजिनयात्रिकलोकं
प्रीणयाम्यहमशेषमखिन्नः ॥ १ ॥

९६) नृपव्यापारपापेभ्यः सुकृतं स्वीकृतं न यैः ।
तान्धूलिधावकेभ्योऽपि मन्येऽधमतरान्नरान् ॥ २ ॥

इत्यादीनि श्रीवस्तुपालमहाकवेः काव्यानि स्वयं कृतान्यमूनि ॥

९७) पूर्णः स्वामिगुणैः स वीरधवलो निर्मानं[2] एव प्रभु-
र्विद्वद्भिः कृतभोजराजविरुदः श्रीवस्तुपालः कविः ।
तेजःपाल इति प्रधाननिवहेष्वेकश्च मन्त्रीश्वर-
स्तज्जायानुपमागुणैरनुपमा प्रत्यक्षलक्ष्मीरभूत् ॥

इति श्रीमेरुतुङ्गाचार्यावि कृते प्रबन्धचिन्तामणौ श्रीकुमारपालमन्त्रीश्वरवस्तुपालतेजःपालपर्यन्तमहापुरुषयशोवर्णनो नाम चतुर्थः प्रकाशः ॥

---

१ परिहृत P २ निःसीमः C

श्रीः

प्रबन्धचिन्तामणिः।

पञ्चमः प्रकाशः

प्रकीर्णकप्रबन्धाः।

अथ पूर्वोक्तेभ्यो महापुरुषचरितेभ्यो यान्यवशिष्टानि तानि तदितराणि चेह प्रकीर्णकप्रबन्धे प्रारभ्यन्ते। तद्यथा—

१ समीपस्फुरच्छिप्राश्रवन्त्यामवन्त्यां पुरि पुरा श्रीविक्रमार्कनृपः, सत्रागारे वैदेशिकं लोकं भोजनानन्तरं निद्रापरं संपन्नदीर्घनिद्रमाकर्ण्य विस्मयस्मेरमानसस्तद्वृत्तान्तं जिज्ञासुस्तान् सर्वानपि वसनपिहितान्विधाप्य तद्वार्तां चापन्हुतां निजाज्ञया विधाय पुनरुपागतानध्वगांस्तथैव भोजयित्वा प्रदोषे चोष्णोदकं तैलं च तेषां चरणपरिचरणनिमित्तमुपनीय तेषु तेषु प्रसुप्तेषु महानिशायां कृपाणपाणिर्नृपतिर्निभृतीभूय स्वयं यावत्तस्थौ तावदकस्मात्तत्र कोणैकदेशे प्रथमं तावद्धूमोद्गमं तदनु शिखारेखामथ दीप्तफणारत्नप्रभालङ्कृतं सहस्रफणं नागं निर्गतमवलोक्य तच्चित्रचमत्कृतो राजा यावत्साकूतं पश्यति तावत्स फणीन्द्रः किं पात्रमिति तद्दिनसुप्तान् पान्थान् प्रत्येकं पप्रच्छ। अथ ते धर्मपात्रं गुणपात्रं तपःपात्रं रूपपात्रं कामपात्रं कीर्त्तिपात्रमित्यादीनि वदन्तोऽज्ञानतया यदृच्छया तस्य शापान्मृत्युमश्नुवन्तीति विलोक्याऽथ श्रीविक्रम एव तत्पुरोभूय योजिताञ्जलिः—

१) भोगीन्द्र बहुधा पात्रं गुणयोगाद्भवेद्भुवि।
मनःपात्रं तु परमं शुद्धं श्रद्धापवित्रितम्॥

---

१ श्रीवत्या a २ रत्नफणा P ३ सहस्रफणालङ्कृत सहस्रफणं P ४ शुद्धश्रद्धा a

वक्तया नवाङ्गवृत्तिकारश्रीअभयदेवसूरिभिः प्रकटीकृतश्रीस्तम्भनकस्य तीर्थस्य विशेषोन्नत्यै श्रीसङ्घेन चिन्तायिकत्वे नियोजितः । इति मल्लवादिप्रबन्धः*

८ अथ मरुमण्डले पल्लीग्रामे काकूपाताकौ भ्रातरौ निवसतस्तयोः कनीयान्धनवान् ज्यायांस्तु तद्गृहभृत्यवृत्त्या वर्तते । कस्मिंश्चिन्निशीथसमये दिवसकर्मवृत्तिश्रान्तः प्रावृट्काले काकूः प्रसुप्तः कनीयसाभिदधे । भ्रातः स्वकीयकेदाराः पयःपूरैः स्फुटितसेतवस्तव तु निश्चिन्ततेत्युपालब्धः स तदा त्यक्तशय्यास्तरः स्वं निन्दन् कुद्दालं स्कन्धे निवेश्य यावत्तत्र याति, तावत्कर्मकरान् स्फुटितसेतुबन्धरचनापरान्समालोक्य के यूयमिति पृष्टा भवद्भ्रातुः कामुका इत्यभिहिते, क्वापि मदीयाः कामुकाः सन्तीति पृष्टे वलभ्यां सन्तीति ते प्राहुः । अथ सोऽप्यवसरे सर्वस्वं पिठरे आरोप्य तं मूर्ध्नि दधानःश्रीवलभीमवाप्य गोपुरसमीपवर्तिनामाभीराणां समीपेऽवसत् । अत्यन्तकृशतया ते रङ्क इति दत्ताभिधानस्तार्णमुटजं विधाय तदवष्टम्भेन यावत्तस्थौ, तावत्कश्चित्कार्पटिकः कल्पपुस्तकप्रमाणेन रैवतकशैलादलाबुना सिद्धरसमादाय मार्गमतिक्रामन् काकूयतुम्बडीत्यशरीरिणीं वाणीमाकर्ण्य विस्मयस्मेरमना जातभीर्वलभीपरिसरे तस्य छद्मनो वणिजः सद्मनि रङ्क इति तन्नामतो निःशङ्कतया तत्सरसमलाबु तत्रोपनिधीचक्रे । स स्वयं श्रीसोमेश्वरयात्रायां गतः । कस्मिन्नपि पर्वणि पाकविशेषाय चुल्हीनियोजितायां तापिकायामलाबुरन्ध्राद्गलितरसबिन्दुना हिरण्मयीं तां निभाल्य स वणिग् तं सिद्धरसं चेतसा निर्णीय तदलाबुसहितगृहसर्वस्वमन्यत्र नियोज्य स्वगृहं प्रदीपकेन भस्मीकृत्य परस्मिन् गोपुरे सौधं निर्माप्य तत्र निवसन्, कदाचित्साज्याज्यविक्रयकारिण्याः स स्वयं घृतं

१ नवाङ्गवृत्तिकारश्चाभय. देवसूरिभि॰ प्रगटीकृत श्री c
* मल्लवादिप्रबन्धः प्रभावकचरिते चतुर्विंशति प्रबन्धे च वर्तते ।
२ काकूभाक a D ३ अथ सोपि सर्वस्वमारोपित H ४ सन्निधौ नि[illegible]
५ काक्तुम्बडीति सिद्धरसात् c ६ कारिण्या c

तोलयंस्तदक्षयं निरीक्ष्य श्रुतपात्राध' कृष्णचित्रककुण्डलिकां विमृश्य केनापि कैतवेन तद्व्यत्ययादपहृत्य चित्रकसिद्धिं स्वीचकार । कदाचित्तस्यागण्यपुण्यवैभववशात्सुवर्णपुरुषसिद्धिरजायत । इत्थं त्रिविधसिद्धया कोटिसंख्याभिधानानि धनानि संगृह्यापि कदर्यवर्यतया क्वापि सत्पात्रे तीर्थे वानुकम्पया वा तस्याः श्रियो न्यासो दूरे तिष्ठतु प्रत्युत सकललोकसंजिहीर्षया तां लक्ष्मीं सकलस्य विश्वस्य कालरात्रिरूपामदर्शयत् । अथ स्वसुताया रत्नखचितकङ्कतिकायां, राज्ञा स्वसुताया' कृते प्रसभमपहृताया तद्विरोधानुरोधात्स्वयं म्लेच्छमण्डले गत्वा वलभीभङ्गाय तद्याचितकाञ्चनकोटीरस्मै समर्प्य प्रयाणमचीकरत् । तदनुपकृतस्तु, एकः छत्रधरः निशाशेषे सुप्तजाग्रदवस्थेऽवनीपतौ पूर्वसङ्केतितेन केनापि पुंसा समभित्यालापमकरोत । अस्मत्स्वामिना मन्त्रेऽमूर्खे कोऽपि नहि यदयमश्वपतिमहीमहेन्द्र' केनाप्यज्ञातकुलशीलेनासाधुना साधुना वापि वणिजा नामकर्मभ्यां रङ्केन प्रेरित सूर्यपुत्रं शिलादित्यं प्रति यच्चालेति पथ्यां तथ्यां तद्वाचमाकर्ण्य किञ्चिच्चेतसि विचिन्तयन् तस्मिन्नहनि नृपः प्रयाणविलम्बमकरोत् । अथ रङ्क साशङ्कस्तद्वृत्तान्तं निपुणवृत्त्यावगम्य काञ्चनदानेन तस्य काञ्चनतृप्तिमासूत्र्य पुन परस्मिन्प्रत्यूषे विचार्याविचार्य वा कृतप्रयाणोऽयं महानरेन्द्रश्चलित । सिंहस्यैकपदं यथेति न्यायाच्चलित एव राजते । यत —

१) मृगेन्द्र वा मृगारिं वा हरिं व्याहरतां जनं ।
तस्य चोभयथा व्रीडा लीलादलितदन्तिन' ॥

इत्यस्य स्वामिनो नि सीमपराक्रमस्य सम्मुखे कः स्थास्यतीति तद्गिरा प्रोत्साहवान् म्लेच्छपतिर्भेरीनिनादबधिरितरोदःकन्दर प्रयाण-

१ अक्षीण c २ कङ्कतिकाया स्वसुताकृते प्रसभमुपहृताया c ३ तद्याचिता काञ्चनकोटी...स्य नृपकोटीरस्य H b ४ एकच्छत्रधरो a ५ निशासौधे सुप्तजाग्रदवस्थे पृथिवीपतौ c ६ मुख्योऽपि नहि b D H ७ जना. L D

मकरोत् । इतश्च तस्मिन्वासरे वलभ्या श्रीचन्द्रप्रभबिम्बमम्बाक्षेत्रपालाभ्यां सहितमधिष्ठातृबलाद्गगनमार्गेण शिवपत्तनभुवि भूषणीबभूव । रथाधिरूढा श्रीवर्धमानप्रतिमा चाटष्टवृत्त्याधिष्ठातृबलेन सचरन्ती आश्विनपूर्णिमाया श्रीमालपुरमलचकार । अन्या अपि सातिशया देवमूर्तयो यथोचित भूभागमलचक्रु । तत्पुर्देवतया च श्रीवर्धमानसूरीणा चोत्पातज्ञापनावसरे—

२) का त्व सुन्दरि जल्प देविसदृशे कि कारण रोदिषि
भङ्ग श्रीवलभीपुरस्य भगवन् पश्याम्यह प्रत्ययम् ।
भिक्षाया रुधिर भविष्यति पयो लब्ध भवत्साधुभि
स्थातव्य मुनिभिस्तदेव रुधिर यस्मिन्पयो जायते ॥

एवमुत्पातेषु सजायमानेषु, पुरीपरिसरप्रान्तेषु म्लेच्छसैन्येषु, देशभङ्गसमासादितपङ्केन रङ्केन पञ्चशब्दवादकान् कनकवितरणैर्बहुधा विभेद्य तस्य हयस्यारोहणकाल एव ते क्रियमाणे प्रतिशब्दसाराविणे, ताक्ष्यवदुड्डीय तस्मिंस्ताक्ष्ये दिवमुत्पतति किं कर्तव्यतामूढः स शिलादित्यस्तैर्निजघ्ने । तदनु तैर्लीलयैव वलभीभङ्ग सूत्रित ॥

३) *पणसयरीचासाइ तिन्निसयाइ अइक्कमे ऊण ।
विक्कमकालाउ तउ वलहीभङ्गो समुप्पन्नो ॥

इति श्रीशिलादित्यराज्ञ उत्पत्तिस्तथा रङ्कोत्पत्तिस्तत्कृतो वलभीभङ्गश्चेति प्रबन्धत्रयम् ।

६ अथ श्रीरत्नमालनगरे श्रीरत्नशेखरो नाम राजा स कदाचिद्दि-

---

१ देवसदृशे c D २ प्रत्यय a ३ विबोध्य D * जिनप्रभसूरिकृततीर्थकल्पे सत्यपुरकल्पे प ३७ तु । तेण सन्नेण विक्कमाउ अठहिं सएहिं पणयालेहि वरिसाण गएहिं भञ्जिऊण सो राया मारिउं । गउं सट्टाण हम्मीरो । तउं अन्नो गज्जणवई गुज्जर भञ्जित्ता तवो वलन्तो पत्तो सच्चउरे [तेन सैन्येन विक्रमात् अष्टसि शतै पञ्चाशद्भि वर्षाणा गतै [वलभी] भड्क्त्वा स राजा मारित गत स्वस्थान हम्मीर । ततोऽन्य गज्जणपति गूजर भड्क्त्वा ततो वलन् प्राप्त सत्यपुरे) ४ वाससय a ५ व्यवहारिकाकूल्पात्ति D ६ समासिमफणीत् c

ग्यात्रायाः प्रत्यावृत्तः पुरप्रवेशमहोत्सवे विपणिश्रेणिं शृङ्गारितां मृगयमाणः कस्मिन्नपि हट्टे काष्ठपात्रीयुतं कुद्दालमालोक्य सौधप्रवेशानन्तरं प्राभृतपाणौ महाजने समायाते, सुखिनो यूयमिति नृपालापानन्तरं तैर्न सुखिनो वयमिति विज्ञप्ते विश्रमश्रान्तस्तान्विसृज्य कस्मिन्नपि निर्जनावसरे पुरप्रधानानाहूय किं न सुखिनो यूयमिति पृष्टे अपि च काष्ठपात्रीयुतकुद्दालस्योर्ध्वीकरणकारणमनुयुक्तास्ते इति विज्ञपयामासुः ।

यत्र स्वामिना काष्ठपात्र्यामेकमेवमवधारितं, स वित्तेश्वरः स्ववित्तसंख्यामजानन् काष्ठपात्रिकै स्ववित्तसकलनां ज्ञापयितुं संकेतश्चक्रे । तथा च न सुखिनो वयमिति स्वामिन संतानाभावात् । कोटीध्वजकुलाकुलं नगरमिद स्वामिना चिरकाललालितमन्वयाभावात्केन परांकोटीं नीयत इति पुरातनस्यान्त.पुरस्य वन्ध्यत्वं बुद्ध्या निर्ध्याय नृपवंशवृद्धये नौतनमन्त पुरं चिकीर्षव स्वामिनोऽनुमत्या पुण्यार्कदिने केनापि प्रधानशाकुनिकेन समं शकुनागारं प्रापाम । कामपि दुर्गतानितम्बिनीमासन्नप्रसवां काष्ठभारवाहनैकवृत्तिं शिरोधिरूढदुर्गामालोक्य शकुनविचामक्षतादिभिः पुनरभ्यर्चयन् . तै किमेतदिति पृष्ट प्राह । यः कश्चिदाधाने पुत्रः स एवात्र नृपो भावी चेद्बृहस्पतिमतं प्रमाणमित्यसंभाव्यं वृत्तान्तमनुमन्यमानाः मनोवृत्तार्थं नृपाय व्याघुटय यथावस्थितं तत्स्वरूपं निवेदितवन्त । अथ खेदमेदुरमना नृप आप्तपुरुषैस्तां गर्तापूरीकर्तुं प्रारभ्यमाणामिष्टं दैवतं स्मरेत्यभिहिते सा मरणभयव्याकुला प्रदोषकाले यावत्ताननुज्ञाप्य शङ्काभङ्गं कुरुते तावत्सा प्रासूत पुत्रं । तं तत्र परित्यज्य पुनरुपागतां गर्तापूरीकृत्य पुनरपि राज्ञे विज्ञपयाचक्रु । अथ काचिन्मृगी संध्याद्वयेऽपि पय पानं कारयन्ती तमनुदिनं वृद्धिमन्तं कारयामास । तस्मिन्नवसरे देव्या महालक्ष्म्या पुरतः टङ्कशालाया हिरण्याश्चतुर्णां

१ तावद्विसृज्य P २ अभ्यर्जनावसाने a ३ पात्र्यादिकं H D b K ४ निधाय P ५ नौतनं पुरं a ६ अभ्यचर्यंत a o ७ मानोवृत्तये P ८ टङ्कशालायाः o

पादानामध शिशुरूप नाणक नूतन सजायमानमाकर्ण्य च चित्रवीनो नृप उत्पन्न इति प्रसृतवार्तया श्रीरत्नशेखर सैन्यानि प्रतिदिश त शिशु विशसितु प्राहिणोत् । तैर्यत्र तत्रावलोक्य लब्धोऽपि बालहत्याभीतै स मार्गे पुरगोपुरे गोकुलखुररवैर्व्यथाय बालो विपन्न सन्स्वयमपवादाय न भवतीति दूरस्थैस्तैर्यावन्मुक्तस्तावत्तत्रायात गोकुल त मूर्तिमन्त पुण्य-पुञ्जमिव बालमालोक्य तैरेव पदे स्तम्भितमिव तस्थौ । अथ पाश्चात्य-पक्षात्पुरोभूय वृषभो वृषभासुर त शिशु पदानामन्तराले निधाय गोधन सकलमपि प्रेरयामास । अथ त वृत्तान्त नृपोऽवधार्य नै सामन्तनगर लोकैर्विज्ञप्तश्च त बालमानीय पुत्रीयमाण श्रीपुञ्ज इति दत्ताभिधान प्रवर्धयामास ।

७ अथ श्रीरत्नशेखरे राज्ञि दिव गते तस्य राज्ञ कृताभिषेकस्य साम्राज्य पालयत. पुत्री समजनि सा च सपूर्णसर्वाङ्गावयवसुन्दरापि कपिमुखी, तेन वैराग्येण विषयविमुखता बिभ्राणा श्रीमातेति नामधेय बभार । सा कदाचिज्जातजातिस्मृति पितुरग्रे स्व पूर्वभव निवेदितवती, यदहमर्बुदाद्रौ पुरा कपिपत्नीत्वमनुभवन्ती कस्यापि शाखिन एकस्या शाखाया शाखान्तर सचरन्ती केनापि तदतुल्येन शिल्पेनं विद्धतालु: पञ्चत्वमासदम् । तदधोवर्तिनि कामिततीर्थकुण्डे यावद्वर्त्तित वपु पपात तावत्तीर्थातिशयान्मामक वपुर्मानुषाकारमभवद् यन्मस्तक तु तत्तथैवास्ते तेनाह कपिवदना । अथ श्रीपुञ्जनृपस्तस्यास्तन्मस्तक कुण्डे क्षेपयितु निजान्पुरुषान्समादिदेश । तैस्तु सुचिराच्चतदवस्थ विलोक्य तथाकृते सा श्रीमाता मानवानना समजनि । तत प्रभृति सा मातरपितगवनुज्ञाप्या-ऽर्बुदसख्यगुणा तस्मिन्नेवार्बुदे तपस्यन्ती, कदाचिद्गगनगामिना योगिना ददृशे । स च तत्सौन्दर्यापहृतहृदयो गगनादुत्तीर्य प्रेमालापपूर्वक स्व

१ सम तमपरत P २ शल्येन H ३ एतादृशकुण्डस्य कथाकोषेऽपि वर्णनमास्ति ४ गलिचा १ ५ आप्तपुरुषान् १ b H K ६ तत्र च तदवस्थ c

मां कथं न वृणोपीति पप्रच्छ । सेत्यवादीत् । साम्प्रतं तावत्क्षणदायाः प्रथमयामो व्यतीतस्तूर्ययामस्य ताम्रचूडेषु स्तमकुर्वाणेषु यद्यस्मिन्नगे कयाचिद्विधया द्वादश पद्याः कारयसि ततो भवन्तमभीष्टं करोमीति तदुक्तिसमनन्तरमेव तत्र कर्मणि चेटकपेटकं नियोज्य यामद्वयेन निर्मापिते सर्वपद्यानिवहे श्रीमाता स्वशक्तिवैभवेन कृतकं ताम्रचूडारवं कारयन्ती तेनागत्य विवाहाय सज्जीभवेत्यभिदधे । तव पद्याया निष्पाद्यमानायाः कुक्कुटरवः समजनिष्टेति तयोक्ते भवन्मायया कृतकं कृकवाकुरवं को न वेत्तीत्युत्तरं ददान सरित्तीरे तज्जाम्योपढौकितविवाहोपहाराः श्रीमात्रा समस्तविद्यामूलं तत्रिशूलमिहैव विहाय पाणिपीडनाय सन्निहितो भवेत्याहूय, प्रेमापद्दतचित्ततया तत्तथा कृत्वा सामीप्यमुपागतः तत्पदयोः कृतकान् शुनो नियोज्य हृदये तेन त्रिशूलेनाहत्य मारितः । इत्थं निःसीमशीललीलायितेन स्वजन्मातिवाहितवती । तस्यामखण्डशीलायां व्यतीतायां श्रीपुञ्जराजा तत्र शिखरबन्धरहितं प्रासादमकारयत् । यतः षण्मासान्ते तस्य गिरेरधोभागवर्ती अर्बुदनामा नागो यदा चलति तदा पर्वतकम्पो भवति । अतः शिखररहितास्तत्र सर्वेऽपि प्रासादाः । इति श्रीपुञ्जराजा तत्पुत्रीश्रीमाता तत्प्रबन्धः ।

८ कदाचिद्गौडदेशे गोवर्धनो नाम राजाभूत् तद्दायःस्तम्भे निबद्धा सभामण्डपपुरतो न्यायिना हन्यमाना न्यायघण्टा निनदति । अन्यदा तस्यैकसूनोः कुमारेण रथारूढेन पथि संचरताज्ञानवृत्त्या कश्चिद्वत्सतरो व्यापादितस्तन्माता सौरभेयी नयनाभ्यामजस्रमश्रूणि वर्षन्ती स्वपराभवप्रतीकाराय शृङ्गाग्रेण न्यायघण्टामवीवदत्तद्घण्टाटङ्कारं नृपो निशम्यार्जुनकीर्तिस्तमर्जुनोवृत्तान्तं मूलतोऽवगम्य निजं न्यायं परां कोटिमारोपयितुं प्रातःस्वयं स्यन्दने निविश्य प्रियपुत्रोऽपि तमेकमेव पुत्रं पथि नियोज्य तदुपरि तां धेनुं साक्षात्कृत्य रथं भ्रामयामास । तस्य भूभुजः

१ वृषा a २ पद्यां दृषा b H ३ स्तम्भनिबद्धा c

सत्त्वेन तस्य सुतस्य भूयसा भाग्यवैभवेन रथस्य रथाङ्गे समुद्धृते स कुमारो न विपन्नः। इति गोवर्धननृपप्रबन्धः* ॥

९ अथ कान्त्यां पुरि पुरा पुराणनृपतिश्चिरं राज्यं निर्गर्वः कुर्वन् कदाचिन्मतिसागराभिधानेन प्रियसुहृदा महामात्येनाऽनुगम्यमानो राजपाटिकायां व्रजन् विपर्यस्ताभ्यस्तेन[१] तुरङ्गेण नृपेऽपह्रियमाणे, चतुरङ्गचमूचक्रे क्रमेण दवीयसि संजायमानेऽप्यतिजवे जवनेऽधिरूढः तदानुपदिकः कियत्यपि भूभागे उल्लङ्घिते सति मार्गोल्लङ्घनपरिश्रमादत्यन्तसुकुमारतया रुधिरपूरितत्वाद्विपन्ने नृपतौ, कृतानन्तरकृत्यस्तुरङ्गमं तद्वेषं च सहादाय प्रदोषसमये पुरं प्रविशन् राज्यस्यानुसन्धानचिकीः श्रीमालभूपाल[२]भयात्कमपि नृपतेः सवयसं सरूपं च कुलालमालोक्य तं तद्वेषार्पणपूर्वकं तुरगेऽधिरोप्य सौधप्रवेशानन्तरं देव्यै तं व्यतिकरं निवेद्य सचिवेन पुण्यसार इति नाम विधाय स एव नृपतीचक्रे। इत्थं कियत्यपि गते काले स सचिवश्चमूसमूहवृतः प्रतिनृपतिं प्रति प्रतिष्ठासुः स्वप्रतिहस्तकप्रायं कमपि प्रधानपुरुषं नृपतिसेवाकृते निवेद्य स्वयं देशान्तरविहारमकरोत्। अथ स पृथिवीपतिर्निरङ्कुशो वश्यापतिरिव[३] स्वैरविहारी तदनन्तरं पुरकुम्भकारान्समस्तानाहूय मृन्मयान् हयान् करिकलभकरभादींश्च निर्माय तैःसमं चिरं चिक्रीड। एवं स्थिते समस्तराजलोकस्यावहेलनां नृपतेर्निशम्य तत स्कन्धावारात् सचिवोऽल्पपरिच्छदो नृपमुपेत्येत्यवादीत्। यस्त्वमिदानीमेव विस्मृतकारुभावः स्वभावचलाचलतया[४] यदि कामपि मर्यादां न मन्यसे तदा त्वां निर्विषयीकृत्य कमप्यपरं कुलालबालं भूपालं करिष्यामीति तदुक्तिक्रुद्धः स नृपः सभायामुपांशुभूमौ कोऽत्र भोः, इति व्याहृतिसमनन्तरमेव सजीवभूतैश्चित्रपदातिभिः स सचिवः सन्दानितः।

---

* अयं गोवर्धननृपप्रबन्धः पुस्तकान्तरे नोपलभ्यते इति डा. भाउदाजीना स्वपुस्तके लिखितम्। १ विपर्यस्तध्वस्तेन a P विपर्यस्तायस्तेन b c २ सीमाल L ३ वशापतिरिव H D वेश्यापतिरिव P ४ चलाचलतया a

तदसभाव्य महदाश्चर्यं विमृश्य तत्प्रभुप्रभावाविर्भावचमत्कृतचित्तस्तत्पदयोर्निपत्य स्वं मोचयितुमत्यर्थं समभ्यर्थयन् नृपेण तथा कारिते स सभक्तिकं विज्ञपयामास । भवत साम्राज्यदाने निमित्तमात्रोऽहं तव प्रभावादालेख्यरूपाणि सचेतनीभूयेत्थं निदेशवशवदानि भवन्ति तत्र प्राक्कृतान्येव कर्माणि कारणमत एव भवान्पुण्यसार इति सान्वयनामा ॥ इति पुण्यसारप्रबन्धः* ।

१० अथ पुरा कुसुमपुरे नन्दिवर्धननामा राजकुमार छत्रधरेण सम देशान्तरविलोकनकुतकी पितरावनापृच्छय यदृच्छया गच्छन् प्रत्यूषकाले क्वापि पुरे प्राप्तस्तत्राऽपुत्रिणि नृपतौ पञ्चत्वमुपागते सति सचिवैरभिषिक्त पट्टहस्ती निखिलेऽपि नगरे यदृच्छया बभ्राम । तत्रागतनृपकुमारमासन्नमपि तु स्वप्नमिव विस्मृत्य पर छत्रधरमभ्यषिञ्चत् । स च तत्प्रधानैर्महता महोत्सवेन पुर प्रवेश्यमानो राजा कुमारमपि तथैव महत्या प्रतिपत्त्या सह गृहीत्वा सौध गत । अह राजलोकस्वामी त्व तु ममेत्युचितैरुपचारवचनैस्तमनवरतमेवमाराराध । स तु राजा राजगुणानामनर्हो निरवधिदुर्मेधा वर्णाश्रमपालनानभिज्ञो यथायथा प्रजापीडनपर साम्राज्य कुरुते तथा तथा पशुपतिमूर्ध्नि विधृतराजेव स कुमार प्रतिदिन हीयते । कस्मिन्नप्यवसरे त तथास्थित कुमार स नृपतिस्तत्तनुताहेतु पृच्छन् दुर्मेधतया प्रजा पीडयसि तेनात्यन्तमनौचित्येन कृशतामावहामि।

४) श्वासो जडाण मज्झे दोजीहा सामिसवणपॅडिलग्गा ।
जीविज्जइ ते लाहो झीणिते विम्हउँ कीस ॥

---

१ प्राक्तनानि c * पुण्यसारप्रबन्धोय पुस्तकान्तरे नोपलभ्यते इति डा भाउदाजीना लिखितम् २ एव स्तोध c ३ पालनपरिश्रमानभिज्ञ b

४ श्वासो जडाना मध्ये द्विजिह्वा स्वामिश्रवणप्रलिग्न ।
जीव्यते यत्तत् लाभ क्षीणत्वे विस्मय कीदृश ॥

४ भवण a ५ जीविज्जइ तइ c ६ हाणन्त विम्हिउ c

इति मया गाथार्थः सत्यापितोऽस्तीति तद्वचनानन्तरं यदस्याःप्रजायाः पापनिरताया अपुण्योदयेनावश्यंभाविपीडनावसरेऽहं नृपतीकृतः । यदि प्रजायाः परिपालनां लोकेशोऽभ्यलिखिष्यत्तदा भवत एव पट्टहस्ती पट्टाभिषेकमकारिष्यदिति तदुक्तियुक्तिभ्यां भेषजाभ्यामिव निगृहीतरुक् स कुमारो वपुःपीवरतां बभार । इति कर्मसारप्रबन्धः* ।

११ अथ गौडदेशे लक्षणावत्यां नगर्यां श्रीलक्ष्मणसेनो नाम नृपतिरुमापतिधरसचिवेन सर्वबुद्धिनिधिना चिन्त्यमानराज्यश्रिरं राज्यं चकार । स त्वनेकमत्तमातङ्गसैन्यसङ्गादिव मदान्धतां दधानो मातङ्गीसङ्गपङ्ककलङ्कभाजनमजनि । उमापतिधरस्तु तद्व्यतिकरमवगम्य प्रकृतिक्रूरतया च स्वामिनोऽनालोकनीयतां च विचिन्त्य प्रकारान्तरेण तं बोधयितुं सभामण्डपस्थ भारपट्टे गुप्तवृत्त्यामूनि काव्यानि लिलेख ॥

५) शैत्यं नाम गुणस्तवैव, तदनु स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां व्रजन्त्यशुचयःस्पर्शात्तवैवापरे ।
किं चातः परमस्ति ते स्तुतिपदं त्वं जीवितं देहिनां
त्वं चेन्नीचपथेन गच्छसि पय. कस्त्वां निरोद्धुं क्षमः[1] ॥ १ ॥

६) त्वं चेत्संचरसे वृषेण लघुता का नाम दिग्दन्तिनां
व्यालैः कङ्कणभूषणानि तनुषे हानिर्न हेम्नामपि ।
मूर्धन्यं कुरुषे जडांशुमयशः किं नाम लोकत्रयी–
दीपस्याम्बुजबान्धवस्य, जगतामीशोऽसि किं ब्रूमहे[4] ॥ २ ॥

७) छिन्नं ब्रह्मशिरो यदि प्रथयति प्रेतेषु सख्यं यदि
क्षीब क्रीडति मातृभिर्यदि रतिं धत्ते श्मशाने यदि ।

* कर्मसारप्रबन्धोऽयं पुस्तकान्तरे नोपलभ्यते इति डा. भाउदाजीना लिखितम्
१ अनाकलनीयता H २ भवन्ति C ३ प्रश्नोत्तरमालायाः पद्यमिदम् ४ कुवलयानन्दे तथा शोभाकरस्यालंकाररत्नाकरेऽपि पद्यमिदम्

न्मुष्णा संहरति प्रजां यदि तथाप्याधारं भस्त्या मन-
स्त सेवे करवाणि किं निजगती शून्या स एवेश्वरं ॥ ३ ॥

८) एतस्मिन्महति प्रदोषसमये राजा स्वभे हस्ततो
लक्ष्मीमम्बुरुहा पिधाय कुमुदे किं नो तनोषि श्रिय ।
यद्राज्ञी स्थितिरत्र यच्च सुमन श्रेणीषु सभा ना
त्व नावर्कनमोऽसि नतिरायितु धातापि नेर क्षम ॥ ४ ॥

९) सद्वृत्तसद्गुणमहार्हमनर्घमूल्य—
कान्ताघनस्तनतटोचितचारुमूर्ते ।
आ पामरीकठिनकण्ठविलग्नभग्न
हा हार हारितमहो भवता गुणित्वम् ॥ ५ ॥

कस्मिन्नप्यवसरप्रस्तावे तानि वीक्ष्य तदर्थमवगम्य तस्मिन्नन्तर्दुःप दध्यौ । यत —

१०) माघ सपति कोपाय सन्मार्गस्योपदेशनम् ।
निकृत्तनासिकस्येव यद्वदादर्शदर्शनम् ॥

इति न्यायात्सामर्षतया त पदभ्रष्ट चकार । अथ स नृपति चन्द्रा-
विद्राजपाटिकायां गत्यान्तो दुरवस्थोऽविनगुपायविधुर त वीक्ष्य
क्रोधाद्ध्माय हस्तिपकेन हस्तिन प्रेरयामास । स तु निषादिन प्रति
प्राह । यावदह राज्ञोऽग्रे किंचिद्वच्मि तावज्जवानिवार्यतां गज । तत
चनात्तेन तथा कृते, उमापतिधर प्राह—

११) नगरितष्ठति धूलिधूसरवपुर्गाढविमारोहति
ध्याले क्रीडति, नृत्यति, सवदागमचागाद्वहनवन्नित ।

१ प्रजां B २ आदाय C ३ तात D ४ पार्श्वद्वर्तितिति कार्थमर्थ सन्मा गुरुधृतमिदे पद्यम् ५ सहाध्य H ६ सर्वावसरप्रस्ताव a H C ७ सन्ति मर्षा पाय P ८ राज्यजयपाटिकाया C ९ उद्धृदन्तिनाग a

आचाराद्धरिविक्रमादिचरितैराबद्धरागो हर[1]
सैत्य[2] नोपदिशन्ति यस्य गुरवस्तस्येदमाचेष्टितम् ॥

इति तद्विज्ञानाङ्कुशेन वशंवदमनोगजो निजचारित्रे किञ्चित्सानुशय[3] स्वममन्द निन्दंस्तद्व्यसन शनैर्निषिध्य त राजा पुनरेव प्रधानीचकार । इति लक्ष्मणसेनोमापतिधरयोः प्रबन्धः*

१२ अथ काशीनगर्यां जयचन्द्र इति नृप प्राज्यसाम्राज्यलक्ष्मीं पालयन्पङ्गुरिति विरुद बभार । यतो यमुनागङ्गायष्टियुगावलम्बनमन्तरेण चमूसमूहव्याकुलिततया क्वापि गन्तु न प्रभवति । कस्मिन्नप्यवसरे तत्र वास्तव्यस्य कस्यापि शालापते पत्नी सूहवनाम्नी सौन्दर्यनिर्जितजगत्त्रय स्त्रैणा भीष्मग्रीष्मर्तौ जलकेलिं विधाय सुरसरित्तीरे तस्थुषी सा खञ्जनाक्षी व्यालमौलिस्थित खञ्जन वीक्ष्य तमसभाव्य शकुन कस्यापि द्विजन्मन स्नातुमायातस्य पदोर्निपत्य तद्विचार पप्रच्छ । स निमित्तवित् चेन्मदादेश सदैव तनुषे तदा तव विचारमह निवेदयामीति तेनोक्ता तव पितृनिर्विशेषस्य सा मान्यो[4] मयाज्ञा सदैव मूर्ध्ना वहामीति प्रतिज्ञापरायास्तस्या सप्तमेऽहनि त्वमस्य नृपतेरग्रमहिषी भविष्यसीति, आदिश्य द्वावपि यथागत जग्मतु ॥ अथ निमित्तविदा निर्णीते वासरे स राजा राजपाटिकाया प्रत्यावृत्त क्वापि रथ्याया नेपथ्यविहीनामपि अगण्यलावण्यपुण्याङ्गीं ता शालापतिबाला विलोक्य स्वचित्तसर्वस्वचौरी-[5] मूरीकृत्याग्रमहिषीं चकार । तदनु तया कृतज्ञतया विप्रप्रतिज्ञा स्मरन्त्या नृपाय तस्मिन् विद्याधरनिमित्ते विज्ञप्ते पटहप्रणादपूर्व तस्मिन् विद्याधरे आहूयमाने विद्याधराभिधानाना द्विजाना सप्तशतीमागता विलोक्य तमे

१ रावद्धरागोहर P २ सन्तो P ३ चारित्रकिञ्चित्सानु P * अथ लक्ष्मणसेनोमापतिधरयो प्रबन्ध पुस्तकान्तरे नोपलभ्यते इति डा भाउदाजीना लिखितम् ४ सामान्यामाज्ञा सदैव मूर्ध्ना वहामि ॥ ५ सर्वस्व चौरीत्यस्य a

कमुपलक्षितं पृथक् कृत्वा शेषेषु यथोचितं सत्कृत्य विसृष्टेषु नृपतिर्यथेप्सितं प्रार्थयेति विद्याधरं विपद्विधुरं प्राह । राजादेशप्रमुदितेन तेनाङ्गसेवा सदैवास्तु इति प्रार्थिते नृपतिना तथेति प्रतिपन्ने तस्य निरवधिचातुर्यं पर्यालोच्य सर्वाधिकारभारे धुरंधरो व्यधायि । स च क्रमेण सपत्नसपत्न् निजद्वात्रिंशद्वरोधपुरन्ध्रीणामनुवासरं जात्यकर्पूरपूराभरणानि कारयन् प्राच्यानि निर्माल्यानीत्यवकरकूपिकायां त्याजयन् साक्षाद्देवतावतार इव दिव्यभोगान् भुञ्जानोऽष्टादशसहस्राणां[1] ब्राह्मणानामभिलषिताभ्यवहारदानादनु स्वयमश्नाति । अथ कदाचिन् नृपतिना वैदेशिकभूपतिमभिषेणयितुं चतुर्दशविद्याधरो विद्याधरो प्रेषितो[3] देशाद्देशान्तराण्यवगाहमानः क्वचिदिन्धनविहीने देशे विहितावासस्तेषां विप्राणां पाककाले सूपकाराणां तैलाभ्यक्तवस्त्रदुकूलान्येवेन्धनीकुर्वन् तान्विप्रान् रूढ्यैव भोजयामास । अथ प्रतिरिपुं निर्जित्य जितकाशितया व्यावृत्य प्राप्तनिजपुरीपरीसरः पिण्याकाभिलाषान् दुकूलज्वालनेन कुपितं भूपतिमवगम्य स्वं गृहमर्थिभिर्लुण्टाप्य तीर्थोपासनवासनया संचरन् आनुषङ्गिकेन नृपतिनानुनीयमानो मानोन्नततया नृपतेराशये स्वाभिलाषसंभवं निवेद्य कथंचिदापृच्छ्य निजमवसानमसाधयत् ।

१३ तदनन्तरं सूहवदेव्या निजाङ्गजस्य कृते युवराजपदवीं याचितो नृपः सगृहिणीपुत्रायासद्वशराज्यं न युज्यते इति बोधिता सं पतिं जिघांसुः म्लेच्छानाहूतवती । अथ स्थानपुरुषाणां समायातविज्ञप्तिकया स व्यतिकरमवधार्य लब्धपद्मावतीवरप्रसादं सादरं कमपि दिग्वाससं निमित्तं पृष्टवान् । स पद्मावत्याः सप्रत्ययं म्लेच्छागमनिषेधरूपसमादेशं नृपतेर्विज्ञप्तवान् ॥ अथ कियद्दिनानां प्रान्ते तान् संनिहितानाकर्ण्य स आशाम्बरः किमेतदिति पृष्टस्तस्यामेव निशि नृपतिप्रत्यक्षं पद्मावत्या

---

१ जट्षासहस्राणां B २ सप्तासहस्राणां H C, ३ चतुर्दशविद्याधरोऽपि B P ४ कथं कथंचिद् P

पुरो होममारभत ॥ अथ निरवद्याक्लिष्टविधया होमकुण्डज्वालानालान्तरिता प्रत्यक्षीभूय श्रीपद्मावती तुरुष्कागमनिर्षेधमुक्तवती ॥ अथ सामर्षः क्षपणकस्तां कर्णयोर्धृत्वा क्रोधानुबन्धवत्सु सन्निहितेषु किं भवत्यपि वितथं ब्रूते, इति तेनोपालम्भिता सति सैवमवादीत् । त्वं यां पद्मावतीमतीव भक्त्या पृच्छसि सान्त्यप्रतापबलात्पलायांचक्रे । अहं तु म्लेच्छगोत्रजं दैवतं मिथ्याभाषणेन लोकं विश्वाम्य म्लेच्छैर्विश्वासं कारयामीत्युदीर्य तस्यां तिरोहितायां, म्लेच्छसैन्येन प्रातर्वाराणसीं वेष्टितां चेष्टया जानन् तद्धनुर्ध्वनिश्चतुर्दशशतीमितनि स्वानकुम्भनिःस्वनेऽपहृते सति प्रबलम्लेच्छकुलव्याकुलीकृतमनाम्त्वं सूहवदेव्या अङ्गजं निजे गजे नियोज्य जान्हवीजले सगजो ममज्ज । इति जयचन्द्रप्रबन्धः[*] ॥

१४ अथ जगद्देवनामा क्षत्रियः त्रिविधामपि वीरकोटिरतां बिभ्रत्, श्रीसिद्धचक्रवर्तिना सन्मान्योऽपि तद्गुणमन्त्रवशीकृतेन नृपतिना परमर्दिश्रीपरमर्दिनाहूत. सोऽपरोध पृथ्वीपुरन्ध्रीकुन्तलकलापकल्पं कुन्तलमण्डलमवाप्य यावत्तदागमं श्रीपरमर्दिने द्वास्थो निवेदयति तावत्तत्सदसि काचिद्विटवनिता विवसना पुष्पचलनर्त्तं नृत्यन्ती तत्कालमेवोत्तरीयकमादाय सापत्रपा सा तत्रैव निपसाद ॥ अथ राजदौवारिकप्रवेशिताय श्रीजगद्देवाय समियालापप्रभृति सन्मानदानादनु प्रधानपरिधानं दुकूलं लक्षमूल्यातुल्योद्भटपटयुगं प्रसादीकृत्य तस्मिन् महार्हासननिविष्टे सभासम्भ्रमे मग्ने सति, नृपस्तामेव विटनटीं नृत्यायादिदेश । अथ सा औचित्यप्रपञ्चचन्चुचातुर्यधुर्यो श्रीजगद्देवनामा जगदेकपुरुषः साम्प्रतं समाजगाम तदत्र विवसनाहं जिह्रेमि । स्त्रियः स्त्रीष्वेव यथेष्टं चेष्टन्ते इति तस्या लोकोत्तरया प्रशंसया प्रमुदितमानसस्तं नृपप्रसादीकृतं वसनयुगं तस्यै वितीर्णवान् ॥ अथ श्रीपरमर्दिप्रसादतो देशाधिपत्ये संजाते सति

---

१ अपन्हुते इति P * अयं जयचन्द्रप्रबन्धः पुस्तकान्तरे नोपलभ्यते इति डा. भाउदाजीना लिखितम् २ मदनचक्रनका H c D

तदुपाध्यायः श्रीजगद्देवस्य मिलनाय समागतः काव्यमिदं प्राभृती-
चकार । तद्यथा—

१२) चक्र. पप्रच्छ पान्थ कथय मम सखे क्वास्ति किं स प्रदेशो
वस्तुं नो यत्र रात्रिर्भवति भुवि चिरायेति स प्रत्युवाच ।
नीते मेरौ समाप्तिं कनकवितरणैः श्रीजगद्देवनाम्ना
सूर्येऽनन्तर्हितेऽस्मिन्कतिपयदिवसैर्वासराद्वैतसृष्टि. ॥

अस्य काव्यस्य पारितोषिके तस्मै स स्फुरल्लक्ष्यो लक्षार्धं वितितार ॥

१३) क्षोणीरक्षणदक्षदक्षिणभुजे दाक्षिण्यदीक्षागुरौ
श्रेय. सद्मनि धन्यजन्मनि जगद्देवे जगद्दातरि ।
वर्तन्ते विदुषां गृहा प्रतिदिनं गन्धेभगन्धर्वयो–
रालानद्रुमरज्जुदामघटनाव्यग्रैर्भिर्वाङ्किङ्करा ॥ १ ॥

१४) त्वयि जीवति जीवन्ति बलिकर्णदधीचय ।
दारिद्र्यं तु जगद्देव मयि जीवति जीवति ॥ २ ॥

१५) दरिद्रान् सृजतो धातु कृतार्थान् कुर्वतस्तव ।
जगद्देव न जानीम कस्य हस्तो विरस्यति ॥ ३ ॥

१६) जगद्देव जगद्देव प्रासादमधितिष्ठत ।
स्वयशः शिवलिङ्गस्य नक्षत्रैरक्षतायितम् ॥ ४ ॥

१७) अगाधः पाथोधि पृथु धरणिपात्रं विभु नभ
समुत्तुङ्गो मेरु. प्रथितमहिमा कैटभरिपु ।

---

१ क्षेणप्रस्तदुपाध्यायः a D क्षणप्रस्ततस्तदुपाध्याय H
अक्षत्रक्षतशालिनो भगवतः कस्यापि सर्गातिक–
व्यासक्तस्य च तस्य कुर्महे पुण्यानि मन्यामहे
एकः कामदुघामरम्य मरतः सूनोः सुधाहुर्यी
प्रत्यक्षप्रतिपक्षभार्गव भवानन्यस्य चिन्तामणिः ॥ १ ॥ इत्
a b H आदर्शेषुक्तेदमधिकं पद्यं २ पान्थं a ३ पृथुर्धरणिपात्रं a H

जगद्देवो वीर सुरतररुदार सुरसरित्
पवित्रा पीयूषद्युतिरमृतवर्षाति न नवम् ॥ ९ ॥

न नवमिति जगद्देवेनार्पिता समस्या पण्डितेन पूरितेत्यादीनि बहूनि काव्यानि यथाश्रुत ज्ञातव्यानि ।

१५ अथ श्रीपरमर्दिमेदिनीपते पट्टमहादेवी श्रीजगद्देवस्य प्रतिपन्न-जामि । कदाचित् राज्ञा श्रीमालुभूपालपराजयाय प्रहित श्रीजगद्देव श्रीदेवार्चन कुर्वन् छलघातिना परबलेन सैन्य निजमुपद्रुत शृण्वन् तमेव देवतावसर न मुमोच । तस्मिन्नवसरे प्रणिधिपुरुषमुखाज्जगद्देवपरा-जयमश्रुतपूर्वमवधार्य महिषी श्रीपरमर्दी प्राह । भवद्भ्राता सङ्ग्रामवीरना थता बिभ्राणोऽपि रिपुभिराक्रान्त पलायितुमपि न प्रभूष्णुरजनि । इति नृपतेर्मर्माभिघातनमोक्तिमाकर्ण्य प्रत्यूषसन्ध्याकाले सा राज्ञी प्रतीचीदिश-मालोकितवती। राज्ञा किमालोकसे इत्यादिष्टे सूर्योदयमिति, ' मुग्धे किं सूर्योदयोऽपरस्या दिशि जाघटीति, ' सा तु ' विरञ्चिप्रपञ्च प्रतीप प्रतीच्यामपि प्रद्योतनोदयो दुर्घटोऽपि घटते, पर क्षत्रियदेवजगद्देवस्य भङ्गस्तु नेति' दम्पत्यो प्रियालाप ॥ देवार्चनानन्तर जगद्देव पञ्चशत्या सुभटै सम समुत्थितश्चण्डांशुरिव तमस्काण्ड, केसरिकिशोर इव गज यूथ, वात्यावर्त्त इव घनमण्डल हेलयेव तद्दल दलयामास ।

१६ अथ परमर्दिनामा नृपो जगत्युदाहरणीभूत परमैश्वर्यमनुभवन् निद्रावसरवर्जं रात्रिंदिव निजौजसा विच्छुरित छुरिकाभ्यास विदधानो ऽशनावसरे परिवेषणाकुल प्रतिदिनमेकैक सूपकारमकृप कृपाणिकया निघ्नन् षष्ठ्यधिकशतत्रयेण भक्तकाराणा वर्षे निषेव्यमाण कोपकाला नल इति बिरुद बभार ।

१८) आकाश प्रसर प्रसर्पत दिशस्त्व पृथ्वि पृथ्वी भव
प्रत्यर्थीकृतमालवराजयशसां कुम्भामिरुज्जृम्भितम् ।

---

१ प्रियालापे H २ तद्दलयामास P

प्रेक्षध्वं परमर्दिपार्थिवयशोराशेर्विकाशोदया-
द्बीजोच्छ्वासविदीर्णदाडिमदशां ब्रह्माण्डमारोहति ॥

इत्यादिभि स्तुतिभि स्तूयमानश्चिर राज्यसुखमनुबभूव ।

१७ स च सपादलक्षक्षितिपतिना श्रीपृथ्वीराजेन सह सजातविग्रह समराजिरमधिरूढ स्वसैन्ये पराजिते कान्दिशीक कामपि दिश गृहीत्वा पलायनपर स्वराजधानीमाजगाम । अथ तस्य पार्थिवस्यापमानितपूर्वसेवको निर्विषयीकृत पृथ्वीराजराजसभामुपेत प्रणामान्ते किं दैवत पूज्यते परमर्दिपुरे विशेषात्सुकृतिभिरिति स्वामिनादिष्टस्तत्कालोचित काव्यमिदमपाठीत् ।

१९) मन्दश्चन्द्रकिरीटपूजनरसस्तृष्णा न कृष्णार्चने
स्तब्ध शम्भुनितम्बिनीप्रणतिषु व्यग्रो विधातृग्रह ।
नाथो न परमर्दिनेन वदनन्यस्तेन सरक्षित
पृथ्वीराजनराधिपादिति तृण तत्पत्तने पूज्यते ॥

इति स्तुतिपरितोषितेनानुजग्राह । स तत्र त्रि सप्तकृत्वस्त्रासितम्लेच्छाधिपोऽपि द्वाविंशतितमवेलाया स एव म्लेच्छाधिपति पृथ्वीराजराजधानीमुपेत्य निजदुर्धरस्कन्धावारेण समवात्सीत् । त्रासितमक्षिकेव भूयो भूयो रिपुरुपैतीति निजनृपतेररति मनोगतामवगम्य प्रभोर्नि सीमप्रसादपात्र द्वितीयमिवममात्र तुङ्गनामा क्षात्र तेजो वहन्सुभटकोटीर स्वप्रतिबिम्बरूपेण पुत्रेण सम म्लेच्छाधिपतेरनीक प्रविश्य निशीथसमये तस्य रिपोर्गुरूदरात्परित खदिराङ्गारधगधगायमाना परिखा निरीक्ष्याङ्गज जगाद । अस्या मम प्रविष्टस्य पृष्ठे पद ददानो म्लेच्छपतिं निगृहाणेति पितुरादेशान्ते कार्यमेतन्ममासाध्यतम, किं च जीवितशङ्कया वर्मविपत्तिदर्शन, तदहमस्या विशामि भवन्त एव तमन्त नयन्तु । इत्युक्त्वा तेन तथा कृते, स्वामि-

१ अपमानितसर्वे P अपमानितपूर्व कोऽपि त पूवमवक्रो H २ स्तब्धा B
३ प्र १रपाराद्वितीयमिवामात्र P ४ वपु १

कार्यं पर्याप्तप्राय मन्यमानस्तमरातिं लीलया निगृह्य यथागतमाजगाम । विभातभूयिष्टाया निशि निपन्न स्वामिन निरीक्ष्य परसैन्य पलायाचक्रे । स तुङ्गसुभटस्तुङ्गप्रकृतिर्नृपते कदाचिन्न ज्ञापयामास । कस्मिन्नप्यवसरे राजमान्यतया नितान्तपरिचिता तुङ्गपुत्रवधूमवधूतमङ्गलवलयामालोक्य संभ्रमात् पतिना पृच्छ्यमानोऽपि पयोधिरिव गम्भीरतया मौनमर्यादया किमप्यविज्ञपयन् निजशपथदानपूर्वं पृष्टो निजगुणपातक दुष्करमिति तथापि प्रभोरभ्यर्थनया निवेद्यमानमस्तीत्यभिधाय तद्वृत्तान्त मत्युपकार-भीरुर्यथावस्थित निवेदयामास ।

२०) इयमुच्चधियामलौकिकी
महती कापि कठोरचित्तता ।
उपकृत्य भवन्ति नि स्पृहा
परत प्रत्युपकारशङ्कया ॥

इति तुङ्गसुभटप्रबन्ध. ।

१८ अथ कदाचित्तस्य म्लेच्छपते सूनुर्नृपति पितुर्वैरस्य स्मरन्, सपादलक्षक्षितिपतिविग्रहकाम्यया सर्वसामग्र्या समुपेत पृथ्वीनाथस्य नासीरवीरधनुर्धरशरै प्रावृषेण्यधाराधरधारासारैरिव तस्मिन्ससैन्ये त्रासिते पृथ्वीराजस्तदा तदानुपदिकीभाव भजन्, महानसाधिकृतपञ्चकुलेन विज्ञपित करभीणा सप्तशत्यापि महानसपरिच्छद सुखेन नोह्यते ततः कियतीभि करभीभि प्रभु प्रसीदत्विति विज्ञप्तो नृपतिर्म्लेच्छपतिमुच्छेद्य भवदभ्यर्थिता करभी प्रसादीकरिष्यामीति तत्सबोध्य पुन प्रयाण कुर्वन् सोमेश्वरनाम्ना प्रधानेन भूयो भूयो निषिध्यमान , तत्पक्षपातभ्रा-न्त्या नृपतिना निगृहीतकर्ण , तदत्यन्तपराभवात् तस्मिन् प्रभौ सामर्षो-म्लेच्छपतिं प्राप्य तदभिभवप्राड्डु करणतस्तान् विश्वस्तान् पृथ्वीराजस्कन्धा-वारसन्निधौ समानीय पृथ्वीराजराजस्यैकादश्युपवासकृतपारणादनु सुप्तस्य

१ सुखेनोह्यत नात P २ मुच्छेद्य तदौष्ट्रिकमाछिद्य H

तत्रासीरवीरैः सह समरसंरम्भे म्लेच्छानां जायमाने निर्भरनिद्रायमाणस्तुरुष्कैर्नृपतिर्निबध्यं स्वसौधं नीतः । पुनरप्येकादश्युपवासपारणके नृपतेर्देवार्चनावसरे म्लेच्छराजेन प्रहितं तत्र पात्रीकृतमांसपाकं गुरूदरान्तर्नियुज्य तदैव देवताराधनवैयग्र्ये सति, शुनापन्हियमाणे तस्मिन् विशिते, किं न रक्षसि यामिकैरित्थमिहितः करमीणां सप्तशत्या दुर्वहं यत्पुरा मम महानसं तत्साम्प्रतं दुर्दैवयोगादीदृशीं दुर्दशां प्राप्तमिति कौतुकाकुलितमानसो विलोकयन्नस्मीति तेनोक्ते, किं काचिद्यापि त्वय्युत्साहशक्तिरवशिष्यत इति तैर्विज्ञप्ते, यदि स्वस्थाने गन्तुं लभे तदा दर्शयामि वपुःपौरुषमिति यामिकैर्विज्ञप्तो म्लेच्छभूपतिस्तत्साहसदिदृक्षुस्तदीयां राजधानीमानीय पृथ्वीराजं तत्र राजसौधे यावदभिषेक्ष्यति तावत्तत्र चित्रशालायां शूकरनिबद्धैर्हन्यमानान् म्लेच्छानालोक्यामुना मर्माभिघातेनात्यन्तपीडितस्तुरुष्कपार्थिवः पृथ्वीराजं कुठारशिरश्छेदपूर्वं संजहार । इति नृपतिपरमर्दिजगद्देवपृथ्वीपतीनां प्रबन्धाः ॥

१९ अथ शतानन्दपुरे परिखीभूतजलधौ श्रीमहानन्दो नाम राजा मदनरेखेति तस्य राज्ञी, अन्तःपुरप्राचुर्यात्, पतिसंवननकर्मनिर्माणत्याप्त्या, तां प्रति विरक्तचेता नृपतिरिति नानाविधान् वैदेशिकान् कलाविदश्च पृच्छन्ती कस्यापि यथार्थवादिनः सत्यप्रत्ययस्य कार्मणकर्मणे किञ्चित्सिद्धयोगमासाद्य तत्प्रयोगावसरे ।

मन्त्रमूलबलात्प्रीतिः पतिद्रोहोऽभिधीयते ।

इति वाक्यमनुस्मरन्ती सतीव तद्योगचूर्णं जलधौ न्यधत्त । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति तद्भेषजमाहात्म्याद्वशीकृतो वारिधिरेव मूर्तिमान् निशि तामुपेत्य रेमे । इत्थमकस्मादाधानवतीं प्रतीकैस्तद्विधैर्निर्णीय सकोपो भूपो यावत्तस्याः प्रवासादिदण्ड कमपि विमृशति

१ म्लेच्छाधिपतीना P २ लभेन P ३ प्राचुर्यात्पतिसंवननकर्मनिर्माणव्याप्रतया P ४ प्रदेजनावसरे D

तावत्तस्याः सन्निहिते निधननिर्बन्धे प्रत्यक्षीभूय जलधिरधिष्ठातृदैवतमहमिति स्वं ज्ञापयन् मा भैषीरिति तामाश्वास्य प्रति नृपं प्राह ।

२१) विवाहयित्वा यः कन्या कुलजां शीलमण्डिताम् ।
समदृष्ट्या न पश्येत स पापिष्ठतरः स्मृत' ॥

इति स्वामवज्ञाकारिणं प्रलयकालमुक्तमर्यादया सान्त'पुरपरीवारं मज्जयिष्यामीति भयभ्रान्ताया अनुनयपराया अयं मदीय एव सूनुस्तदस्मै साम्राज्योचितां नव्यां भूमिमिह दास्यामीत्यभिधाय क्वचित् क्वचित् पर्यास्यपहृत्यान्तरीयान् प्रादुश्चकार । तानि सर्वाण्यपि लोकेषु कौङ्कणानीति प्रसिद्धानि । इति कौङ्कणोत्पत्तिप्रबन्धः* ।

२० अथ पाटलीपुत्रपत्तने वराहनामा कश्चिद्ब्राह्मणाङ्गभूः आजन्मनिमित्तज्ञानश्रद्धालुर्दुर्गतत्वादसूनूरक्षितु पशून् चारयन् क्वापि शिलातले लग्नमालिख्याकृततद्विसर्जन. प्रदोषकाले गृहमुपेत । कृतसमयोचितकृत्यो निशीथकाले भोजनायोपविष्टो लग्नविसर्जनमनुस्मृत्य निरातङ्कवृत्त्या तत्र याति, तावत्तदुपरि पारीन्द्रमप्युपविष्टमवगणय्य तदुदराधोभागे पाणिं प्रक्षिप्य लग्नं विमृजन् सिहरूपमपहाय प्रत्यक्षीभूय रविरेव वरं वृणु इत्युवाच । अथ समस्तनक्षत्रग्रहमण्डलं दर्शयेति वरं प्रार्थयमान स्वविमानेऽधिरोप्य तत्रैव नीतो वत्सरान्ते यावद्ग्रहाणां वक्रातिचारोदयास्तमनादीन् भावान् प्रत्यक्षरूपान् परीक्ष्य पुनरिहायातो मिहिरप्रसादाद्वराहमिहिर इति प्रसिद्धास्य श्रीनन्दनृपते. परमां मान्यतां दधानो वाराहीसंहितेति नवं ज्योतिःशास्त्रं रचयांचकार । अथ कदाचित्स निजपुत्रजन्मावसरे निजग्रहे घटिकां निवेश्य तया शुद्ध जन्मकाललग्नं निर्णीय जातकग्रन्थप्रमाणेन ज्योतिश्चक्रे । स्वय प्रत्यक्षीकृतग्रहचक्रज्ञानबलात्तस्य सूनो. संवत्सरशतप्रमाणमायुर्निर्णीतवान् । जन्ममहोत्सवे चैक श्रीभद्रबाहुनामानं जैना-

१ भयभ्रान्ताया इत्यारभ्य दास्यामीत्यन्त वाक्य मु पुस्तके नास्ति * कौङ्कणोत्पत्तिप्रबन्धोऽय पुस्तकान्तरे नोपलभ्यते इति डा. भाउदाजीना लिखितम् ।

चार्यं कनीयांसं सोदरं विहाय नृपप्रभृतिक. स कोऽपि नास्ति य उपायनपाणिर्न जगाम। स निमित्तविजिनभक्ताय शकटालमन्त्रिणे तेषां सूरीणामनागमनकारणमुपालम्भगर्भितं जगौ। तेन ज्ञापितास्ते महात्मानः संपूर्णश्रुतज्ञानकरतलकलितामलकफलवत्कालत्रयास्तस्य शिशोर्विंशतितमे दिने बिडालान्मृत्युमुपदिशन्तो वयं नागता इति तेषामुपदेशे वराहमिहिराय निवेदिते ततःप्रभृति निजकुटुम्बं तस्य शावस्यावश्यकीं तां विपदं निरोद्धुं बिडालरक्षायै शतश उपायान्कुर्वन्नपि निर्णीते दिने निशीथेऽकस्माद्द्वालमूर्ध्नि पतितयार्गलया स बालः परलोकमवाप। ततस्तच्छोकशङ्कुमुद्दिधीर्षवः श्रीभद्रबाहुगुरवो यावत्तद्गेहमायान्ति तावत्तद्गृहाङ्गणे समस्तनिमित्तशास्त्रपुस्तकान्येकत्र पिण्डीकृतानि सन्निहितदहनान्यालोक्य किमेतदिति पृष्टः सांवत्सरः समत्सरस्तान् जैनमुनीनुपालम्भयन् एतानि संदेहकारीणि धक्ष्याम्येव यैरहमपि विप्रलब्धस्तेनेति सनिर्वेदमुदिते तैः श्रुतज्ञानबलात्तज्जन्मलग्नं सम्यक् तस्मै निवेद्य सूक्ष्मेक्षिकया तद्ग्रहबले ज्ञापिते विंशतिदिनान्येव भवन्ति। इत्थं विरक्तावपनीतायां स ज्योतिषिक इति जगौ। यद्भवद्भिर्बिडालान्मृत्युरुपदिष्टस्तदेव व्यभिचारीति तेनाभिहिते तत्रार्गलां तामानाय्य तत्रोत्कीर्णं बिडालं दर्शयन्तो भवितव्यताव्यत्ययः किं कदापि भवतीति महर्षिभिरभिदधे। कस्मात् रुद्यते, गतः कः, परमार्णवोऽनपायाः, संस्थानविशेषनाशजन्मा शोकश्चेत्र कदापि मोहितव्यम्।

२२) अभावप्रभवैर्शर्वैर्मायाविभवभावितैः।
अभावनिष्ठपर्यन्तैः सतां न क्रियते भ्रमः॥

---

१ सुपदेशामृतां वाच वराहमिहिराय निवेदितायाः P २ एतानि रोहन्मोहसंदोहकारीणि H ३ कस्मात्र च B ४ कार्योऽस्य परमाणवः B. ५ अभावनिष्ठपर्यन्ते P ६ समः P

इत्युक्तियुक्तिभ्यां प्रबोध्य ते महर्षयः स्व पदं भेजुः । इत्थं बोधितस्यापि तस्य मिथ्यात्वध्वान्तान्तरितस्य कनकभ्रान्तिरिव तथात्राप्युन्मदसरोच्छेकावद्धक्तानभिचारकर्मणा कांश्चन पीडयन् कांश्चन व्यापादयन् तद्वृत्तान्तं तेभ्यो ज्ञानातिशयादवधार्योपसर्गहरं पासमिति नूतनं स्तोत्रं रचयांचक्रुः । इति वराहमिहिरप्रबन्धः* ॥

२१ अथ ढङ्काभिधानभूभृति रणसिंहनामा राजपुत्रस्तन्नन्दनां भूपलनाम्नीं सौन्दर्यनिर्जितनागलोकबालामालोक्य जातानुरागतया तां सेवमानस्य तस्य वासुकेः सुतो नागार्जुननामा समजनि । तेन पातालपालेन सुतस्नेहमोहितमनसा सर्वासामप्यौषधीनां फलानि मूलानि दलानि च भोजितस्तत्प्रभावान्महासिद्धिभिरलंकृतः सिद्धपुरुषतया पृथ्वीं विगाहमानः शातवाहननृपतेः कलागुरुर्गरीयसीं प्रतिष्ठामुपागतोऽपि गगनगामिनीं विद्यामध्येतुं श्रीपादलिप्तपुरे पादलिप्ताचार्यान् सेवमानो मानोच्छ्रितमतिर्भोजनावसरे पदे लेपप्रमाणेन गगनोत्पतितान् श्रीअष्टापदप्रभृतीनि तीर्थानि नमस्कृत्य तेषां स्वस्थानमुपेयुषां पादौ प्रक्षाल्य शातसप्तोत्तरशतसंख्यमहौषधीनामास्वादवर्णघ्राणादिभिर्निर्णीय च गुरूनवगणय्य कृतपदलेपः कुक्कवाकुकलापिवदुत्पत्यावटतटे निपतंश्च तद्व्रणश्रेणिजर्जरिताङ्गो गुरुभिः किमेतदित्यनुयुक्तो यथावद्वृत्तान्तं निवेदयन् तच्चातुर्यचमत्कृतचेतोभिस्तच्छिरसि पद्महस्तदानपूर्वकं षाष्टीकतन्दुलोदकेन तानि भेषजान्यभ्यञ्ज्य तत्पादलेपाद्गगनगामी भूया इति तदनुग्रहादेकां सिद्धिमासाद्य, श्रीपार्श्वनाथपुरतः साध्यमानो रसः समस्तस्त्रैणलक्षणोपलक्षितपतिव्रतवनितामर्द्यमानः कोटिवेधी भवतीति तन्मुखादाकर्ण्य च यत्पुरा समुद्रविजयदाशार्हेण त्रिकालवेदिनः श्रीनेमिनाथस्य मुखान्महातिशायि श्रुत्वा श्रीपार्श्वना-

१ मत्सुरितस्य कनकभ्रान्तिरिव चेदु मत्सरोच्छेकात्तद्भक्तान् H * अयं वराहमिहिरप्रबन्धः पुस्तकान्तरे नोपलभ्यते इति डा. भाउदाजीना लिखितम् । २ पाताल्व्यालेन H ३ व्रतमति P

थबिम्बं रत्नमयं निर्माप्य श्रीद्वारवत्यां प्रासादे न्यस्त, द्वारवतीदाहानन्तरं समुद्रेण प्लावितायां तस्यां पुरि तत्र समुद्रे तस्मिन्बिम्बे तथैव विद्यमाने, कान्तीयसांयात्रिकस्य धनपतिनाम्नो यानपात्रे देवतातिशयात् स्खलिते, इह जिनबिम्बमस्तीति दिव्यवाचा निर्णीय, नाविकांस्तत्र प्रक्षिप्य सप्तसंख्यैरामतन्तुभिः सन्दानितमुद्धृत्य निजायां पुरि चिन्तातीवलाभात् स्वयंकृतप्रासादे न्यस्तवान् । तत्सर्वातिशायि बिम्बं नागार्जुनः स्वसिद्धरससिद्धयेऽपहृत्य, सेडीतटिन्यास्तटे तदेव विन्यस्य, तत्पुरतो रससाधनाय श्रीसातवाहनस्यैकपत्नीं चन्द्रलेखाभिधानां प्रतिनिशं सिद्धव्यन्तरसान्निध्याचत्रानीय रसमर्दनं कारयति स्म । इत्थं भूयो भूयस्तत्र यातायाते सति, बन्धुबुद्ध्या सा नागार्जुनपार्श्वे तदौषधीना मर्दनहेतुं पृच्छति, सोऽपि स्वकल्पनया कोटिवेधरसस्य यथावस्थितं वृत्तान्तं निवेदयन्, तस्याश्च वचनगोचरातीतं सत्कारं कुर्वाणोऽनन्यसामान्यसौजन्यं प्रवर्धयामास । अथ कदाचित्तया निजाङ्गजयोरस्मिन् वृत्तान्ते निवेदिते तौ तल्लुब्धौ राज्यं परित्यज्य नागार्जुनसमलंकृता भुवमागतौ, कैतवेन तस्य रसस्य जिघृक्षया गुप्तवेषौ यत्र नागार्जुनो भुङ्क्ते तत्र तामर्थदानेन परितोष्य रसवार्तां पृच्छतः । सा च तज्जिज्ञासया तदर्थं सलवणां रसवतीं कुर्वन्ती षण्मास्यां व्यतीतायां तस्मिन् क्षारामिति रसवतीं दूषयति सति, इङ्गितैः सिद्धं रसमिति ताभ्यां निवेदितवती । अथ प्रतिपन्नभागिनेयाभ्यां रसग्रसनलालसाभ्यां वासुकिना निर्णीतदर्भाङ्कुरमृत्युरिति परम्परया ज्ञाततत्त्वाभ्यां तेनैव शस्त्रेण तथैव स निजघ्ने ।

स रसः संप्रतिच्छित्वाद्देवताधिष्ठानाच्च[1] तिरोहितो बभूव । यत्र स रसःस्तम्भितस्तत्र स्तम्भनकाभिधानं श्रीपार्श्वनाथतीर्थं रसादप्यतिशायि सकललोकाभिलषितफलप्रदं । ततः कियता कालेन तद्बिम्बं वदनमात्र-

1 संप्रतिच्छितदेवताधिष्ठानवशात् a D.

कृत्य पुनस्तन्निग्रहाय सुश्रुतविश्रुतैर्भेषजैः पथ्यैश्च तान्निगृह्य नीरमन्तरेण कियत्कालं जीव्यत इति परीक्षार्थं तत्परिहृत्य दिनत्रयान्ते पिपासापीडितताल्वोष्ठपुट इत्यपाठीत्—

२६) क्वचिदुष्णं क्वचिच्छीतं क्वचित्क्वथितशीतलम् ।
क्वचिद्भेषजसंयुक्तं वारि क्वापि न वारितम् ॥

इति वारिसत्कारकारि वाक्यमिदमपाठीत् । तेन निजानुभूतो[1] वाग्भटनामा प्रबन्धश्चक्रे । तस्य जामातापि लघुबाहडः श्वसुरेण बृहद्बाहडेन सह राजमन्दिरे प्रयातः प्रत्यूषकाले श्रीभोजस्य शरीरचेष्टितं[2] विलोक्य बृहद्बाहडेनाद्य नीरुजो यूयमित्युक्ते लघोर्मुखभङ्गं विलोक्य श्रीभोजेन कारणं पृष्ट. स स्वामिन· शरीरेऽद्य निशाशेषे कृष्णच्छायाप्रवेशसूचितो राजयक्ष्मणः प्रवेशोऽभूदिति दैवतादेशेनातीन्द्रियं भावं[3] विज्ञपयन् , तत्कलाकलापचमत्कृतेन राज्ञा तस्य व्याधेः प्रतीकारतयानुयुक्तः लक्षत्रयमूल्यं रसायनं निवेदयन्, षड्भिर्मासैस्तावता द्रव्यव्ययेन परमादरेण च तस्मिन् रसायने सिद्धे, प्रदोषसमये तद्रसायनं काचमये कुम्पके न्यस्य नरेन्द्रपल्यङ्के निधाय प्रत्यूषे देवतार्चनानन्तरं तद्रसायनमत्तुमिच्छुः रसायनपूजावर्धापनादनु सज्जीकृतायां समग्रसामग्र्यां स लघुरगदंकारी केनापि कारणेन तं काचकुम्पकं भूमावास्फाल्य बभञ्ज । आः किमेतदिति राज्ञोक्ते रसायनपरिमलादेव पलायिते[4] व्याधौ व्याधेरभावाद्धातुक्षयकारिणानेन वृथा स्थापितेनालं, यदद्य शर्वरीविरामे सति सा पूर्वोक्ता कृष्णा छाया प्रभोर्वपुरपास्य दूरं गतैव ददृशे इत्यर्थे देवः प्रमाणमिति तदीयसत्यप्रत्ययेन परितोषितो राजा दारिद्र्यद्रोहि पारितोषिकं प्रसादीचकार ॥

---

१ निजानुभूते a २ शरीरङ्गितं a ३ दैवतातिशयेन a आत्मीयभावं b
४ पलायमाने D

अथ ते सर्वव्याधयस्तेन चिकित्सकेन भूतलादुच्छेदिता स्वर्लोकेऽश्विनीकुमारवैद्ययो स्वपराभव निजगदु । अथ तौ तया प्रवृत्त्या चित्रीयमाणमानसौ नीलवर्णविहङ्गमयुग्मीभूय व्याधिप्रतिभटस्य वाग्भटस्य धवलगृहवातायनतले वलभ्या निविष्टौ कोऽरुक् शब्द चक्रतु । तत स आयुर्वेदवेदी नेदीयास तदीयशब्द साभिप्राय चेतसि चिरं विचिन्त्य ।

२७) अशाकभोजी घृतमत्ति योऽन्धसा
पयोरसान् शीलति नात्ति योऽम्भसा ।
अभुक् विभुक् नापक्रता विदाहिना[2]
चलत्पभुक् जीर्णभुगल्पसारभुक् ॥

इत्यभाणि । भणितानन्तरं चमत्कृतचित्तौ तौ प्रयातौ । पुनर्द्वितीयदिने द्वितीयवेलाया तादृक्पक्षिरूप विधाय प्राक्तनशब्दरूप कुर्वाणौ समायातौ वैद्यगृहे पुनस्तयोर्वच प्रतिवच ।

२८) वर्षासु यस्तिष्ठति, शरदि पिबति, हेमन्तशिशिरयोरपि ।
माद्यति मधुनि, ग्रीष्मे स्वपिति, भवति च खग सोऽरुक् ॥

इति भणितानन्तर पुनरेव गतौ । तृतीयदिने योगीन्द्ररूप कृत्वा तद्गृहे समागतौ तयोर्वच ।

२९) अभूमिजमनाकाशमदन्तव्यमवारिजम् ।
सम्मत सर्वशास्त्राणा वद वैद्य किमौषधम् ॥

पुनर्वैद्यवच

३०) अभूमिजमनाकाश पथ्य रसविवर्जितम् ।
पूर्वाचार्यै समाख्यात लङ्घन परमौषधम् ॥

१ चिकित्सितेन P २ आभुक् विरुक् नावक्रता a अभुक् विरुक् वातकृता H

तेन चमत्कृतचित्तो वैद्यो प्रत्यक्षीभूय यथाभिमत वर वितीर्य स्वस्थान भेजतु । इति वैद्यवाग्भटप्रबन्धः ।

२४ अथ धामणउलिग्रामवास्तव्यो धाराभिधान कोपि नैगम श्रिया वैश्रमणस्पर्धिष्णु सघाधिपत्यमासाद्य मांद्यद्द्रविणव्ययव्यतिकरजीवितजीवलोक पञ्चभिरङ्गजै सम श्रीरैवताचलोपत्यकाया विहितावासःदिगम्बरभक्तेन केनापि गिरिनगरराजेन सिताम्बरभक्त इति स स्वल्पमानस्तद्द्वयो सैन्ययो समरसरम्भे प्रवर्तमाने सति, अमानेन रणरसेन युध्यमाना देवभक्त्या वल्लभतया प्रोत्साहितसाहसा विपद्य ते पञ्चपुत्रा पञ्चापिक्षेत्रपतयो बभूवु । तेषा क्रमेण नामानि । १ कालमेघ २ मेघनाद ३ भैरव ४ एकपद ५ त्रैलोक्यपाद इति बभूवु । तीर्थप्रत्यनीक पञ्चता नयन्तस्ते पञ्चापि गिरे परितो विजयन्ते स्म । अथ तत्पिता धाराभिधान एक एवावशिष्ट कन्यकुब्जदेशे गत्वा श्रीबप्पभट्टिसूरीणा व्याख्याक्षणप्रक्रमे श्रीसघस्याज्ञा दत्तवान् यद्रैवतकतीर्थे दिगम्बरा कृतवसतय सिताम्बरान् पाखण्डिरूपान् परिकल्प्य पर्वताधिरूढान्निच्छेन्ति अत स्तान् निर्जित्य तीर्थोद्धार कृत्वा निजदर्शनप्रतिष्ठापरैर्व्याख्याक्षणो विधेय इति तद्वचनेन्धनप्रोज्ज्वलितप्रतीपज्वलनाँ नृपति सहादाय तेन सम ता भूधरधरामवाप्य सप्तभिर्दिनैर्वादस्थलेन दिगम्बरान् पराजित्य श्रीसंघसमक्ष श्रीअम्बिका प्रत्यक्षीकृत्य एकोवि नमुक्कारो उज्जन्तसेलसिहरे इत्यादितदुक्ता गाथामाकर्ण्य सिताम्बरदर्शने स्थापिते सति पराभूता दिग्वसना बलानकमण्डपात् झम्पापात वितेनुरिति क्षेत्राधिपत्युत्पत्तिप्रबन्धः+॥

---

१ तेन निजाभिप्रायसदृशप्रत्युत्तरदानेन a H * अथ वैद्यवाग्भटप्रबन्ध पुस्तकान्तरे नोपलभ्यते २ धारणउलिग्रामे वास्तव्यो a ३ मासाद्यतद् द्रविण a ४ मरणरसेन a ५ बप्पहट्टि M P ६ पर्वतेऽधिरोढु न ददाति H ७ प्रतिपज्वलना C

+ अथ क्षेत्राधिपत्युत्पत्तिप्रबन्ध पुस्तकान्तरे नोपलभ्यते इति डा भाउदाजीशर्मभिर्लिखितम् ।

२५ अथ कदाचिद्भवान्या भव इति पृष्ट , यत्त्व कियता कार्पटिकाना राज्य ददासीति तद्वाक्यादनु यो लक्षमख्यानामपि एक एव वासनापरस्तस्य चे राज्यमह वितरामीति प्रत्ययदर्शनाय गौरीं पङ्कमग्ना जरद्गवीं विधाय स्वय नररूपेण तटस्थ पान्थास्तामुद्धर्तुमाकारयन् तैरासन्नसोमेश्वरदर्शनोत्केरुपहस्यमान केनापि कृपापरता पथिकवृन्देन तस्यामुद्धर्तुमारब्धाया सिहरूपेण शिव एव तान् त्रासयन् कश्चिदेक एव पथिको मृत्युमप्यादृत्य तस्या गो समीप नोज्झीत् स एव राज्यार्ह इति पृथक् गौर्या दर्शित इति वामनाप्रबन्ध:× ।

२६ अथ कश्चित्कार्पटिक सोमेश्वरयात्राया व्रजन् पथि लोहकारौकसि प्रसुप्त । तस्य लोहकारस्य भार्या पति निहत्य कृपाणिका कार्पटिकशीर्षे निदधती पुत्कारवमकरोत् । आरक्षकेण तत्रागत्य तस्यापराधिन करौ छिन्नौ स देवस्योपालम्भनपर निशि प्रत्यक्षीभूयेत्युक्त । शृणु त्व प्राग्भवे कदाचिदजा केनापि एकेन सोदरेण पाणिभ्या श्रवणयोर्धृता तदपरेण मारिता, तत सा अजा मृता इय योषिदजनि येन व्यापादिता स साम्प्रत पतिरभूत् यत्त्वया तदा श्रवणौ धृतौ तदा तव समागमे जाते सति करौ छिन्नौ तदा कथ ममोपालम्भ इति कृपाणिकाप्रबन्धः * ।

२७ पुरा शङ्खपुरनगरे शङ्खो नाम नृपतिस्तत्र नामकर्मभ्या धनद श्रेष्ठी स कदाचित्कारिस्वर्णतालनरत्ना कमला विमृश्योपायनपाणिर्नृपोपान्तमुपेत्य त परितोष्य च तत्प्रमादीकृताया भुवि चतुर्भिर्नन्दनै मह समालोच्य सुलग्ने जैनप्रासादमचीकरत् । तत्र प्रतिष्ठितबिम्बाना स्थापना विधाय

× एष वामनाप्रबन्ध पुस्तकान्तरे नापलभ्यत इति P भाउ दाजीसंज्ञके लिखितम् १ त्वया प्राग्भवे P

* अय कृपाणिकाप्रबन्ध पुस्तकान्तरे नापलभ्यत २ कथाकोषेऽपीय कथा वर्तते

तस्य प्रासादस्य समारचनाय बहून्यायद्वाराणि रचयन् तत्सपर्याकुलतया नानाविधकुसुमवृक्षावलीसमलंकृतमभिराममारामं च निर्माप्य तच्चिन्तकेषु नियुक्तेषु उदिते प्राक्तनान्तरायकर्मणि क्रमात् संह्रियमाणसंपद्धमर्णतया तत्र मानम्लानिमाकलय्यानतिदूरवर्तिनि क्वापि ग्रामे कृतवसतिर्निगरयातायातेन सुतोपात्तजीविक कियन्तमपि कालमतिवाहितवान् । अथान्यस्मिन्नवसरे सन्निहिते चातुर्मासिकपर्वणि तत्र यायिभिः सुतैः समं स धनद शङ्खपुरं प्राप्य निजप्रासादसोपानमधिरोहन् निजारामपुष्पलाविकयोपायनीकृतपुष्पचतु सरिक परमानन्दनिर्भरस्ताभिर्जिनेन्द्रमभ्यर्च्य निशि गुरूणां पुर स्वं दौस्थ्यममन्दं निन्दन् तैः प्रदत्तकपर्दियक्षाकृष्टिमन्त्रोऽन्यदा कृष्णचतुर्दशीनिशीथे तमेव मन्त्रमाराधयन् प्रत्यक्षीकृतात् कपर्दियक्षात् गुरूपदेशतश्चतुर्मासकावसरे पुष्पचतुःसारिकपूजापुण्यफलं देहीति प्रार्थयन् एकस्यापि पूजाकुसुमस्य पुण्यफलं सर्वज्ञेन विना नाहं वितरीतुं प्रभूष्णुरिति किंतु कपर्दियक्षस्तस्य साधर्मिकस्यातुल्यवात्सल्यसम्बन्धे तद्धाम्नि चतुर्षु कोणेषु सुवर्णपूर्णान् चतुरः कलशान् निधीकृत्य तिरोदधे । स प्रात स्वसद्मनि समागतः धर्मदानपराणां नन्दनानां तद्द्रव्यं समर्थयामास । तेऽपि निर्बन्धात् पितुः पार्श्वे तद्वैभवलाभहेतुं पृच्छन्तस्तेषां हृदि धर्मप्रभावाविर्भावाय जिनपूजाप्रभावतः परितुष्टेन कपर्दियक्षेण प्रसादीकृतां तां संपदं निवेदयामास । तेऽपि संपन्नसंपत्तयस्तदेव जन्मनगरं समाश्रित्य निजधर्मस्थानसमारचनपराः जिनशासनप्रभावनां विविधां कुर्वन्तो वैधर्मिकाणामपि मनस्सु जिनधर्मं निश्चलीचक्रुरिति श्रीवीतरागपूजायां धनदप्रबन्धः+ ।

इत्याचार्यश्रीमेरुतुङ्गाविःकृते प्रबन्धचिन्तामणौ विक्रमादित्याद्युदितपात्रविवेचनप्रमुखजिनपूजायां धनदप्रबन्धपर्यन्तवर्णनो नाम प्रकीर्णकाभिधानः पञ्चमः प्रकाशः समर्थितः ॥ ग्रन्थाग्रं ३०००.

---

१ तद्धाम्निश्चतु D २ धर्मनिन्दापराणा ॥

+ अयं धनदप्रबन्ध. पुस्तकान्तरे नोपलभ्यते इति डा. भाउदाजीशर्मभिर्लिखितम्

३१) दुःप्रापेषु बहुश्रुतेषु गुणवद्वृद्धेषु च प्रायशः
शिष्याणां प्रतिभाभियोगविगमादुच्चैःश्रुते सीदति ।
प्राज्ञानामथ भाविनामुपकृतिं कर्तुं परामिच्छता
ग्रन्थः सत्पुरुषप्रबन्धघटनाचक्रे सुधासत्रवत् ॥ १ ॥

३२) प्रबन्धानां चिन्तामणिरयमुपात्तः करतले
स्यमन्तस्य भ्रान्तिं रचयति चिरायोपनिहितः ।
हृदि न्यस्तः शस्तां सृजति विमलां कौस्तुभकलां
तदेतस्माद्ग्रन्थाद्भवति विबुधः श्रीपतिरिव ॥ २ ॥

३३) यथा श्रुतं संकलितः प्रबन्धै—
ग्रन्थो मया मन्दधियापि यत्नात् ।
मात्सर्यमुत्सार्य सुधीभिरेव
प्रज्ञोद्धुरैरुन्नतिमेव नेयः— ॥ ३ ॥

यावद्दिवि कितवाविव रविशशिनौ क्रीडतो ग्रहकपर्दैः ।
ग्रन्थस्तावन्नन्दतु सूरिभिरुपदिश्यमानोऽयम् ॥ ४ ॥

नृपश्रीविक्रमकालातीतसंवत् १३६१ वर्षे फाल्गुनसुदि १५ रवावद्येह श्रीवर्धमानपुरे चिन्तामणिग्रन्थः समाप्तः ॥

---

१ त्रयोदशस्वब्दशतेषु चैक-
षष्ट्याधिकेषु क्रमतो गतेषु ।
वैशाखमासस्य च पूर्णिमायां
ग्रन्थः समाप्तिं गमितो मितोऽयम् ॥ B

प्रबन्धचिन्तामणिस्थश्लोकानामकाराद्यनुक्रमः ॥

— o —

॥ प्राकृतशब्दानामकाराद्यनुक्रमः ॥

नरनगनगरनद्यादिविशेषनाम्नामनुक्रमः ।